नमः सर्वज्ञाय ।

# स्याद्वादमञ्जरी ।

यस्य ज्ञानमनन्तवस्तुविषयं यः पूज्यते दैवतै ।
नित्यं यस्य वचो न दुर्नयकृतैः कोलाहलै र्लुप्यते ॥
रागद्वेषमुखद्विषां च परिषत् क्षिप्ता क्षणाद्येन सा ।
स श्रीवीरविभु र्विधूतकलुषां बुद्धिं विधत्तां मम ॥ १ ॥
निःसीमप्रतिभैकजीवितधरौ निःशेषभूमिस्पृशां ।
पुण्यौघेन सरस्वतीसुरगुरू स्वाङ्गैकरूपौ दधत् ॥
यः स्याद्वादमसाधयन्निजवपुर्दृष्टान्ततः सोऽस्तु मे ।
सद्बुद्ध्यम्बुनिधिप्रबोधविधये श्रीहेमचन्द्रः प्रभुः ॥ २ ॥
ये हेमचन्द्रं मुनिमेतदुक्तग्रन्थार्थसेवामिषतः श्रयन्ते ।
सम्प्राप्य ते गौरवमुज्ज्वलानां पदं कलानामुचितं भवन्ति॥
मात र्भारति सन्निधेहि हृदि मे येनेयमाप्तस्तुते ।
निर्मातुं विवृतिं प्रसिद्ध्यति जवादारम्भसम्भावना ॥
यद्वा विस्मृतमोष्ठयोः स्फुरति यत्सारस्वतः शाश्वतो ।
मन्त्रः श्रीउदयप्रभेति रचनारम्भो ममाहर्निशम् ॥ ४ ॥

इह हि विषमदुःखमारजनितिमिरतिरस्कारभास्करानुकारिणा वसुधातलावतीर्णसुधासारिणीदेश्यदेनावितानपरमार्हतीकृतश्रीकुमारपालक्ष्मापालप्रवर्त्तिताभयदानाभिधानजीवातुसंजीवितनानाजीवप्रदत्ताशीर्वादमाहात्म्यकल्पावधिस्थायिविशदयशःशरीरेण नि-

रवद्यचातुर्विद्यनिर्माणैकब्रह्मणा श्रीहेमचन्द्रसूरिणा जगत्प्रसिद्धश्रीसिद्धसेनदिवाकरविरचितद्वात्रिंशद्द्वात्रिंशिकानुसारि-श्रीवर्द्धमानजिनस्तुतिरूपमयोगव्यवच्छेदान्ययोगव्यव-च्छेदाभिधानं द्वात्रिंशिकाद्वितयं विद्वज्जनमनस्तत्त्वाव-बोधनिबन्धनं विदधे तत्र च प्रथमद्वात्रिंशिकायाः सु-खोन्नेयत्वाद्व्याख्यानमुपेक्ष्य द्वितीयस्या निःशेषदुर्वादि-पर्षदधिक्षेपदक्षायाः कतिपयपदार्थविचारणाकरणेन स्वस्मृतिबीजप्रबोधविधिर्विधीयते तस्याश्चेदमादि-काव्यम् ॥

**अनन्तविज्ञानमतीतदोष-**
**मबाध्यसिद्धान्तममर्त्यपूज्यम् ।**
**श्रीवर्द्धमानं जिनमाप्तमुख्यं**
**स्वयंभुवं स्तोतुमहं यतिष्ये ॥१॥**

श्रीवर्द्धमानं जिनमहं स्तोतुं यतिष्य इति क्रि-यासंबन्धः किंविशिष्टमनन्तमप्रतिपाति विशिष्टं स-र्वद्रव्यपर्यायविषयत्वेनोत्कृष्टं ज्ञानं केवलाख्यं विज्ञानं ततोऽनन्तं विज्ञानं यस्य सोऽनन्तविज्ञानस्तं तथा अ-तीता निःसत्ताकीभूतत्वेनातिक्रान्ता दोषा रागादयो यस्मात्स तथा तं तथा अबाध्यः परैर्बाधितुमशक्यः सि-द्धान्तः स्याद्वादश्रुतलक्षणो यस्य स तथा तं अमर्त्या देवा-स्तेषामपि पूज्यमाराध्यम् अत्र च श्रीवर्द्धमानस्वामिनो विशेषणद्वारेण चत्वारो मूलातिशयाः प्रतिपादिता-

स्तत्रानन्तविज्ञानमित्यनेन भगवतः केवलज्ञानलक्ष-णविशिष्टज्ञानानन्त्यप्रतिपादनाज् ज्ञानातिशयः १ अतीतदोषमित्यनेनाष्टादशदोषसंचयाभिधानादपाया-पगमातिशयः २ अबाध्यसिद्धान्तमित्यनेन कुतीर्थिकोपन्यस्तकुहेतुसमूहाशक्यबाधस्याद्वादरूपसिद्धान्त-प्रणयनभणनाद्वचनातिशयः ३ अमर्त्त्यपूज्यमि-त्यनेनाकृत्रिमभक्तिभरनिर्भरसुरासुरनिकायनायक-निर्मितमहाप्रातिहार्यसपर्य्यापरिज्ञापनात् पूजातिश-यः ४ अत्राह परः अनन्तविज्ञानमित्येतावदेवास्तु नातीतदोषमिति गतार्थत्वाद्दोषात्ययं विनाऽनन्तवि-ज्ञानत्वस्या नुपपत्ते रत्रोच्यते कुनयमतानुसारिपरि-कल्पिताप्तव्यवच्छेदार्थमिदं तथाचाहु राजीविकनया-नुसारिणः । ज्ञानिनो धर्मतीर्थस्य कर्त्तारः परमं पदं । गत्वा गच्छन्ति भूयोऽपि भवं तीर्थनिकारत इति त न्नूनं ते अतीतदोषाः कथमन्यथा तेषां तीर्थनिका-रदर्शनेपि भवावतारः आह यद्येवमतीतदोषमित्ये-वास्तु अनन्तविज्ञानमित्यतिरिच्यते दोषात्ययेऽवश्यं-भावित्वादनन्तविज्ञानत्वस्य न कैश्चिद्दोषाभावेऽपि त-दभ्युपगमात् तथा च तद्वचनम् ।

सर्वं पश्यतु वा मा वा तत्वमिष्टं तु पश्यतु ।
कीटसङ्ख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ॥ १ ॥

तथा ।

तस्मादनुष्टानगतं ज्ञानमस्य विचार्यतां ।
प्रमाणं दूरदर्शी चेदेते गृध्रानुपास्महे ॥ २ ॥

तन्मतव्यपोहार्थमनन्तविज्ञानमित्यदुष्टमेव विज्ञानानन्त्यं विना एकस्याप्यर्थस्य यथावत्परिज्ञानाभावात् तथाचार्षं "जे* एगं जाणइ से सव्वं जाणइ जे सव्वं जाणइ से एगं जाणइ" ।

तथा ।

एको भावः सर्वथा येन दृष्टः
सर्वे भावा सर्वथा तेन दृष्टाः ।
सर्वे भावा सर्वथा येन दृष्टाः
एको भावः सर्वथा तेन दृष्टः ॥ २ ॥ इति

ननु तर्हि अबाध्यसिद्धान्तमित्यपार्थकं यथोक्तगुणयुक्तस्याव्यभिचारिवचनेन तदुक्तसिद्धान्तस्य बाधायोगात् न अभिप्रायापरिज्ञानान्निर्दोषपुरुषप्रणीत एव अबाध्यः सिद्धान्तो नापरेऽपौरुषेयाद्या असम्भवादिदोषाघ्रातत्वात् इति ज्ञापनार्थं आत्ममात्रतारकमूकान्तकृत्केवल्यादिरूप[illegible]केवलिनो यथोक्तसिद्धान्तप्रणयनासमर्थस्य व्यवच्छेदार्थं वा विशेषणमेतत् अन्यस्त्वाह अमर्त्यपूज्यमिति न वाच्यं यावता यथोद्दिष्टगुणगरिष्ठस्य त्रिभुवनविभोरमर्त्यपूज्यत्वं न व्यभिचरतीति सत्यं लौकिकानां हि अमर्त्या एव पूज्यतया प्रसिद्धास्तेषामपि भगवानेव पूज्य इति विशेषणेनानेन ज्ञापयन्नाचार्यः परमेश्वरस्य देवाधिदेवत्वमावेदयति एवं पूर्वार्द्धे चत्वारोऽतिशया उक्ता अनन्तविज्ञानत्वं च सामान्यकेवलिनामप्यवश्यं भावीत्यतस्तद्व्यवच्छेदाय श्री-

* यो रागं जानाति स सर्वं जानाति यः सर्वं जानाति स रागं जानाति इतिच्छाया ।

वर्द्धमानमिति विशेष्यपदमपि विशेषणतया व्याख्यायते
श्रिया चतुस्त्रिंशदतिशयसमृद्धानुभवात्मकभावार्हन्त्य २
रूपतया वर्द्धमानं वर्द्धिष्णु नन्वतिशयानां परिमि-
ततयैव सिद्धान्ते प्रसिद्धत्वात्कथं वर्द्धमानतोपपत्तिरि-
तिचेन्न यथा निशीथचूर्णौ भगवतां श्रीमदर्हतामष्टो-
त्तरसहस्रसङ्ख्याबाह्यलक्षणसङ्ख्याया उपलक्षणत्वेना-
न्तरङ्गलक्षणानां सत्वादीनामानन्त्यमुक्तमेवमतिश-
यानामधिकृतपरिगणनायोगेऽप्यपरिमितत्वमविरुद्धं त-
तो नातिशयश्रिया वर्द्धमानत्वं दोषाश्रय इति अती-
तदोषता चोपशान्तमोहगुणस्थानवर्तिनामपिसम्भव-
तीत्यर्थः क्षीणमोहाख्यप्रतिपातिगुणस्थानप्राप्तिप्रति-
पत्त्यर्थं जिनमितिविशेषणं रागादिजेतृत्वाज्जिनः स-
मूलकाषङ्कषितरागादिदोष इति अबाध्यसिद्धान्तता
च श्रुतकेवल्यादिष्वपिदृश्यतेऽतस्तदपोहायाप्तमुख्य-
मितिविशेषणं आप्तिर्हि रागद्वेषमोहानामैकान्तिक
मात्यन्तिकश्च क्षयः सा येषामस्ति ते खल्वाप्ताः अ-
[illegible]दित्वान्मत्वर्थीयोऽप्रत्ययस्तेषु मध्ये मुखमिव स-
र्वाङ्गानां प्रधानत्वेन मुखस्य शाखादेयं इति तुल्ये
यः अमर्त्यपूज्यता च तथाविधगुरूपदेशपरिचर्यापि-
र्याप्तविद्याचरणसंपन्नानां सामान्यमुनीनामपि न दु-
र्घटा अतस्तन्निराकरणाय स्वयंभुवमितिविशेषणं स्व-
यमात्मनैवपरोपदेशनिरपेक्षतयावगततत्वो भवतीति
स्वयंभूः स्वयंसंबुद्धस्तमेवंविधं चरमजिनेन्द्रं स्तोतुं स्तु-
तिविषयीकर्तुमहं यतिष्ये यत्नं करिष्यामि अत्र चा-

चार्यो भविष्यत्कालप्रयोगेण योगिनामप्यशक्यानुष्ठानं भगवद्गुणस्तवनं मन्यमान श्रद्धामेव स्तुतिकरणाऽसाधारणं कारणं ज्ञापयन् यत्नकरणमेव मदधीनं न पुनर्यथावस्थितभगवद्गुणस्तवनसिद्धिरिति सूचितवान् अहमिति च गतार्थत्वेऽपि परोपदेशान्यानुवृत्त्यादिनिरपेक्षतया निजश्रद्धयैव स्तुतिप्रारम्भ इतिज्ञापनार्थं अथवा श्रीवर्द्धमानादिविशेषणचतुष्टयमनन्तविज्ञानादिपदचतुष्टयेन सह हेतुहेतुमद्भावेन व्याख्यायते यत एव श्रीवर्द्धमानमतएवानन्तविज्ञानं श्रिया कृत्स्नकर्मक्षयाविर्भूतानन्तचतुष्कसंपद्रूपया वर्द्धमानं यद्यपि श्रीवर्द्धमानस्य परमेश्वरस्यानन्तचतुष्कसंपत्तेरुत्पत्त्यनन्तरं सर्वकालं तुल्यत्वाच्चयापचयौ न स्तस्तथापि निरपचयत्वेन शाश्वतिकावस्थानयोगाद्वर्द्धमानत्वमुपचर्यते यद्यपि च श्रीवर्द्धमानविशेषणेनानन्तचतुष्कान्तर्भावित्वेनानन्तविज्ञानत्वमपिसिद्धं तथाप्यनन्तविज्ञानस्यैव परोपकारसाधकतमत्वाद्भगवत्प्रवृत्तेश्च परोपकारैकनिबन्धनत्वादनन्तविज्ञानत्वं शेषानन्तत्रयात्पृथग् निर्द्धार्याचार्येणोक्तं ननु यथा जगन्नाथस्यानन्तविज्ञानं परार्थं तथानन्तदर्शनस्य केवलदर्शनापरपर्यायस्य पारार्थ्यमव्याहतमेव केवलज्ञानकेवलदर्शनाभ्यामेव हि स्वामी क्रमप्रवृत्तिभ्यामुपलब्धं सामान्यविशेषात्मकं पदार्थसार्थं परेभ्यः प्ररूपयति तत्किमर्थं तन्नोपात्तमिति चेदुच्यते विज्ञानशब्देन तस्यापि संग्रहाददोषः ज्ञानमात्रस्योभयत्रापि समानत्वात् यएव हि अ-

भ्यन्तरीकृतसमताख्यधर्मो विषमताधर्मविशिष्टाज्ज्ञानेन गम्यन्तेऽर्थास्त एव अभ्यन्तरीकृतविषमताधर्माः समताधर्मविशिष्टादर्शनेन गम्यन्ते जीवस्वाभाव्यात् सामान्यप्रधानमुपसर्ज्जनीकृतविशेषमर्थग्रहणं दर्शनमुच्यते तथा प्रधानविशेषमुपसर्जनीकृतसामान्यं च ज्ञानमिति तथा यत एव जिनमत एवातीतदोषं जेतृत्वाद्धि जिनः नचाजिनस्यातीतदोषता तथा यत एवाप्तमुख्यमत एवाबाध्यसिद्धान्तं आप्तो हि प्रत्ययित उच्यते तत आप्तेषु मुख्यं श्रेष्ठं आप्तमुख्यत्वं च प्रभोरविसम्वादिवचनतया विश्वविश्वासभूमित्वात् अत एवाबाध्यसिद्धान्तं न हि यथावज्ज्ञानावलोकितवस्तुवादी सिद्धान्तः कुनयै र्बाधितुं शक्यते यत एव स्वयंभुवमत एवामर्त्यपूज्यं पूज्यते हि देवदेवो जगत्त्रयविलक्षणलक्षणेन स्वयंसम्बुद्धत्वगुणेन सौधर्मेन्द्रादिभिरमर्त्यैरिति ऋत्वच श्रीवर्द्धमानमिति विशेषणतया यद्व्याख्यातं तदन्ययोगव्यवच्छेदाभिधानप्रथमद्वात्रिंशिकाप्रथमकाव्यस्ततीयपादवर्त्तमानं श्रीवर्द्धमानाभिधमात्मरूपमिति विशेष्यमनुवर्त्तमानं बुद्धौ संप्रधार्य विज्ञेयं तत्र हि आत्मरूपमितिविशेष्यपदं प्रकृष्ट आत्मा आत्मरूपस्तं परमात्मानमिति यावत् आवृत्त्या वा विशेषणमपि विशेष्यतया व्याख्येयमिति प्रथमवृत्तार्थः ।१।

अस्यां च स्तुतावन्ययोगव्यवच्छेदोऽधिकृतस्तस्य च तीर्थान्तरीयपरिकल्पिततत्त्वाभासनिरासेन तेषामा[illegible]त्वव्यवच्छेदः स्वरूपं तच्च भगवतो यथाऽवस्थितवस्तु-

त्ववादित्वख्यापनेनैव प्रामाण्यमश्नुतेऽ तस्तुतिकारस्त्रि-जगद्गुरोर्निःशेषगुणस्तुतिश्रद्धालुरपि सद्भूतवस्तुवा-दित्वाख्यं गुणविशेषमेव वर्णयितुमात्मनोऽभिप्राय-माविष्कुर्वन्नाह।

अयं जनो नाथ तव स्तवाय
गुणान्तरेभ्यः स्पृहयालुरेव।
विगाहतां किन्तु यथार्थवाद-
मेकं परीक्षाविधिदुर्विदग्धः ॥२॥

हे नाथ अयं मल्लक्षणो जनस्तव गुणान्तरे-भ्यो यथार्थवादव्यतिरिक्तेभ्योऽनन्यसाधारणशारीरल-क्षणादिभ्यः स्पृहयालुरेव श्रद्धालुरेव किमर्थं स्तवाय स्तुतिकरणाय इयं तादर्थ्येचतुर्थी पूर्वत्र स्पृहेर्व्याप्यं वे-ति लक्षणा तव गुणान्तराण्यपि स्तोतुं स्पृहावानेवायं जन इति भावः ननु यदि गुणान्तरस्तुतावपि स्पृहया-लुता तत्किमर्थं तत्रोपेक्षेत्याशङ्क्योत्तरार्द्धमाह किं त्वित्यभ्युपगमविशेषद्योतने निपातः एकमेकमेव य-थार्थवादं यथावस्थितवस्तुतत्त्वप्रख्यापनाख्यं त्वदीयं गुणमयं जनो विगाहतां स्तुतिक्रियया समन्तात् व्या-प्नोतु तस्मिन्नेकस्मिन्नपि हि गुणे वर्णिते तस्मान्तरी-यदैवतेभ्यो वैशिष्ट्यख्यापनद्वारेण वस्तुतः सर्वगुणस्तव-नसिद्धिः अथ प्रस्तुतगुणस्तुतिः सम्यक्परीक्षाक्षमाणा-

मेव दिव्यदृशामौचितीमञ्चति नार्वाग्दृशां मादृशा-
मित्याशङ्कां विशेषणद्वारेण निराकरोति यतोऽयं जनः
परीक्षाविधिदुर्विदग्धः अधिकृतगुणविशेषपरीक्षण-
विधौ दुर्विदग्धः पण्डितंमन्य इति यावत् अयमाशयो
यद्यपि जगद्गुरोर्यथार्थवादित्वगुणपरीक्षणं मादृशां
मतेरगोचरस्तथापि भक्तिश्रद्धातिशयात् तस्यामहमा-
त्मानं विदग्धमिव मन्य इति विशुद्धश्रद्धाभक्तिव्यक्ति-
मात्ररूपत्वात्स्तुतेरिति वृत्तार्थः ॥ २ ॥

अथ ये कुतीर्थ्याः कुशास्त्रवासनावासितस्वान्त-
तया त्रिभुवनस्वामिनं स्वामित्वेन न प्रतिपन्नास्तानपि
तत्त्वविचारणां प्रति शिक्षयन्नाह ।

**गुणेष्वसूयां दधतः परेऽमी**
**माशिश्रियन्नाम भवन्तमीशं ।**
**तथापि सम्मील्य विलोचनानि**
**विचारयन्तां नयवर्त्म सत्यम् ॥३॥**

अमी इति अदसस्तु विप्रकृष्ट इति वचनात्
तत्त्वातत्त्वविमर्शबाह्यतया दूरीकरणार्हत्वाद्विप्रकृष्टाः
परे कुतीर्थिका भवन्तं त्वां अनन्यसामान्यसकल-
गुणनिलयमपि मा ईशं शिश्रियन् मा स्वामित्वेन-
प्रतिपद्यन्तां यतो गुणेष्वसूयां दधतो गुणेषु ब-
द्धमत्सराः गुणेषु दोषाविष्करणं ह्यसूया यो हि यत्र

मत्सरी भवति स तदाश्रयं नानुरुध्यते यथा माधुर्यमत्सरी करभः इक्षुकाण्डं गुणाश्रयश्च भवान् एवं परतीर्थिकानां भगवदाज्ञाप्रतिपत्तिं प्रतिषिध्य स्तुतिकारो माध्यस्थ्यमिवास्थाय तान् प्रति हितशिक्षामुत्तरार्द्धेनोपदिशति तथापि त्वदाज्ञाप्रतिपत्तेरभावेपि लोचनानि नेत्राणि सम्मील्य मिलितपुटीकृत्य सत्यं युक्तियुक्तं नयवर्त्म न्यायमार्गं विचारयन्तां विमर्शविषयीकुर्वन्तु अत्र च विचारयन्तामित्यात्मनेपदेन फलवत्कर्तृविषयेणैवं ज्ञापयत्याचार्यो यदवितथनयपथविचारणया तेषामेव फलं वयं केवलमुपदेष्टारः किं तत्फलमिति चेत्प्रेक्षावत्तेति ब्रूमः सम्मील्य विलोचनानि इति वदतः प्रायस्तत्त्वविचारणमेकाग्रताहेतुनयनमीलनपूर्वकं लोके प्रसिद्ध मित्यभिप्रायः अथ वा अयमुपदेशस्तेभ्यो रोचमान एवाचार्येण वितीर्यते ततोऽस्वदमानोऽप्ययं कटुकौषधपानन्यायेनायतिसुखत्वाद्भवद्भिर्नेत्रे निमील्य पेय एवेत्याकूतं ननु च यदि पारमेश्वरे वचसि तेषामविवेकातिरेकादरोचकिता तत्किमर्थं तान्प्रति उपदेश इति नैवं परोपकारसारप्रवृत्तीनां महात्मनां प्रतिपाद्यगतां रुचिमरुचिं वा ऽनपेक्ष्य हितोपदेशप्रवृत्तिदर्शनात्तेषां हि परार्थस्यैव स्वार्थत्वेनाभिमतत्वात् न च हितोपदेशादपरः पारमार्थिकपरार्थस्तथा चार्षम् ॥

रुसउ वा परो मा वा विसं वा परियत्तउ भासि ।
[illegible]यव्वाहिया भासा सपक्खगुणकारिया ॥ १ ॥

उवाच वाचकमुख्यः।

न भवतु धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात्।
ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति इति

वृत्तार्थः ॥ ३ ॥

अथ यथावन्नयवर्त्मविचारमेव प्रपञ्चयितुं पराभिप्रेततत्त्वानां प्रामाण्यं निराकुर्वन्नादितस्तावत्काणादौलूक्यमततत्त्वानि दूषयितुकामस्तदन्तःपातिनौ प्रथमतरं सामान्यविशेषौ दूषयन्नाह ॥

**स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो**
**भावा न भावान्तरनेयरूपाः।**
**परात्मतत्त्वादतथात्मतत्त्वा-**
**द्द्वयं वदन्तोऽकुशला स्खलन्ति॥४॥**

अभवन् भवन्ति भविष्यन्ति चेति भावाः पदार्थाः आत्मपुद्गलादय स्ते स्वत इति सर्वं हि वाक्यं सावधारणमामनन्तीति स्वत एवात्मीयस्वरूपादेवानुवृत्तिव्यतिवृत्तिभाज एकाकारा प्रतीतिरेकशब्दवाच्यता वानुवृत्ति र्व्यतिवृत्ति र्व्यावृत्ति र्विजातीयेभ्यः सर्वथा व्यवच्छेदस्ते उभे अपि संवलिते भजन्ते आश्रयन्तीति अनुवृत्तिव्यतिवृत्तिभाजः सामान्यविशेषोभयात्मका इत्यर्थः अस्यैवार्थस्य व्यतिरेकमाह न भावान्तरनेयरूपा इति नेति निषेधे भावान्तराभ्यां—पराभिमताभ्यां द्रव्यगुणकर्मसमवायेभ्यः पदार्थान्तराभ्यां भावव्यतिरि-

त्सामान्यविशेषाभ्यां नेयं प्रतीतिविषयं प्रापणीयं रूपं यथासंख्यमनुवृत्तिव्यतिवृत्तिलक्षणं स्वरूपं येषां ते तथोक्ताः स्वभाव एव हि अयं सर्वभावानां यदनुवृत्तिव्यावृत्तिप्रत्ययौ स्वत एव जनयन्ति तथा हि घट एव तावत्पृथुबुध्नोदराद्याकारवान् प्रतीतिविषयीभवन् सन् अन्यानपि तदाकृतिभृतः पदार्थान् घटरूपतया घटैकशब्दवाच्यतया प्रत्याययन् सामान्याख्यां लभते एवंचेतरेभ्यः सजातीयविजातीयेभ्यो द्रव्यक्षेत्रकालभावैरात्मानं व्यावर्तयन् विशेषव्यपदेशमश्नुत इति न सामान्यविशेषयोः पृथक्पदार्थान्तरत्वकल्पनं न्याय्यं पदार्थधर्मत्वेनैव तयोः प्रतीयमानत्वा न्न च धर्मा धर्मिणः सकाशादत्यन्तं व्यतिरिक्ता एकान्तभेदे विशेषणविशेष्यभावानुपपत्तेः करभरासभयोरिव धर्मधर्मिव्यपदेशाभावप्रसङ्गा च्च धर्माणामपि च पृथक्पदार्थान्तरत्वकल्पने एकस्मिन्नेव वस्तुनि पदार्थानन्त्यप्रसङ्गः अनन्तधर्मकत्त्वाद्वस्तुनः तदेवं सामान्यविशेषयोः तत्त्वं यथावदनवबुध्यमाना अकुशला अतत्त्वाभिनिविष्टदृष्टयस्तीर्थान्तरीयाः स्खलन्ति न्यायमार्गाद्भ्रश्यन्ति निरुत्तरीभवन्तीत्यर्थः स्खलनेन चात्र प्रामाणिकजनोपहसनीयता ध्वन्यते किं कुर्वाणाः द्वयं अनुवृत्तिव्यावृत्तिलक्षणं प्रत्ययद्वयं वदन्तः कस्मादेतत्प्रत्ययद्वयं वदन्त इत्याह परात्मतत्त्वात्परौ पदार्थेभ्यो व्यतिरिक्तत्वादन्यौ परस्परनिरपेक्षौ च यौ सामान्यविशेषौ तयो र्यदात्मतत्त्वं स्वरूपमनुवृत्तिव्या-

वृत्तिलक्षणं तस्मात्तदाश्रित्येत्यर्थः गम्ययपःकर्माधारे इत्यनेन पञ्चमी कथंभूतात्परात्मतत्त्वादित्याह अतथात्मतत्त्वा न्माभूत्पराभिमतस्य परात्मतत्त्वस्य सत्त्वरूपतेति विशेषणमिदं यथा येनैकान्तभेदलक्षणेन प्रकारेण परैः प्रकल्पितं न तथा तेन प्रकारेणात्मतत्त्वं स्वरूपं यस्य तं तथा तस्मात् यतः पदार्थेष्वविष्वग्भावेन सामान्यविशेषौ वर्त्तेते तेस्व तौ तेभ्यः परस्तेन कल्पितौ परत्वं चान्यत्वं तच्चैकान्तभेदाविनाभावि किं च पदार्थेभ्यः सामान्यविशेषयोरेकान्तभिन्नत्वे स्वीक्रियमाणे एकवस्तुविषयं अनुवृत्तिव्यावृत्तिरूपं प्रत्ययद्वयं नोपपद्येत एकान्ताभेदेचान्यतरस्यासत्त्वप्रसङ्गः सामान्यविशेषव्यवहाराभावश्च स्यात् सामान्यविशेषोभयात्मकत्वेनैव वस्तुनः प्रमाणेन प्रतीतेः परस्परनिरपेक्षपक्षस्तु पुरस्तान्निर्लोठयिष्यते अत एव तेषां वादिनां स्खलनक्रिययोपहसनीयत्वमभिव्यज्यते यो हि अन्यथा स्थितं वस्तुस्वरूपमन्यथैव प्रतिपद्यमानः परेभ्यश्च तथैव प्रज्ञापयन् स्वयं नष्टः परान्नाशयति न खलु तस्मादन्य उपहासपात्रमिति वृत्तार्थः ॥ ४ ॥

अथ तदभिमतौ एकान्तनित्यानित्यपक्षौ दूषयन्नाह ।

**आदीपमाव्योम समस्वभावं**
**स्याद्वादमुद्रानतिभेदि वस्तु ।**

**तन्नित्यमेवैकमनित्यमन्य-
दिति त्वदाज्ञाद्विषतां प्रलापाः॥५॥**

आदीपं दीपादारभ्य आव्योम मर्यादीकृत्य सर्वं वस्तु पदार्थस्वरूपं समस्वभावं सम स्तुल्यः स्वभावः स्वरूपं यस्य स तथा किं च वस्तुनः स्वरूपं द्रव्यपर्यायात्मकमिति ब्रूमः तथा च वाचकमुख्यः "उत्पादव्ययध्रौव्ययुक्तं सदि"ति समस्वभावत्वं कुत इति विशेषणद्वारेण हेतुमाह स्याद्वादमुद्रानतिभेदि स्यादित्यव्ययमनेकान्तद्योतकं ततः स्याद्वादोऽनेकान्तवादो नित्यानित्याद्यनेकधर्मशबलैकवस्त्वभ्युपगम इति यावत्तस्य मुद्रा मर्यादा तां न अतिभिनत्ति नातिक्रामतीति स्याद्वादमुद्रानतिभेदि यथा हि न्यायैकनिष्ठे राजनि राज्यश्रियं शासति सति सर्वाः प्रजास्तन्मुद्रां नातिवर्त्तितुमीशते तदतिक्रमे तासां सर्वार्थहानिभावादेवं विजयिनि निष्कण्टके स्याद्वादमहीनरेन्द्रे तदीयमुद्रां सर्वेऽपि पदार्थाः नातिक्रामन्ति तदुल्लङ्घने तेषां स्वरूपव्यवस्थाहानिप्रसक्तेः सर्ववस्तूनां समस्वभावत्वकथनं च पराभीष्टस्यैकं वस्तु व्योमादि नित्यमेवान्यच्च प्रदीपाद्यनित्यमेवेति वादस्य प्रतिक्षेपबीजं सर्वे हि भावा द्रव्यार्थिकनयापेक्षया नित्याः पर्यायार्थिकनयादेशात्पुनरनित्यास्तत्रैकान्तानित्यतया परैरङ्गीकृतस्य प्रदीपस्य तावन्नित्यत्वव्यवस्थापने दिग्मात्रमुच्यते तथा

हि प्रदीपपर्यायापन्नास्तैजसाः परमाणवः स्वरसत-
स्तैलक्षयाद्वाताभिघाताद्वा ज्योतिःपर्यायं परित्यज्य
तमोरूपं पर्यायान्तरमासादयन्तोऽपि नैकान्तेनानित्याः
पुद्गलद्रव्यरूपतयाऽवस्थितत्वात्तेषां नह्येतावतैवानि-
त्यत्वं यावता पूर्वपर्यायस्य विनाश उत्तरपर्यायस्य चो-
त्पादः न खलु मृद्द्रव्यं स्थासककोशकुशूलशिवकघ-
टाद्यवस्थान्तराण्यापद्यमानमप्येकान्ततो विनष्टं तेषु
मृद्द्व्यानुगमस्या बालगोपालं प्रतीतत्वा न्न च तमसः
पौद्गलिकत्वमसिद्धं चाक्षुषत्वान्यथानुपपत्तेः प्रदीपा-
लोकवत् अथ यच्चाक्षुषं तत्सर्वं स्वप्रतिभासे आलोक-
मपेक्षते नचैवं तम स्तत्कथं चाक्षुषं नैःमुलूका-
दीनामालोकमन्तरेणापि तत्प्रतिभासात् यैस्तु अस्म-
दादिभिरन्यच्चाक्षुषं घटादिकमालोकं विना नोपल-
भ्यते तैरपि तिमिरमालोकयिष्यते विचित्रत्वा द्भा-
वानां कथमन्यथा पीतश्वेतादयोपि स्वर्णमुक्ताःफ-
लाद्या आलोकापेक्षदर्शनाः प्रदीपचन्द्रादयस्तु प्रका-
शान्तरनिरपेक्षा इति सिद्धं तमश्चाक्षुषं रूपवत्वा च्च-
स्पर्शवत्त्वमपि प्रतीयते शीतस्पर्शप्रत्ययजनकत्वात् या-
नि त्वनिविडावयवत्वमप्रतिघातित्वमनुद्भूतस्पर्शवि-
शेषत्वमप्रतीयमानखण्डावयविद्रव्यप्रविभागत्वमित्या-
दीनि तमसः पौद्गलिकत्वनिषेधाय परैः साधनान्यु-
पन्यस्तानि तानि प्रदीपप्रभादृष्टान्तेनैव प्रतिषेध्यानि-
तुल्ययोगक्षेमत्वात् न च वाच्यं तैजसाः परमाणवः कथं
तमस्त्वेन परिणमन्त इति पुद्गलानां तत्तत्सामग्री-

सहकृतानां विसदृशकार्योत्पादकत्वस्यापि दर्शनात् दृष्टो ह्यार्द्रेन्धनसंयोगवशाद्भास्वररूपस्यापि वन्हेरभास्वररूपधूमरूपकार्योत्पादः इति सिद्धो नित्यानित्यः प्रदीपः यदापि निर्वाणादर्वाग् देदीप्यमानो दीपस्तदापि नवनवपर्यायोत्पादविनाशभाक्त्वात् प्रदीपत्वान्वयाच्च नित्यानित्य एव एवं व्योमापि उत्पादव्ययध्रौव्यात्मकत्वान्नित्यानित्यमेव तथा हि अवगाहकानां जीवपुद्गलानामवगाहदानोपग्रह एव तल्लक्षणं "अवकाशदमाकाशमिति" वचनात् यदा चावगाहका जीवपुद्गलाः संयोगतो विस्रसतो वा एकस्मान्नभःप्रदेशात्प्रदेशान्तरमुपसर्पन्ति तदा तस्य व्योम्नस्तैरवगाहकैः सममेकस्मिन्प्रदेशे विभाग उत्तरस्मिंश्च प्रदेशे संयोगः संयोगविभागौ च परस्परं विरुद्धौ धर्मौ तद्भेदे चावश्यं धर्मिणो भेद स्तथा चाहुः "अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्चे"ति तत श्च तदाकाशं पूर्वसंयोगविनाशलक्षणपरिणामापत्त्या विनष्टं उत्तरसंयोगोत्पादाख्यपरिणामानुभवाच्चोत्पन्नमुभयत्राकाशद्रव्यस्यानुगतत्वाच्चोत्पादव्ययोरेकाकाशाधिकरणत्वं तथा च य"दप्रच्युतानुत्पन्नस्थिरैकरूपं नित्यमि"ति नित्यलक्षणमाचक्षते तदपास्तं एवंविधस्य कस्यचिद्वस्तुनोऽभावात् "तद्भावाव्ययं नित्यमि"ति तु सत्यं नित्यलक्षणं उत्पादविनाशयोः सद्भावेपि तद्भावादन्वयिरूपा न्न व्येति तन्नित्यमिति तदर्थस्य घटमानत्वा द्यदि हि अप्रच्युतादिलक्षणं नित्यमिष्यते तदो-

त्पादव्यययो र्निराधारत्वप्रसङ्गः न च तयो र्योगि नित्यत्वहानिः ।

द्रव्यं पर्यायवियुतं पर्याया द्रव्यवर्जिताः ।
क्व कदा केन किं रूपा दृष्टा मानेन केन वा ॥१॥ इति

वचनाल्लौकिकानामपि घटाकाशम् इति व्यवहारप्रसिद्धेराकाशस्य नित्यानित्यत्त्वं घटाकाशमपि हि यदा घटापगमे पटेनाक्रान्तं तदा पटाकाश मिति व्यवहारः न चायमौपचारिकत्वादप्रमाणमेव उपचारस्यापि किञ्चित्साधर्म्यद्वारेण मुख्यार्थस्पर्शित्वात् नभसो हि यत्किल सर्वव्यापकत्त्वं मुख्यं परिमाणं तत्तदाधेयघटपटादिसम्बन्धिनियतपरिमाणवशात्कल्पितभेदं सत्प्रतिनियतदेशव्यापितया व्यवह्रियमाणं घटाकाशपटाकाशादितत्तद्व्यपदेशनिबन्धनं भवति तत्तद्घटादिसम्बन्धे च व्यापकत्त्वेनावस्थितस्य व्योम्नोऽवस्थान्तरापत्ति स्तत श्चावस्थाभेदेऽवस्थावतोऽपिभेदस्तासां ततो ऽत्रिष्वभावादिति सिद्धं नित्यानित्यत्वं व्योम्नः स्वयंभुवोऽपि हि नित्यानित्यमेव वस्तु प्रपन्नास्तथा चाहु स्ते त्रिविधः खल्वयं धर्मिणः परिणामो धर्मलक्षणावस्थारूपः सुवर्णं धर्मि तस्य धर्मपरिणामो वर्द्धमानरुचकादिः धर्मस्य तु लक्षणपरिणामोऽनागतत्वादिः यदा खल्वयं हेमकारो वर्द्धमानकं भङ्क्त्वा रुचकमारचयति तदा वर्द्धमानको वर्तमानतालक्षणं हित्वा अतीततालक्षणमापद्यते रुचकस्तु अनागततालक्षणं हित्वा वर्तमानतामापद्यते वर्तमानतापन्न

एव रुचको नवपुराणभावमापद्यमानोऽवस्थापरिणा-मवान् भवति सोऽयं त्रिविधः परिणामो धर्मिणः धर्म-लक्षणावस्था श्च धर्मिणो भिन्नाश्च तथा च ते धर्म्यभे-दात्तन्नित्यत्वेन नित्याः भेदाच्चोत्पत्तिविनाशविषयत्व-मित्युभयमुपपन्नमिति अथोत्तरार्द्धं विव्रियते एवं चो-त्पादव्ययध्रौव्यात्मकत्वे सर्वभावनां सिद्धेऽपि तद्वस्तु एकं आकाशात्मादिकं नित्यमेवान्यच्च प्रदीपघटादि-कमनित्यमेवेत्येवकारोऽत्रापि सम्बध्यते इत्थं हि दुर्न-यवादापत्तिरनन्तधर्मात्मके वस्तुनि स्वाभिप्रेतनित्य-त्वादिधर्मसमर्थनप्रवणाः शेषधर्म्मतिरस्कारेण प्रवर्त्त-माना दुर्नया इति तल्लक्षणात् इत्यनेनोल्लेखिन त्वदा-ज्ञाद्विषतां भवत्प्रणीतशासनविरोधिनां प्रलापाः प्र-लपितान्यसम्बद्धवाक्यानीति यावत् अत्र च प्रथमम।-दीपमिति परप्रसिद्ध्या नित्यपक्षोल्लेखेऽपि यदुतरत्र यथासङ्ख्यपरिहारेण पूर्वतरं नित्यमेवैकमित्युक्तं तदेव ज्ञापयति यदनित्यं तदपि नित्यमेव कथं चिद्यच्च नित्यं तदप्यनित्यमेव कथं चित्प्रक्रान्तवादिभिरप्येकस्यामेव-पृथिव्यां नित्यानित्यत्वाभ्युपगमात् तथा च प्रशस्तकारः सा तु द्विविधा नित्याऽनित्या च परमाणुलक्षणा नि-त्या कार्यलक्षणा त्वनित्येति न चात्र परमाणुद्रव्य-कार्यलक्षणविषयद्वयभेदान्नैकाधिकरणं नित्यानित्यत्व-मिति वाच्यं पृथिवीत्वस्योभयत्राप्यव्यभिचारात् एवम-बादिष्वपीति आकाशेऽपि संयोगविभागाङ्गीकारात् तैरनित्यत्वं युक्त्या प्रतिपन्नमेव तथा च स एवाह श-

इकारणत्ववचनात्संयोगविभागाविति नित्यानित्यपक्ष-योः सम्बलितत्वं एतच्च लेशतो भावित मेवेति प्रला-पप्रायत्वं च परवचनानामित्थं समर्थनीयं वस्तुनस्ता-वदर्थक्रियाकारित्वं लक्षणं तच्चैकान्तनित्यानित्यपक्षयो-र्न घटते अप्रच्युतानुत्पन्नस्थिरैकरूपो हि नित्यः स च क्रमेणार्थक्रियां कुर्वीत अक्रमेण वा अन्योन्यव्यव-च्छेदरूपाणां प्रकारान्तरासम्भवात् तत्र न तावत्क्रमेण स हि कालान्तरभाविनीः क्रियाः प्रथमक्रियाकाल एव प्रसह्य कुर्यात् समर्थस्य कालक्षेपायोगात् काल-क्षेपिणो वा ऽसामर्थ्यप्राप्तेः समर्थोऽपि तत्तत्सहकारि-समवधाने तं तमर्थं करोतीति चेन्न तर्हि तस्य साम-र्थ्यमपरसहकारि सापेक्षवृत्तित्वात् सापेक्षमसमर्थ-मिति न्याया न्न तेन सहकारिणोऽपेक्ष्यन्तेऽपि तु का-र्यमेव सहकारिष्वसत्स्वभवत् तानपेक्षते इति चेत् तत् किं स भावोऽसमर्थः समर्थो वा समर्थश्चे त्किं स-हकारिमुखप्रेक्षणादीनानि तान्यपेक्षते न पुन र्झटिति घटयति ननु समर्थमपि बीज मिलाजलानिलादिसह-कारिसहितमेवाङ्कुरं करोति नान्यथा तत् किं तस्य सहकारिभिः किञ्चिदुपक्रियेत न वा यदि नोपक्रि-येत तदा सहकारिसन्निधानात्प्रागिव किं न तदा-प्यर्थक्रियायामुदास्ते उपक्रियेत चे त्स तर्हि तैरुप-कारोऽभिन्नो भिन्नो वा क्रियत इति वाच्यम् अभेदे स एव क्रियत इति लाभमिच्छतो मूलक्षतिरायाता कृतकत्वेन तस्यानित्यत्वापत्तेः भेदे तु स कथं त-

स्योपकारः किं न सह्यविन्ध्यादेरपि तत्संबन्धात्तस्याय-मिति चेत् उपकार्योपकारयोः कः सम्बन्धो न ताव-त्संयोगो द्रव्ययो रेव तस्य भावात् अत्र तु उपकार्यं द्र-व्यं उपकार स्व क्रियेति न संयोगः नापि समवाय-स्तस्यैकत्त्वाद् व्यापकत्त्वाच्च प्रत्यासत्तिविप्रकर्षाभावे-न सर्वत्र तुल्यत्वान्न नियतैः सम्बन्धिभिः संबन्धो युक्तः नियतसंबन्धिसंबन्धे चाङ्गीक्रियमाणे तत्कृत उपका-रोऽस्य समवायस्याभ्युपगन्तव्य स्तथा च सत्युपकारके भेदाभेदकल्पना तदवस्थैव उपकारस्य समवायादभेदे समवाय एव कृतः स्यात् भेदे पुनरपि समवायस्य न नियतसम्बन्धिसंबन्धत्वं तन्नैकान्तनित्यो भावः क्रमेणा-र्थक्रियां कुरुते नाप्यक्रमेण नह्येको भावः सकलका-लकलाकलापभाविनी युगपत् सर्वाः क्रियाः करोतो-ति प्रातीतिकं कुरुतां वा तथापि द्वितीयक्षणे किं कुर्यात् करणे वा क्रमपक्षभावी दोषः अकरणे त्व-र्थक्रियाकारित्वाभावादवस्तुत्त्वप्रसङ्गः इत्येकान्तनित्या-त् क्रमाक्रमाभ्यां व्याप्तार्थक्रिया व्यापकानुलब्धिबला-द्व्यापकनिवृत्तौ निवर्तमाना स्वव्याप्यमर्थक्रियाकारित्वं निवर्तयति अर्थक्रियाकारित्वं च निवर्तमानं स्वव्या-प्यं सत्वं निवर्त्तयतीति नैकान्तनित्यपक्षो युक्तिक्षमः एकान्तानित्यपक्षोऽपि न कक्षीकरणार्हः अनित्यो हि प्रतिक्षणविनाशी स च न क्रमेणार्थक्रियासमर्थो दे-शकृतस्य कालकृतस्य च क्रमस्यैवाभावात् क्रमो हि पौर्वापर्यं तच्च क्षणिकस्यासम्भवि अवस्थितस्यैव हि

नानादेशकालव्याप्ति देशक्रमः कालक्रम श्चाभिधीयते न चैकान्तविनाशिनि सास्ति। यदाहुः

यो यत्रैव स तत्रैव यो यदैव तदैव सः।
न देशकालयो र्व्याप्ति र्भावानामिह विद्यते ॥१॥

न च सन्तानापेक्षया पूर्वोत्तरक्षणानां क्रमः सम्भवति सन्तानस्यावस्तुत्वाद्वस्तुत्त्वेऽपि तस्य यदि क्षणिकत्वं न तर्हि क्षणेभ्यः कश्चिद्विशेषः अथाक्षणिकत्त्वं तर्हि समाप्तः क्षणभङ्गवादः नाप्यक्रमेणार्थक्रिया क्षणिके सम्भवति सह्येको बीजपूरादिक्षणो युगपदनेकान् रसादिक्षणान् जनयन् एकेन स्वभावेन जनयेन्नानास्वभावै र्वा यद्येकेन तदा तेषां रसादिक्षणानामेकत्वं स्यादेकस्वभावजन्यत्वादथ नाना स्वभावै र्जनयति किञ्चिद्रूपादिकमुपादानभावेन किंचिद्रसादिकं सहकारित्वेनेति चेत् तर्हि स्वभावास्तस्या अनात्मभूता आत्मभूतो वा अनात्मभूता श्चेत् स्वभावत्त्वहानिः यद्यात्मभूतास्तर्हि तस्यानेकत्त्वं अनेकस्वभावत्वात् स्वभावानां वा एकत्त्वं प्रसज्येत तदव्यतिरिक्तत्वात्तेषां तस्य चैकत्वादथ य एव एकत्रोपादानभावः स एवान्यत्र सहकारिभाव इति न स्वभावभेद इष्यते तर्हि नित्यस्यैकरूपस्यापि क्रमेण नानाकार्यकारिणः स्वभावभेदः कार्यसांकर्यं च कथमिष्यते क्षणिकवादिना अथ नितयमेकरूपत्वादक्रमं अक्रमाच्च क्रमिणां नानाकार्याणां कथमुत्पत्तिरिति चेदहो स्वपक्षपाती देवानांप्रियो यः खलु स्वयमेकस्मान्निरंशा-

द्रूपादिक्षणात्कारणाद्युगपदनेककारणसाध्यान्यनेककार्याण्यङ्गीकुर्वाणोऽपि परपक्षे नित्येऽपि वस्तुनि क्रमेण नानाकार्यकरणेऽपि विरोधमुद्भावयति तस्मात्क्षणिकस्यापि भावस्याऽक्रमेणार्थक्रिया दुर्घटा इत्यनित्यैकान्तादक्रमाक्रमयो र्व्यापकयो र्निवृत्त्यैव व्याप्यार्थक्रियापि व्यावर्त्तते तद्व्यावृत्तौ च सत्त्वमपि व्यापकानुपलब्धिबलेनैव निवर्त्तते इत्येकान्तं नित्यवादोपि न रमणीयः स्याद्वादे तु पूर्वोत्तराकारपरिहारस्वीकारस्थितिलक्षणपरिणामेन भावानामर्थक्रियोपपत्तिरविरुद्धा नचैकत्र वस्तुनि परस्परविरुद्धधर्माध्यासायोगादसन् स्याद्वाद इति वाच्यं नित्यानित्यपक्षविलक्षणस्य पक्षान्तरस्याङ्गीक्रियमाणत्वा त्तथैव च सर्वैरनुभवात् तथा च पठन्ति ।

भागे सिंहो नरो भागे योऽर्थो भागद्वयात्मकः ।
तमभागं विभागेन नरसिंहं प्रचक्षते ॥ १ ॥ इति

वैशेषिकैरपि चित्ररूपस्यैकस्यावयविनोऽभ्युपगमादेकस्यैव पटादेश्चलाचलरक्तारक्तावृतानावृतत्त्वादिविरुद्धधर्माणामुपलब्धेः सौगतैरप्येकत्र चित्रपटीज्ञाने नीलानीलयो र्विरोधानङ्गीकारात् अत्र च यद्यप्यधिकृतवादिनः प्रदीपादिकं कालान्तरावस्थायित्त्वात् क्षणिकं न मन्यन्ते तन्मते पूर्वापरान्तावच्छिन्नायाः सत्ताया एव नित्यतालक्षणात् तथापि बुद्धिसुखादिकं तेऽपि क्षणिकतयैव प्रतिपन्ना इति तदधिकारेऽपि क्षणिकवादचर्चा नानुपपन्ना यदापि च कालाऽन्तरावस्थायि वस्तु

तदापि नित्यानित्यमेव क्षणोऽपि न खलु सोऽस्ति यत्र वस्तु उत्पादव्ययध्रौव्यात्मकं नास्तीति काव्यार्थः ।

अथ तदभिमतमीश्वरस्य जगत्कर्तृत्वाभ्युपगमं मिथ्याभिनिवेशरूपं निरूपयन्नाह ।

**कर्त्तास्ति कश्चिज्जगतः स चैकः**
**स सर्वगः स स्ववशः स नित्यः ।**
**इमाः कुहेवाकविडम्बनाः स्यु-**
**स्तेषां न येषामनुशासकस्त्वम् ॥ ६ ॥**

प्रत्यक्षादिप्रमाणोपलक्ष्यमाणचराचररूपस्य विश्वत्रयस्य कश्चिदनिर्वचनीयस्वरूपः पुरुषविशेषः कर्त्ता स्रष्टा अस्ति विद्यते ते हि इत्थं प्रमाणयन्ति उर्व्वीपर्वततर्वादिकं सर्वं बुद्धिमत्कर्तृकं कार्यत्वात् यद्यत्कार्यं तत्तत्सर्वं बुद्धिमत्कर्त्तृकं यथा घटस्तथा चेदं तस्मा त्तथा व्यतिरेके व्योमादि यश्च बुद्धिमांस्तत्कर्त्ता स भगवानीश्वर एवेति न चायमसिद्धो हेतु र्यतो भूभूधरादेः स्वस्वकारणकलापजन्यतया अवयवितया वा कार्यत्वं सर्ववादिनां प्रतीतमेव नाप्यनैकान्तिको विरुद्धो वा विपक्षादत्यन्तव्यावृत्तत्वात् नापिकालात्ययापदिष्टः प्रत्यक्षानुमानागमाबाधितधर्म्मधर्म्यनन्तरप्रतिपादितत्वा न्नापि प्रकरणसमः तत्प्रतिपन्थिधर्मोपपादनसमर्थप्रत्यनुमानाभावात् न च वाच्यमीश्वरः पृथ्वीपृथ्वीधरादे र्विधाता न भवति अशरीरत्वान्निर्वृतात्मवदिति

प्रत्यनुमानं तद्बाधकमिति यतोऽवेश्वररूपो धर्मी प्रतीतो ऽप्रतीतो वो प्ररूपितः न तावदप्रतीतो हेतोराश्रयासिद्धिप्रसङ्गात् प्रतीतश्चे त्केन प्रमाणेन स प्रतीतस्तेनैव किं स्वयमुत्पाद्दितस्वतनु नं प्रतीयते इत्यतः कथमशरीरत्वं तस्मान्निरवद्य एवायं हेतुरिति सचैक इति चः पुनरर्थे स पुनः पुरुषविशेष एको ऽद्वितीयः बहूनां हि विश्वविधातृत्वस्वीकारे परस्परविमतिसंभावनाया अनिवार्यत्वादेकैकस्य वस्तुनोऽ न्यान्यरूपतया निर्माणे सर्वमसमञ्जसमापद्येतेति तथा स सर्वग इति सर्वत्र गच्छतीति सर्वगः सर्वव्यापी तस्य हि प्रतिनियतदेशवर्त्तित्वे नियतदेशवृत्तीनां विश्वत्रयान्तर्वर्त्तिपदार्थसार्थानां यथावन्निर्माणानुपपत्तिः कुम्भकारादिषु तथा दर्शना दथ वा सर्वं गच्छति जानातीति सर्वगः सर्वज्ञः सर्वे गत्यर्थाः ज्ञानार्था इति वचनात् सर्वज्ञत्वाभावे हि यथोचितोपादानकारणाद्यनभिज्ञत्वादनुरूपकार्योत्पत्ति नं स्यात् तथा स स्ववशः स्वतन्त्रः सकलप्राणिनां स्वेच्छया सुखदुःखयोरनुभावनसमर्थत्वात् तथा चोक्तम् ।

ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ।
अन्यो* जन्तु रनीशोऽय मात्मनः सुखदुःखयोः ॥ इति

पारतन्त्र्ये तु तस्य परमुखप्रेक्षितया मुख्यकर्तृत्वव्याघातादनीश्वरत्वापत्तिः तथा स नित्य इति अप्रच्युतानुत्पन्नस्थिरैकरूप स्तस्य ह्यनित्यत्वे

---

* नुद्री इति २ पु० पाठः ।

परोत्पाद्यतया कृतकत्त्वप्राप्तिः अपेक्षितपरव्यापारो हि भावः स्वभावनिष्पत्तौ कृतक इत्युच्यते यश्चापर स्तत्कर्ता कल्प्यते स नित्योऽनित्यो वा स्या न्नित्यश्चेद्-धिकृतेश्वरेण किमपराद्धम् अनित्यश्चे त्तस्याप्युत्पादका-न्तरेण भाव्यं तस्यापि नित्यानित्यत्वकल्पनायाम् अनव-स्थादौस्थ्यमिति तदेवमेकत्त्वादिविशेषणविशिष्टो भग-वानीश्वरस्त्रिजगत्कर्त्तेति पराभ्युपगममुपदर्श्योत्तरार्द्धेन तस्य दुष्टत्त्वमाचष्टे इमा एता अनन्तरोक्ताः कुहेवाक-विडम्बनाः कुत्सिता हेवाका आग्रहविशेषाः कुहेवाकाः कदाग्रहा इत्यर्थं स्त एव विडम्बनाः विचारचातुरीबा-ह्यत्वेन तिरस्काररूपत्त्वाद्विक्षेपप्रकाराः स्यु र्भवेयु-स्तेषां प्रामाणिकापसदानां येषां हे स्वामिन् त्वं ना-नुशासको न शिक्षादाता तदभिनिवेशानां विडम्ब-नारूपत्वज्ञापनार्थमेव पराभिप्रेतपुरुषविशेषणेषु प्र-त्येकं तच्छब्दप्रयोगमसूयागर्भमाविर्भावयांचकार स्तु-तिकारः तथाचैवमेव निन्दनीयं प्रति वक्तारो वदन्ति स मूर्खः स पापीयान् स दरिद्र इत्यादि त्वमित्येक-वचनसंयुक्तयुष्मच्छब्दप्रयोगेण परमेशितुः परमकारु-णिकतया ऽनपेक्षितस्वपरपक्षविभागमद्वितीयं हितो पदेशकत्त्वं ध्वन्यते अतो ऽत्रायमाशयो यद्यपि भगवान-विशेषेण सकलजगज्जन्तुजातहितावहां सर्वेभ्य एव देशनावाचमाचष्टे तथापि सैव केषांचित् निचित-पापकर्मकलुषितात्मनां रुचिरूपतया न परिणमते अपुनर्बन्धकादिव्यतिरिक्तत्त्वेनायोग्यत्वा त्तथा च का-

दृष्टवयां वाणोऽपि बभाण "अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः गुरुवचनममलमतिसलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्ये" ति अतो वस्तुवृत्त्या न तेषां भगवाननुशासक इति न चैतावता जगद्गुरोरसामर्थ्यसम्भावना न हि कालदष्टमनुज्जीवयन् समुज्जीवितेतरदष्टको विषभिषगुपालम्भनीयोऽतिप्रसङ्गात् स हि तेषामेव दोषो न खलु निखिलभुवनाभोगमवभासयन्नपि भानवीया भानवः कौशिकलोकस्यालोकहेतुतामभजमाना उपालम्भसम्भावनास्पदं तथा च श्रीसिद्धसेनः ॥

सद्धर्मबीजवपनानघकौशलस्य यल्लोकबान्धव तवापि खिलान्यभूवन् ॥ तन्नाद्भुतं खगकुलेष्विह तामसेषु सूर्यांशवो मधुकरीचरणावदाताः ॥ १ ॥

अथ कथमिव तत्कुदेवाकानां विडम्बनारूपत्वमिति ब्रूमः यत्तावदुक्तं परैः क्षित्यादयो बुद्धिमत्कर्तृकाः कार्यत्वाद्घटवदिति तदयुक्तं व्याप्तेरग्रहणात् साधनं हि सर्वत्र व्याप्तौ प्रमाणेन सिद्धायां साध्यं गमयेदिति सर्ववादिसंवादः स चायं जगन्ति सृजन् सशरीरो ऽशरीरो वा स्यात् सशरीरोऽपि किमस्मदादिवत् दृश्यशरीरविशिष्ट उत पिशाचादिवददृश्यशरीरविशिष्टः प्रथमपक्षे प्रत्यक्षबाध स्तमन्तरेणापि च जायमाने तृणतरुपुरंदरधनुरभ्रादौ कार्यत्वस्य दर्शना त्प्रमेयत्त्वादिवत्साधारणानैकान्तिको हेतुः द्वि-

तीयविकल्पे पुनरदृश्यशरीरत्वे तस्य माहात्म्यविशेषः कारणमाहोस्विदस्मदाद्यदृष्टवैगुण्यं प्रथमप्रकारः कोशपानप्रत्यायनीयः तत्सिद्धौ प्रमाणाभावात् इतरेतराश्रयदोषापत्तेश्च सिद्धे हि माहात्म्यविशेषे तस्यादृश्यशरीरत्वं प्रत्येतव्यं तत्सिद्धौ च माहात्म्यविशेषसिद्धिरिति द्वैतीयीकस्तु प्रकारो न संचरत्येव विचारगोचरे संशयानिवृत्तेः किं तस्यासत्त्वाददृश्यशरीरत्वं वान्ध्येयादिवत् किं वास्मदाद्यदृष्टवैगुण्यात्पिशाचादिवदिति निश्चयाभावात् अशरीरत्वे तदा दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं घटादयो हि कार्यरूपाः सशरीरकर्तृका दृष्टाः अशरीरस्य च सतस्तस्य कार्यप्रवृत्तौ कुतः सामर्थ्यमाकाशादिव तस्मात्सशरीराशरीरलक्षणे पक्षद्वयेऽपि कार्यत्वहेतोर्व्याप्त्यसिद्धिः किं च त्वन्मतेन कालात्ययापदिष्टोऽप्ययं हेतुः धर्म्येकदेशस्य तरुविद्युदभ्रादेरिदानीमप्युत्पद्यमानस्य विधातुरनुपलभ्यमानत्त्वेन प्रत्यक्षबाधितधर्म्यनन्तरं हेतुभणनात् तदेवं न कश्चिज् जगतः कर्त्ता एकत्त्वादीनि तु जगत्कर्तृत्त्वव्यवस्थापनायानीयमानानि तद्विशेषणानि षण्ढं प्रति कामिन्या रूपसंपत्तिरूपणप्रायाण्येव तथापि तेषां विचारासहत्त्वख्यापनार्थं किंचिदुच्यते तत्रैकत्त्ववचस्तावत् बहूनामेककार्यकरणे वैमत्यसंभावनेति नायमेकान्तः अनेककीटिकाशतनिष्पाद्यत्वेपि शक्रमूर्द्धोऽनेकशिल्पिकल्पितत्वेऽपि प्रासादादीनां नैकसरघानिर्वर्त्तितत्वेऽपि मधुच्छत्रादीनां

चैकरूपताया अविगानेनोपलम्भात् अथैतेष्वप्येक एवेश्वरः कर्त्तेति ब्रूषे एवं चेद्भवतो भवानीपतिं प्रति निष्प्रतिभा वासना तर्हि कुविन्दकुम्भकारादितिरस्कारेण घटघटादीनामपिकर्त्ता स एव किं न कल्प्यते अथ तेषां प्रत्यक्षसिद्धं कर्त्तृत्वं कथमपन्होतुं शक्यं तर्हि कीटिकादिभिः किं तव विराद्धं यत्तेषामसदृशतादृशप्रयाससाध्यं कर्त्तृत्व मेकहेलयैवापलप्यते तस्माद्धीमत्प्रभया न्महेशितुरेकत्वकल्पना भोजनादिव्ययभयात्कृपणस्यात्यन्तवल्लभपुत्रकलत्रादिपरित्यजनेन शून्यारण्यानीसेवनमिव तथा सर्वगतत्वमपि तस्य नोपपन्नं तद्धि शरीरात्मना ज्ञानात्मना वा स्या त्प्रथमपक्षे तदीयेनैव देहेन जगत्त्रयस्य व्याप्तत्वादितरनिर्मेयपदार्थानामाश्रयानवकाशः द्वितीयपक्षे तु सिद्धसाध्यतास्माभिरपि निरतिशयज्ञानात्मना परमपुरुषस्य जगत्त्रयक्रोडीकरणाभ्युपगमात् यदि परमेवं भवत्प्रमाणीकृतेन वेदेन विरोधः तत्र हि शरीरात्मना सर्वगतत्वमुक्तं "विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतःपाणि रुतविश्वतःपादि" त्यादिश्रुतेः यच्चोक्तं तस्य प्रतिनियतदेशवर्त्तित्वे त्रिभुवनगतपदार्थानामनियतदेशवृत्तीनां यथावत्निर्माणानुपपत्तिरिति तत्रेदं पृच्छ्यते स जगत्त्रयं निर्म्मिमाणस्तक्षादिवत्साक्षाद्देहव्यापारेण निर्मिमीते यदि वा सङ्कल्पमात्रेण आद्ये पक्षे एकस्यैव भूभूधरादे र्विधाने अक्षोदीयसः कालक्षेपस्य सम्भवा द्वंहीयसा प्यनेहसा न परिसमाप्तिःद्वितीयपक्षे

तु सङ्कल्पमात्रेणैव कार्यकल्पनायां नियतदेशस्था-
यित्वेऽपि न किञ्चिद्दूषणमुत्पश्यामः नियतदेशस्था-
यिनां सामान्यदेवानामपि सङ्कल्पमात्रेणैव तत्तत्का-
र्यसम्पादनप्रतिपत्तेः किं च तस्य सर्वगतत्वेऽङ्गीक्रिय-
माणेऽशुचिषु निरन्तरसन्तमसेषु नरकादिस्थलेष्वपि
तस्य वृत्तिः प्रसज्यते तथा चानिष्टापत्तिः अथ युष्म-
त्पक्षेऽपि यदा ज्ञानात्मना सर्वजगत्त्रयं व्याप्नोतीत्युच्यते
तदा ऽशुचिरसास्वादादीनामप्युपलम्भसम्भावनान्न-
रकादिदुःखस्वरूपसम्वेदनात्मकतया दुःखानुभवप्रस-
ङ्गा च्चानिष्टापत्ति स्तुल्यैवेति चेत् तदेतदुपपत्तिभिः प्र-
तिकर्त्तुमशक्तस्य धूलिभिरिवावकरणम्। यतो ज्ञानम-
प्राप्यकारि स्वस्थलस्थमेव विषयं परिच्छिनत्ति न पुन-
स्तत्र गत्वा तत् कुतो भवदुपालम्भः समीचीनः नहि
भवतोऽप्यशुचिज्ञानमात्रेण तद्रसास्वादानुभूतिस्तद्भावे
हि स्रक्चन्दनाङ्गनारसवत्यादिचिन्तनमात्रेणैव तृप्ति-
सिद्धौ तत्प्राप्तिप्रयत्नवैफल्यप्रसक्तिरिति यत्तु ज्ञाना-
त्मना सर्वगतत्वे सिद्धसाधनं प्रागुक्तं तच्छक्तिमात्रम-
पेक्ष्य मन्तव्यं तथा च वक्तारो भवन्ति अस्य मतिः स-
र्वशास्त्रेषु प्रसरति इति न च ज्ञानं प्राप्यकारि तस्या-
त्मधर्मत्वेन बहिर्निर्गमाभावाद् बहिर्निर्गमे चात्मनो
ऽचैतन्यापत्त्या अजीवत्त्वप्रसङ्गः न हि धर्मो धर्मिणम-
तिरिच्य क्व चन केवलो विलोकितो यच्च परे दृष्टान्त-
यन्ति यथा सूर्यस्य किरणा गुणरूपा अपि सूर्यान्नि-
ष्क्रम्य भुवनं भासयन्त्येवं ज्ञानमप्यात्मनः सकाशाद्ब-

हि निर्गत्य प्रमेयं परिच्छिनत्तीति तदेतदसत्तरं किरणानां गुणत्वमसिद्धं तेषां तैजसपुद्गलमयत्वेन द्रव्यत्वात् यश्च तेषां प्रकाशात्मा गुणः स तेभ्यो न जातु पृथग् भवति इति तथा च धर्मसंग्रहिण्यां श्रीहरिभद्राचार्यपादाः ।

किरना[१] गुना न दव्वं ताण पञ्चासो गुनो न वा दव्वं ।
जं नाणं अप्पगुनो कहं अदव्वं स अन्नस्स ॥१॥
गन्तूण[२] न परिच्छिंदइ नाणं नेअं तम्मि देसम्मि ।
आहच्चं विअ णवरं अचिंतसत्ती उ विन्नेअं ॥२॥
लोहे[३] बलस्स सत्ती आहच्चं वेअ भिन्नदेसम्मि ।
लोहं आकरिसन्ती दीसइ इह कज्ज......... ॥३॥
एअं[४] इह नाणसत्ती आहच्चं वेअ हंदि लोगं तं ।
जइ परिच्छंदइ सव्वं को णु विरोहो हवइ तस्स ॥४॥

इत्यादि अथ सर्वगः सर्वज्ञ इति व्याख्यानं तत्रापि प्रतिविधीयते ननु तस्य सार्वज्ञ्यं केन प्रमाणेन गृहीतं प्रत्यक्षेण परोक्षेण वा न तावत्प्रत्यक्षेण तस्येन्द्रियार्थसंनिकर्षोत्पन्नतयातीन्द्रियग्रहणासामर्थ्यात् नापि परोक्षेण तद्धि अनुमानं शब्दो वा स्यात् न तावदनुमान-

(१) किरणा गुणा न द्रव्यं तेषां प्रकाशो गुणो न वा द्रव्यम् ।
यज्ज्ञानमात्मगुणः कथमद्रव्यं तदन्यस्य ॥ १ ॥
(२) गत्वा न परिच्छिनत्ति ज्ञानं ज्ञेयं तस्मिन्देशे ।
अत्यर्थमेव केवल मचिन्त्यशक्त्या तु विज्ञेयम् ॥ २ ॥
(३) लोहे बलस्य शक्ति भिन्नदेशे ।
लोहमाकर्षन्ती दृश्यत इहकार्य......... ॥ ३ ॥
(४) एवमिह ज्ञानशक्ति रत्यर्थमेव हन्त लोकतम् ।
यदिपरिच्छिनत्ति सर्वं को नु विरोधी भवेत्तस्य ॥ ४ ॥ इतिच्छाया ।

न्तस्य लिङ्गग्रहणलिङ्गलिङ्गिसम्बन्धस्मरणपूर्वकत्वा न्न च तस्य सर्वज्ञत्वेऽनुमेये किंचिदव्यभिचारि लिङ्गं पश्याम स्तस्यात्यन्तविप्रकृष्टत्वेन तत्प्रतिबद्धलिङ्गसम्बन्धग्रहणाभावात् अथ तस्य सर्वज्ञत्वं विना जगद्वैचित्र्यमनुपपद्यमानं सर्वज्ञत्वमर्थादापादयती ति चेत् न अविनाभावाभावान्न हि जगद्वैचित्री तत्सार्वज्ञ्यं विना न्यथा नोपपन्ना द्विविधं हि जगत् स्थावरजङ्गमभेदात् तत्र जङ्गमानां वैचित्र्यं स्वोपात्तशुभाशुभकर्मपरिपाकवशेनैव स्थावराणां तु सचेतनानामियमेव गति रचेतनानां तु तदुपभोगयोग्यतासाधनत्वेनानादिकालसिद्धमेव वैचित्र्यमिति नाप्यागम स्तत्साधकः स हि तत्कृतो ऽन्यकृतो वा स्यात् तत्कृत एव चेत् तस्य सर्वज्ञतां साधयति तदा तस्य महत्वक्षतिः स्वयमेव स्वगुणोत्कीर्तनस्य महतामनधिकृतत्वात् अन्यच्च तस्य शास्त्रकर्तृत्वमेव न युज्यते शास्त्रं हि वर्णात्मकं ते च ताल्वादिव्यापारजन्याः स च शरीर एव सम्भवी शरीराभ्युपगमे च तस्य पूर्वोक्ता एव दोषाः अन्यकृतश्चेत्सोऽन्यः सर्वज्ञोऽसर्वज्ञो वा सर्वज्ञत्वे तस्य द्वैतापत्त्या प्रागुक्तैकत्वाभ्युपगमबाध स्तत्साधकप्रमाणचर्चायामनवस्थापाताच्च असर्वज्ञश्चेत्कस्तस्य वचसि विश्वासः अपरं च भवदभीष्ट आगमः प्रत्युत तत्प्रणेतुरसर्वज्ञत्वमेव साधयति पूर्वापरविरुद्धार्थवचनोपेतत्वा त्तथा हि "न हिंस्या त्सर्वभूतानि" इति प्रथममुक्त्वा पश्चात्तत्रैव पठितम् ॥

षट्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि ।
अश्वमेधस्य वचना न्न्यूनानि पशुभि स्त्रिभिः ॥१॥

तथा "अग्नीषोमीयं पशुमालभेत" "सप्त दश प्राजापत्यान् पशूनालभेते" इत्यादिवचनानि कथमिव न पूर्वापरविरोधमनुरुध्यन्ते तथाऽनृतभाषणं प्रथमं निषिध्य "नानृतं ब्रूयादि" त्यादिनापश्चाद् "ब्राह्मणार्थे" इत्यादि ।

तथा

न नर्म युक्तं वचनं हिनस्ति न
स्त्रीषु राज न्न विवाहकाले ।
प्राणात्यये सर्वधनापहारे
पञ्चानृतान्याहु रपातकानि ॥ १ ॥

तथा अदत्तादानमनेकधा निरस्य पश्चादुक्तं यद्यपि ब्राह्मणो हठेन परकीयमादत्ते बलेन वा तथापि तस्य नादत्तादानं यतः सर्वमिदं ब्राह्मणेभ्यो दत्तं ब्राह्मणानां तु दौर्बल्याद्वृषलाः परिभुञ्जते तस्मादपहरन् ब्राह्मणः स्वमादत्ते स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददातीति "अपुत्रस्य गति र्नास्ति" इति लपित्वा ॥

अनेकानि सहस्राणि कुमारब्रह्मचारिणां ।
दिवं गतानि विप्राणा मकृत्वा कुलसन्ततिम् ॥१॥

इत्यादि कियन्तो वा दधिमाषभोजनात् कृपणा विवेच्यन्ते तदेवमागमोऽपि न तस्य सर्वज्ञतां वक्ति किं च सर्वज्ञः सन्नसौ चरा-

चरं चेद्विरचयति तदा जगदुपप्लवकरणस्वैरिणः पश्चादपिकर्तव्यनिग्रहान् सुरवैरिण एतदधिक्षेपकारिण श्चास्मदादीन् किमर्थं सृजतीति तन्नाश्वं सर्वज्ञ: तथा स्ववशत्वं स्वातन्त्र्यं तदपि तस्य न क्षोदक्षमं स हि यदि नाम स्वाधीनः सन् विश्वं विधत्ते परमकारुणिक श्च त्वया वर्ण्यते तत्कथं सुखिदुःखितायवस्थाभेदवृन्दस्थपुटितं घटयति भुवनमेकान्तशर्मसम्पत्कान्तमेव तु किं न निर्मिमीते अथ जन्मान्तरोपार्जिततत्तत्तदीयशुभाशुभकर्मप्रेरितः संस्तथा करोतीति दत्तस्तर्हि स्ववशत्वाय जलाञ्जलिः कर्मजन्ये च त्रिभुवनवैचित्र्ये ऽपि विशिष्टहेतुकविष्टपसृष्टिकल्पनायाः कष्टैकफलत्वा दस्मन्मतमेवाङ्गीकृतं प्रेक्षावता तथा चायातोऽयं घट्टकुट्यां प्रभातमिति न्यायः किं च प्राणिनां धर्माधर्मावपेक्षमाण श्चेदयं सृजति प्राप्तं तर्हि यदयमपेक्षते त न्न करोतीति न हि कुलालो दण्डादि करोति एवं कर्मापेक्ष श्चेदीश्वरो जगत्कारणं स्या त्तर्हि कर्मणीश्वरत्वमीश्वरोऽनीश्वरः स्यादिति तथा नित्यत्वमपि तस्य स्वगृह एव प्रणिगद्यमानं हृद्यं स खलु नित्यत्वेनैकरूपः सन् त्रिभुवनसर्गस्वभावोऽतत्स्वभावो वा प्रथमविधायां जगन्निर्माणात् कदा चिद पि नोपरमेत् तदुपरमे तत्स्वभावत्वहानिः एवं च सर्गक्रियाया अपर्यवसानादेकस्यापि कार्यस्य न सृष्टिः घटो हि स्वारम्भक्षणा दारभ्य परिसमाप्तेरुपान्त्यक्षणं याव न्निश्चयनयाभिप्रायेण न घटव्यपदेशमासादयति ज-

लाहरणाद्यर्थक्रियायामसाधकतमत्वात् अतत्स्वभाव-
पक्षे तु न जातु जगन्ति सृजेत्तत्स्वभावायोगा द्गगन-
वत् अपि च तस्यैकान्तनित्यस्वरूपत्वे सृष्टिवत्सं-
हारोऽपि न घटते नानारूपकार्यकरणे ऽनित्यत्वापत्तेः
स हि येनैव स्वभावेन जगन्ति सृजेत्तेनैव तानि सं-
हरेत् स्वभावान्तरेण वा तेनैव चेत् सृष्टिसंहारयो र्यौ-
गपद्यप्रसङ्गः स्वभावाभेदात् एकस्वभावा त्कारणादने-
कस्वभावकार्योत्पत्तिविरोधात् स्वभावान्तरेण चेन्नि-
त्यत्वहानिः स्वभावभेद एव हि लक्षण मनित्यता-
याः यथा पार्थिवशरीरस्याहारपरमाणुसहकृतस्य
प्रत्यहमपूर्वापूर्वोत्पादेन स्वभावभेदा दनित्यत्वं दृष्ट
श्च भवतां सृष्टिसंहारयोः शम्भौ स्वभावभेदः रजोगुणा-
त्मकतया सृष्टौ तमोगुणात्मकतया संहरणे सात्त्वि-
कतया च स्थितौ तस्य व्यापारस्वीकारादेवं चावस्था-
भेद स्तद्भेदे चावस्थावतोऽपि भेदा न्नित्यत्वक्षतिः अ-
थास्तु नित्य स्तथापि कथं सततमेव सृष्टौ न चेष्टते
इच्छावशाच्चेन्ननु ता अपीच्छाः स्वसत्तामात्रनिबन्ध-
नात्मलाभाः सदैव किं न प्रवर्तयन्तीति स एवोपा-
लम्भः तथा शम्भो रष्टगुणाधिकरणत्वे कार्यभेदानुमे-
यानां तदिच्छानामपि विषमरूपत्वहानिः केन वार्यते
किं च प्रेक्षावतां प्रवृत्तिः स्वार्थकरुणाभ्यां व्याप्ता तत
श्चायं जगत्सर्गे व्याप्रियते स्वार्था त्कारुण्या द्वा न
तावत् स्वार्था त्तस्य कृतकृत्यत्वात् न च कारुण्या त्प-
रदुःखप्रहाणेच्छा हि कारुण्यं ततः प्राक्सर्गाज्जीवा-

नानिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यं सर्गोत्तरकाले तु दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयं कारुण्येन सृष्टिः सृष्ट्या च कारुण्य मिति नास्य जगत्कर्तृत्वं कथमपि सिद्ध्यति तदेव मेवंविधदोषकलुषिते पुरुषविशेषे यस्तेषां सेवाहेवाकः स खलु केवलं बलन्मोहविडम्बनापरिपाक इति अत्र च यद्यपि मध्यवर्त्तिनो नकारस्य घण्टालालान्यायेन योजनादर्थान्तरमपि स्फुरति यथा इमाः कुहेवाकविडम्बना स्तेषां न स्यु र्येषां त्वमनुशासक इति तथा पि सोऽर्थः सहृदयै र्न हृदये धारणीयोऽन्ययोगव्यवच्छेदस्याधिकृतत्वा दिति काव्यार्थः॥

अथ चैतन्यादयो रूपादयश्च धर्मा आत्मादे र्घटादे श्च धर्मिणोऽत्यन्तं व्यतिरिक्ता अपि समवाय सम्बन्धेन संबद्धाः सन्तो धर्मधर्मिव्यपदेशमश्नुवते तन्मतं दूषयन्नाह।

# न धर्मधर्मित्वमतीवभेदे
# वृत्त्यास्ति चे न्न त्रितयं चकास्ति।
# इहेद मित्यस्ति मति श्च वृत्तौ
# न गौणभेदोऽपि च लोकबाधः॥७॥

धर्मधर्मिणोरतीवभेदे ऽतीवेत्यत्रेवशब्दो वाक्यालङ्कारे तं च प्रायो ऽतिशब्दा त्किंवृत्ते श्च प्रयुञ्जते

शाब्दिकाः यथा “ आवर्जिता किञ्चिदिव स्तनाभ्यां ” “ उद्धृत्तः क इव सुखावहः परेषा ” मित्यादि ततश्च एकान्तभिन्नत्वेऽङ्गीक्रियमाणे धर्मधर्मित्वं न स्यादस्य धर्मिण इमे धर्मा एषां च धर्माणामयमाश्रयभूतो धर्मीत्येवं सर्वप्रसिद्धो धर्मधर्मिव्यपदेशो न प्राप्नोति तयोरत्यन्तभिन्नत्वेऽपि तत्कल्पनायां पदार्थान्तरधर्माणामपि विवक्षितधर्मधर्मित्वापत्तेः एवमुक्ते सति परः प्रत्यवतिष्ठते इत्यास्तीति अयुतसिद्धानामाधार्याधारभूतानामिहप्रत्ययहेतुः संबन्धः समवायः स च समवयनात्समवाय इति द्रव्यगुणकर्मसामान्यविशेषेषु पञ्चसु पदार्थेषु वर्त्तनाद्वृत्ति रिति चाख्यायते तया वृत्त्या समवायसम्बन्धेन तयो धर्मधर्मिणो रितरेतरविनिर्लुठितत्वेऽपि धर्मधर्मिव्यपदेश इष्यते इतिनानन्तरोक्तो दोष इति अत्राचार्यः समाधत्ते चेदिति यद्येवं तव मतिः सा प्रत्यक्षप्रतिक्षिप्ता यतो न त्रितयं चकास्ति अयं धर्मी इमे चास्य धर्मा अयं चैतत्सम्बन्धनिबन्धनं समवाय इत्येतत्त्रितयं वस्तुत्रयं न चकास्ति ज्ञानविषयतया न प्रतिभासते यथा किल शिलाशकलयुगलस्य मिथोऽनुसन्धायकं रालादिद्रव्यं तस्मात् पृथक् तृतीयतया प्रतिभासते नैव मत्र समवायस्यापि प्रतिभानं किं तु द्वयोरेव धर्मधर्मिणोरिति शपथप्रत्यायनीयोऽयं समवाय इति भावार्थः किं चायं तेन वादिना एको नित्यः सर्वव्यापकोऽमूर्त्तश्च परिकल्प्यते ततो यथा

घटाश्रिताः पाकजरूपादयो धर्माः समवायसंबन्धेन समवेता स्तथा किं न पटेऽपि तस्यैकत्वनित्यत्वव्यापकत्वैः सर्वत्र तुल्यत्वात् यथाऽऽकाश एको नित्यो व्यापक अमूर्त्तश्च सन् सर्वैः सम्बन्धिभि र्युगपदविशेषेण संबध्यते तथा किं नायमपीति विनश्यदेकवस्तुसमवायाभावे च समस्तवस्तुसमवायाभावः प्रसज्यते तत्तदवच्छेदकभेदा न्नायं दोष इति चेदेव मनित्यत्वापत्तिः प्रतिवस्तुस्वभावभेदादिति अथ कथं समवायस्य न ज्ञाने प्रतिभासनं यत स्तस्येहेतिप्रत्ययः सावधानं साधनं इहप्रत्यय श्चानुभवसिद्ध एव इह तन्तुषु पट इहात्मनि ज्ञान मिह घटे रूपादय इति प्रतीतेरुपलम्भात् अस्य च प्रत्ययस्य केवलधर्मधर्म्यनालम्बनत्वादस्ति समवायाख्यं पदार्थान्तरं तद्धेतुरिति पराशङ्का मभिसन्धाय पुनराह इहेदमित्यस्ति मतिश्च वृत्ताविति इहेदमिति इहेदमिति आश्रयाश्रयिभावहेतुक इह प्रत्ययो वृत्तावप्यस्ति समवायसंबन्धेऽपि विद्यते चशब्दोऽपिशब्दार्थे स्तस्य च व्यवहितसम्बन्ध स्तथैव च व्याख्यातं इदमत्र हृदयं यथा त्वन्मते पृथिवीत्वाभिसंबन्धा त्पृथ्वी तत्र पृथिवीत्वं पृथिव्या एव स्वरूपमस्तित्वाख्यं नापरं वस्त्वन्तरं तेन स्वरूपेणैव समं योऽसावभिसम्बन्धः पृथिव्याः स एव समवाय इत्युच्यते "प्राप्तानामेव प्राप्तिः समवाय" इति वचनात् एवं समवायत्वाभिसम्बन्धा त्समवाय इत्यपि किं न कल्प्यते यत स्तस्यापि य त्समवायत्वं स्वस्वरूपं

तेन सार्द्धं संबन्धोऽस्त्ये वान्यथा निःस्वभावत्वात् शश-
विषाणवदवस्तुत्त्वमेव भवेत् ततश्च इह समवाये
समवायत्त्व मित्युल्लेखेन इहप्रत्ययः समवायेऽपि यु-
क्त्या घटत एव ततो यथा पृथिव्यां पृथिवीत्त्वं सम-
वायेन समवेतं समवायेऽपि समवायत्त्व मेवं सम-
वायान्तरेण संबन्धनीयं तदप्य परेणेत्येवं दुस्तरा
ऽनवस्था महानदी एवं समवायस्यापि सम-
वायत्त्वाभिसम्बन्धे युक्त्या उपपादिते साहसिक्य-
मालम्ब्य पुनः पूर्वपक्षवादी वदति ननु पृथिव्या-
दीनां पृथिवीत्वाभिसम्बन्धनिबन्धनं समवायो मुख्य
स्तत्र त्वतत्त्वादिप्रत्ययाभिव्यङ्ग्यस्य संगृहीतसकला-
वान्तरजातिलक्षणव्यक्तिभेदस्य सामान्यस्योद्भवादि
ह तु समवायस्यैकत्वेन व्यक्तिभेदाभावे जाते रनु-
द्भुतत्त्वाद्गौणोऽयं युष्मत्परिकल्पित इहेतिप्रत्ययसाध्यः
समवायत्वाभिसम्बन्ध स्तत्साध्य श्च समवाय इति त-
देत न्न चेतश्चमत्काकारणं यतोऽत्रापि जाति रु-
द्भवन्ती केन निरुध्येत व्यक्ते रभेदेनेति चेन्न तत्तद-
वच्छेदकवशा त्तद्भेदोपपत्तौ व्यक्तिभेदकल्पनाया दुर्नि-
वारत्त्वा दन्यो हि घटसमवायोऽन्यश्च पटसमवाय
इति व्यक्त एव समवायस्यापि व्यक्तिभेद इति त-
त्सिद्धौ सिद्ध एव जात्युद्भवस्तस्मादन्यत्रापि मुख्य
एव समवाय इहप्रत्ययस्योभयत्रापि अव्यभिचारात्
तदेत त्सकलं सपूर्वपक्षं समाधानं मनसि निधाय
सिद्धान्तवादी प्राह न गौणभेद इति गौण इति योऽ

यं भेदः स नास्ति गौणलक्षणाभावात् तल्लक्षणं चेत्थ माचक्षते।

अव्यभिचारी मुख्योऽविकलोऽसाधारणोऽन्तरङ्गश्च।
विपरीतो गौणोऽर्थः सति मुख्ये धीः कथं गौणे॥

तस्माद्धर्मधर्मिणोः सम्बन्धने मुख्यः समवायः समवाये च समवायत्वाभिसम्बन्धे गौण इत्ययं भेदो नानात्वं नास्तीति भावार्थः किं च योऽयमिह तन्तुषु पट इत्यादिप्रत्यया त्समवायसाधनमनोरथः स खल्वनुहरते नपुंसकादपत्यप्रसवमनोरथम् इह तन्तुषु पट इत्यादे र्व्यवहारस्यालौकिकत्त्वा त्पांशुलपादानामपि इह पटे तन्तुः इत्येवं प्रतीतिदर्शनात् इह भूतले घटाभाव इत्यत्रापि समवायप्रसङ्गादत एवाह अपि च लोकबाध इत्यपिचेतिदूषणाभ्युदये लोकः प्रामाणिकलोकः सामान्यलोक श्च तेन बाधो विरोधो लोकबाध स्तदप्रतीतव्यवहारसाधनात् बाधशब्दस्य "ईहाद्याः प्रत्ययभेदत" इति पुंस्त्रीलिङ्गता तस्मा द्धर्मधर्मिणो रविष्वग्भावलक्षण एव सम्बन्धः प्रतिपत्तव्यो नान्यः समवायादि रितिकाव्यार्थः॥

अथ सत्ताभिधानं पदार्थान्तर मात्मन श्च व्यतिरिक्तं ज्ञानाख्यं गुण मात्मविशेषगुणोच्छेदस्वरूपां च मुक्तिमज्ञानादङ्गीकृतवतः परानुपहस न्नाह।

**सता मपि स्यात् क्वचिदेवसत्ता**
**चैतन्यमौपाधिक मात्मनोऽन्यत्।**

**न संविदानन्दमयी च मुक्तिः**
**सुसूत्रमासूत्रितमत्वदीयैः ॥ ८ ॥**

वैशेषिकाणां द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षट्पदार्थाः तत्त्वतयाऽभिप्रेता स्तत्र पृथिवी आप स्तेजो वायु राकाशः कालो दिग् आत्मा मन इति नव द्रव्याणि गुणा श्चतुर्विंशति स्तद्यथा रूपरसगन्धस्पर्शसंख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धिः सुखदुःखे इच्छाद्वेषौ प्रयत्न श्चेति सूत्रोक्ताः सप्तदश चशब्दसमुच्चिताश्च सप्त द्रवत्वं गुरुत्वं संस्कारः स्नेहो धर्माधर्मौ शब्दश्चेत्येवं चतुर्विंशति गुणाः संस्कारस्य वेगभावनास्थितिस्थापकभेदा त्त्रैविध्येऽपि संस्कारत्वजात्यपेक्षया एकत्वा च्छौर्यौदार्यादीनां चात्रैवान्तर्भावा न्नाधिक्यं कर्माणि पञ्च तद्यथा उत्क्षेपण मवक्षेपण माकुञ्चनं प्रसारणं गमनं गमनग्रहणाद् भ्रमणरेचनस्यन्दनाद्यविरोधः अत्यन्तव्यावृत्तानां पिण्डानां यतः कारणादन्योन्यस्वरूपानुगमः प्रतीयते तदनुवृत्तिप्रत्ययहेतुः सामान्यं तच्च द्विविधं परम परं च तत्र परं सत्ता भावो महासामान्य मितिचोच्यते द्रव्यत्वाद्यवान्तरसामान्यापेक्षया महाविषयत्वात् अपरसामान्यं च द्रव्यत्वादि एतच्च सामान्यविशेष इत्यपि व्यपदिश्यते तथा हि द्रव्यत्वं नवसु द्रव्येषु वर्तमानत्वा त्सामान्यं गुणकर्मभ्यो व्यावृत्तत्वा द्विशेषः ततः कर्मधारये सामान्यविशेष इति एवं द्रव्यत्वापे-

क्षया पृथिवीत्वादिकमपरं तदपेक्षया घटत्वादिकम् एवं चतुर्विंशतौ गुणेषु वृत्ते र्गुणत्वं सामान्यं द्रव्यकर्मभ्यो व्यावृत्तेश्च विशेषः एवं गुणत्वापेक्षया रूपत्वादिकं तदपेक्षया नीलत्वादिकम् एवं पञ्चसु कर्मसु वर्त्तना त्कर्मत्वं सामान्यं द्रव्यगुणेभ्यो व्यावृत्तत्वाद्विशेषः एवं कर्मत्वापेक्षया उत्क्षेपणत्वादिकं ज्ञेयं तत्र सत्ता द्रव्यगुणकर्मभ्योऽर्थान्तरं कया युक्त्येति चेत् उच्यते न द्रव्यं सत्ता द्रव्यादन्येत्यर्थः एकद्रव्यवत्त्वात् एकैकस्मिन् द्रव्ये वर्तमानत्वादित्यर्थः द्रव्यत्ववत् यथा द्रव्यत्वं नवसु द्रव्येषु प्रत्येकं वर्तमानं द्रव्यं न भवति किं तु सामान्यविशेषलक्षणं द्रव्यत्वमेव एवं सत्तापि वैशेषिकाणां हि अद्रव्यं वा द्रव्यम् अनेकद्रव्यं वा द्रव्यं तत्राद्रव्यमाकाशः कालो दिग् आत्मा मनः परमाणवः अनेकद्रव्यं तु द्व्यणुकादिस्कन्धः एकद्रव्यं तु द्रव्यमेव न भवति एकद्रव्यवती च सत्ता इति द्रव्यलक्षणविलक्षणत्वा न्न द्रव्यं एवं न गुणः सत्ता गुणेषु भावाद् गुणत्ववत् यदि हि सत्ता गुणः स्यान्न तर्हि गुणेषु वर्त्तेत निर्गुणत्वाद् गुणानां वर्त्तते च गुणेषु सत्ता सन् गुण इति प्रतीतेः तथा न सत्ता कर्म कर्मसु भावात् कर्मत्ववत् यदि च सत्ता कर्म स्या न्न तर्हि कर्मसु वर्तेत निष्कर्मत्वात् कर्मणां वर्त्तते च कर्मसु सत्ता सत् कर्मेति प्रतीतेः तस्मात् पदार्थान्तरं सत्ता तथा विशेषा नित्यद्रव्यवृत्तयोऽन्त्या अत्यन्तव्यावृत्तिहेतवस्ते द्रव्यादिवैलक्षण्यात् पदार्थान्तरं तथा

च प्रशस्तकार: अन्तेषु भवा अन्त्या: स्वाश्रयविशेषकत्वाद्विशेषा: विनाशारम्भरहितेषु नित्यद्रव्येष्वणवाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमाना अत्यन्तव्यावृत्तिबुद्धिहेतव: यथा अस्मदादीनां गवादिष्वश्वादिभ्यस्तुल्याकृतिगुणक्रियावयवोपचयावयवविशेषसंयोगनिमित्ता प्रत्ययव्यावृत्ति दृष्टा गौ: शुक्ल: शीघ्रगति: पीन: ककुद्मान् महाघण्ट इति तथास्मद्विशिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममन:सु चान्यनिमित्तासंभवात् येभ्यो निमित्तेभ्य: प्रत्याधारं विलक्षणोऽयं विलक्षणोऽयमितिप्रत्ययव्यावृत्ति देशकालविप्रकृष्टे च परमाणौ स एवायमिति प्रत्यभिज्ञानं च भवति तेऽन्त्या विशेषा इति अमी च विशेषरूपा एव न तु द्रव्यत्वादिव त्सामान्यविशेषोभयरूपा व्यावृत्तेरेव हेतुत्वात् तथा अयुतसिद्धानामाधार्याधारभूतानामिहप्रत्ययहेतु: संबन्ध: समवाय इति अयुतसिद्धयो: परस्परपरिहारेण पृथगाश्रयानाश्रितयोराश्रयाश्रयिभाव इह तन्तुषु पट इत्यादे: प्रत्ययस्यासाधारणं कारणं समवायो यद्वशात् स्वकारणसामर्थ्यादुपजायमानं पटाद्याधार्यं तन्त्वाद्याधारे सम्बध्यते यथा छिदिक्रिया छेद्येनेति सोऽपि द्रव्यादिलक्षणवैधर्म्यात् पदार्थान्तरमिति षट्पदार्था: सांप्रतमक्षरार्थो व्याक्रियते सतामपीत्यादि सतामपि सद्बुद्धिवेद्यतया साधारणानामपि षण्णां पदार्थानां मध्ये क्वचिदेव केषु चिदेव पदार्थेषु स-

त्तासामान्ययोगः स्याद्भवेत् न सर्वेषु तेषामेषा वाचोयुक्तिः सदिति यतो द्रव्यगुणकर्मसु सा सत्ता इति वचनात् यत्रैव सत्प्रत्ययस्तत्रैव सत्ता सत्प्रत्ययश्च द्रव्यगुणकर्मस्वेवातस्तेष्वेव सत्तायोगः सामान्यादिपदार्थत्रये तु न तदभावात् इदमुक्तं भवति यद्यपि वस्तुस्वरूपमस्तित्वं सामान्यादित्रयेऽपि विद्यते तथापि तदनुवृत्तिप्रत्ययहेतु न भवति य एव चानुवृत्तिप्रत्ययः स एव सदितिप्रत्यय इति तदभावान्न सत्तायोगस्तत्र द्रव्यादीनां पुनस्त्रयाणां षट्पदार्थसाधारणं वस्तुस्वरूपमस्तित्वमपि विद्यते आनुवृत्तिप्रत्ययहेतुः सत्तासम्बन्धोऽप्यस्ति निःस्वरूपे शशविषाणादौ सत्तायाः समवायाभावात् सामान्यादित्रिके कथं नानुवृत्तिप्रत्यय इति चेत् बाधकसद्भावादिति ब्रूमः तथा हि सत्तायामपि सत्तायोगाङ्गीकारेऽनवस्था विशेषेषु पुनस्तदभ्युपगमे व्यावृत्तिहेतुत्वलक्षणतत्स्वरूपहानिः समवाये तत्कल्पनायां सम्बन्धाभावः केन हि सम्बन्धेन तत्र सत्ता सम्बध्यते समवायान्तराभावात् तथा च प्रामाणिकप्रकाण्डमुदयनः।

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः॥ इति

ततः स्थितमेतत्सतामपि स्यात् क्वचिदेव सत्तेति तथाचैतन्यमित्यादि चैतन्यं ज्ञानमात्मनः क्षेत्रज्ञादन्यदत्यन्तव्यतिरिक्तम् असमासकरणादत्यन्तमिति लभ्यते अत्यन्तभेदे सति कथमात्मनः सम्बन्धि ज्ञानमिति

व्यपदेश इतिपराशङ्कापरिहारार्थम् औपाधिकमिति विशेषणद्वारेण हेत्वभिधानम् उपाधेरागतम् औपाधिकं समवायसम्बन्धलक्षणेनोपाधिना आत्मनि समवेत-मात्मनः स्वयं जडरूपत्वात् समवायसंबन्धोपढौकित-मिति यावद् यद्यात्मनो ज्ञानादव्यतिरिक्तत्वमिष्यते तदा दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरा-पाये तदनन्तराभावाद्बुध्यादीनां नवानामात्मविशेष-गुणानामुच्छेदावसरे आत्मनोऽप्युच्छेदः स्यात् तदव्य-तिरिक्तत्वादतो भिन्नमेवात्मनो ज्ञानं यौक्तिकमिति तथा न संविदित्यादिमुक्ति र्मोक्षो न संविदानन्दमयी न ज्ञानसुखरूपा संविद् ज्ञानम् आनन्दः सौख्यं ततो द्वन्द्वः संविदानन्दौ प्रकृतौ यस्यां सा संविदानन्दमयी तादृशी न भवति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म-संस्काररूपाणां नवानामात्मनो वैशेषिकगुणानाम-त्यन्तोच्छेदो मोक्ष इति वचनाच्चशब्दः पूर्वोक्ताभ्युप-गमद्वयसमुच्चये ज्ञानं हि क्षणिकत्त्वादनित्यं सुखं च सप्रक्षयतया सातिशयतया च न विशिष्यते संसारा-वस्थात इति तदुच्छेदे आत्मस्वरूपेणावस्थानं मोक्ष इति प्रयोगश्चात्र नवानामात्मविशेषगुणानां सन्ता-नोऽत्यन्तमुच्छिद्यते संतानत्त्वादयोय: सन्तानः स सोऽ-त्यन्तमुच्छिद्यते यथा प्रदीपसन्तानस्तथा चायं तस्माद-त्यन्तमुच्छिद्यते इति तदुच्छेद एव महोदयो न कृत्स्न-कर्मक्षयलक्षण इति "न हि वै सशरीरस्य प्रियाप्रिययो रपहतिरस्ति अशरीरं वा वसन्तं प्रियाप्रिये न स्पृ-

शत" इत्यादयोऽपि वेदान्तास्तादृशीमेव मुक्तिमादिशन्ति अत्र हि प्रियाप्रिये सुखदुःखे ते चाशरीरं मुक्तं न स्पृशतः अपि च

यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः।
तावदात्यन्तिकी दुःखव्यावृत्ति र्न विकल्पते ॥१॥
धर्माधर्मनिमित्तो हि संभवः सुखदुखःयोः।
मूलभूतौ च तावेव स्तम्भौ संसारसद्मनः॥ २ ॥
तदुच्छेदे च तत्कार्यशरीराद्यनुपप्लवात्।
नात्मनः सुखदुःखे स्त इत्यसौ मुक्त उच्यते ॥३॥
इच्छाद्वेषप्रयत्नादि भोगायतनबन्धनम्।
उच्छिन्नभोगायतनो नात्मा तैरपि युज्यते ॥४॥
तदेवं धिषणादीनां नवानामपि मूलतः।
गुणानामात्मनो ध्वंसः सोऽपवर्गः प्रतिष्ठितः ॥५॥
ननु तस्यामवस्थायां कीदृगात्माऽवशिष्यते।
स्वरूपैकप्रतिष्ठानः परित्यक्तोऽखिलै र्गुणैः ॥६॥
ऊर्मिषट्कातिगं रूपं तदस्याहु र्मनीषिणः।
संसारबन्धनाधीनदुःखक्लेशाद्यदूषितम् ॥७॥

कामक्रोधलोभगर्वदम्भहर्षाः ऊर्मिषट्कमिति तदेतदभ्युपगमनयमित्थं समर्थयद्भिस्त्वदीयैस्त्वदाज्ञाबहिर्भूतैः कणादमतानुगामिभिः सुसूत्रमासूत्रितं सम्यगागमः प्रपञ्चितः अथ वा सुसूत्रमिति क्रियाविशेषणं शोभनं सूत्रं वस्तुव्यवस्थाघटनाविज्ञानं यत्रैवमासूत्रितं तत्तच्छास्त्रार्थोपनिबन्धः कृत इति हृदयं "सूत्रं तु सूचनाकारि ग्रन्थे तन्तुव्यवस्थयो रि"त्यनेका-

र्थवचनात् अत्र सुसूत्रमिति विपरीतलक्षणयोपहासगर्भं प्रशंसावचनं यथा "उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता चिर मि"त्यादि उपहसनीयता च युक्तिरिक्तत्वात् तदङ्गीकरणं तथा हि अविशेषेण सद्बुद्धिवेद्येष्वपि सर्वपदार्थेषु द्रव्यादिष्वेव त्रिषु सत्तासंबन्धः स्वीक्रियते न सामान्यादित्रये इति अर्द्धजरतीयं पश्यतोहरता यतः परिभाव्यतां सत्ताशब्दस्य शब्दार्थः अस्तीति सन् सतो भावः सत्ता अस्तित्वं तद्वस्तुस्वरूपं निर्विशेषमशेषेष्वपि पदार्थेषु त्वयाप्युक्तं तत्किमिद मर्द्धजरतीयं यद्द्रव्यादित्रय एव सत्तायोगो नेतरत्रये इति अनुवृत्तिप्रत्ययाभावान्नसामान्यादित्रये सत्तायोग इति चेत् न तत्राप्यनुवृत्तिप्रत्ययस्यानिवार्यत्वात् पृथिवीत्वगोत्वघटत्वादिसामान्येषु सामान्यं सामान्यमिति विशेषेष्वपि बहुत्वादयमपि विशेषो ऽयमपि विशेष इति समवाये च प्रागुक्तयुक्त्या तत्तदवच्छेदकभेदादेकाकारप्रतीतेरनुभवात् स्वरूपतुसाधर्म्येण सत्ताध्यारोपात् सामान्यादिष्वपि सत्सदित्यनुगम इति चेत्तर्हि मिथ्याप्रत्ययोऽयमापद्यते अथ भिन्नस्वभावेष्वेकानुगमो मिथ्यैवेति चेत् द्रव्यादिष्वपि सत्ताध्यारोपकृत एवास्तु प्रत्ययानुगमः असति मुख्येऽध्यारोपस्यासम्भवाद्द्रव्यादिषु मुख्योऽयमनुगतः प्रत्ययः सामान्यादिषु तु गौण इति चेन्न विपर्ययस्यापि शक्यकल्पनत्वात् सामान्यादिषु बाधकसम्भवान्न मुख्योऽनुगतः प्रत्ययो द्रव्यादिषु तु तद-

भावा न्मुख्य इति चे न्ननु किमिदं बाधकम् अथ सामान्येऽपि सत्ताभ्युपगमे ऽनवस्था विशेषेषु पुनः सामान्यसद्भावे स्वरूपहानिः समवायेऽपि सत्ताकल्पने तद्वृत्त्यर्थं सम्बन्धान्तराभाव इति बाधकानीति चेन्न सामान्येऽपि सत्ताकल्पने यद्यनवस्था तर्हि कथं न सा द्रव्यादिषु तेषामपि स्वरूपसत्तायाः प्रागेव विद्यमानत्वात् विशेषेषु पुनः सत्ताभ्युपगमेऽपि न रूपहानिः स्वरूपस्य प्रत्युतोत्तेजनात् निःसामान्यस्य विशेषस्य क्वचिदप्यनुपलम्भात् समवायेऽपि समवायत्वलक्षणायाः स्वरूपसत्तायाः स्वीकारे उपपद्यत एवाविष्वग्भावात्मकः सम्बन्धो ऽन्यथा तस्य स्वरूपाभावप्रसङ्ग इति बाधकाभावात् तेष्वपि द्रव्यवन्मुख्य एव सत्तासम्बन्ध इति व्यर्थं द्रव्यगुणकर्मस्वेव सत्ताकल्पनं किं च तैर्वादिभि र्यो द्रव्यादित्रये मुख्यः सत्तासम्बन्धः कक्षीकृतः सोऽपि विचार्यमाणो विशीर्येत तथा हि यदि द्रव्यादिभ्यो ऽत्यन्तविलक्षणा सत्ता तदा द्रव्यादीन्यसद्रूपाण्येव स्युः सत्तायोगात्सत्त्वमस्त्येवेति चेदसतां सत्ता योगेऽपि कुतः सत्त्वं सतां तु निष्फलः सत्तायोगः स्वरूपसत्त्वं भावानामस्त्येवेति चे त्तर्हि किं शिखण्डिता सत्तायोगेन सत्तायोगात्प्राग् भावो न सन् नाप्यसन् सत्तायोगात्तु सन्निति चे द्वाङ्मात्रमेतत् सदसद्विलक्षणस्य प्रकारान्तरस्यासम्भवात् तस्मात् सतामपि स्यात्क्वचिदेव सत्तेति तेषां वचनं विदुषां परिषदि कथमिव नोपहासाय जायते ज्ञानमपि यद्येकान्तेना-

त्मनः सकाशाद्भिन्नमिष्यते तदा तेन चैत्रज्ञानेन मैत्रस्येव नैव विषयपरिच्छेदः स्यादात्मनः अथ यत्रैवात्मनि समवायसम्बन्धेन समवेतं ज्ञानं तत्रैव भावावभासं करोतीति चेन्न समवायस्यैकत्वा न्नित्यत्वा द्व्यापकत्वाच्च सर्वत्र वृत्तेरविशेषात्समवायवदात्मनामपि व्यापकत्वादेकज्ञानेन सर्वेषां विषयावबोधप्रसङ्गः यथा च घटे रूपादयः समवायसंबन्धेन समवेतास्तद्विनाशे च तदाश्रयस्य घटस्यापि विनाश एवं ज्ञानमप्यात्मनि समवेतं तच्च क्षणिकं ततस्तद्विनाशे आत्मनोऽपि विनाशापत्तेरनित्यत्वापत्तिः अथास्तु समवायेन ज्ञानात्मनोः सम्बन्धः किं तु स एव समवायः केन तयोः संबध्यते समवायान्तरेण चेदनवस्था स्वेनैव च त्किं न ज्ञानात्मनोरपि तथा अथ यथा प्रदीपस्वाभाव्यादात्मानं परं च प्रकाशयति तथा समवायस्येदृगेव स्वभावो यदात्मानं ज्ञानात्मानौ च सम्बन्धयतीति चेत् ज्ञानात्मनोरपि किं न तथास्वभावता येन स्वयमेवेतौ संबध्येते किं च प्रदीपदृष्टान्तोऽपि भवत्पक्षे न जाघटीति यः प्रदीपस्तावद्द्रव्यं प्रकाशश्च तस्य धर्मो धर्मधर्मिणोश्च त्वयात्यन्तं भेदोऽभ्युपगम्यते तत्कथं प्रदीपस्य प्रकाशात्मकता तदभावे च स्वपरप्रकाशकस्वभावताभणितिर्निर्मूलैव यदि च प्रदीपात्प्रकाशस्यात्यन्तभेदेऽपि प्रदीपस्य स्वपरप्रकाशकत्वमिष्यते तदा घटादीनामपि तदनुषज्यते भेदाविशेषादपि च तौ स्वपरसम्बन्धस्वभावौ समवाया-

द्भिन्नौ स्यातामभिन्नौ वा यदि भिन्नौ ततस्तस्यैतौ स्वभावाविति कथं सम्बन्धः सम्बन्धनिबन्धनस्य समवायान्तरस्यानवस्थाभयादनभ्युपगमात् अथाभिन्नौ ततः समवायमात्रमेव न तौ तदव्यतिरिक्तत्वात्तत्स्वरूपवदिति किं च यथा इह समवायिषु समवाय इति मितिः समवायं विनाप्युपपन्ना तथा इहात्मनि ज्ञानमित्ययमपि प्रत्ययस्तं विनैव चेदुच्यते तदा को दोषः अथात्मा कर्ता ज्ञानं करणं कर्तृकरणयोश्च वर्द्धकिवासीवद्भेद एव प्रतीतस्तत्कथं ज्ञानात्मनोरभेद इति तन्न दृष्टान्तस्य वैषम्यात् वासी हि बाह्यं करणं ज्ञानं चाभ्यन्तरं तत्कथमनयोः साधर्म्यं नचैवं करणस्य द्वैविध्यमप्रसिद्धं यदाहु लाक्षणिकाः।

करणं द्विविधं ज्ञेयं बाह्यमाभ्यन्तरं बुधैः।
यथा लुनाति दात्रेण मेरुं गच्छति चेतसा ॥१॥

यदि हि किंचित्करणमान्तरमेकान्तेन भिन्नमुपदर्श्यते ततः स्यात् दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यं न च तथाविधमस्ति न च बाह्यकरणगतो धर्मः सर्वोऽप्यान्तरे योजयितुं शक्यते अन्यथा दीपेन चक्षुषा देवदत्तः पश्यतीत्यत्रापि दीपादिवच्चक्षुषोऽप्येकान्तेन देवदत्तस्य भेदः स्यात् तथा च सति लोकप्रतीतिविरोध इति अपिच साध्यविकलोऽपि वासीवर्द्धकिदृष्टान्तस्तथा हि नायं वर्द्धकिः काष्ठमिदमनया वास्या घटयिष्य इत्येवं वासिग्रहणपरिणामेनापरिणतः सन् तामगृहीत्वा घटयति किं तु तथा परिणतस्तां गृहीत्वा

तथा परिणामेन वासिरपि तस्य काष्ठस्य घटने व्याप्रियते पुरुषोऽपीत्येवं लक्षणैकार्थसाधकत्त्वाद्वासिवर्द्धक्योरभेऽदोप्युपपद्यते तत्कथमनयो र्भेद एवेत्युच्यते एवमात्मापि विवक्षितमर्थमनेन ज्ञानेन ज्ञास्यामीति ज्ञानग्रहणपरिणामवान् ज्ञानं गृहीत्वार्थं व्यवस्यति ततश्च ज्ञान.त्मनोरुभयोरपि संवित्तिलक्षणैककार्यसाधकत्त्वादभेद एव एवं कर्तृकरणयोरभेदे सिद्धे संवित्तिलक्षणं कार्यं किमात्मनि व्यवस्थितं आहोस्विद्विषय इति वाच्यम् आत्मनि चेत् सिद्धं नः समीहितं विषये चेत्कथमात्मनोऽनुभवः प्रतीयते अथ विषयस्थितसंवित्तेः सकाशादात्मनोऽनुभवस्तर्हि किं न पुरुषान्तरस्यापि तद्भेदाविशेषात् अथ ज्ञानात्मनोरभेदपक्षे कथं कर्तृकरणभाव इति चेत् ननु यथा सर्प आत्मानमात्मना वेष्टयतीत्यत्र अभेदे यथा कर्तृकरणभावस्तथात्रापि अथ परिकल्पितोऽयं कर्तृकरणभाव इति चेत् वेष्टनावस्थायां प्रागवस्थाविलक्षणगतिनिरोधलक्षणार्थक्रियादर्शनात् कथं परिकल्पितत्त्वं न हि परिकल्पनाशतैरपि शैलस्तम्भ आत्मानमात्मना वेष्टयतीति वक्तुं शक्यं तस्मादभेदेऽपि कर्तृकरणभावः सिद्ध एव किं च चैतन्यमितिशब्दस्यार्थ इति चिन्त्यतामन्वर्थश्चेत्न चेतनस्य भावश्चैतन्यं चेतनश्चात्मा त्वयापि कीर्त्यते तस्य भावः स्वरूपं चैतन्यं यच्च यस्य स्वरूपं न तत्ततो भिन्नं भवितुमर्हति यथा वृक्षाद् वृक्षस्वरूपम् अथास्ति चेतन आत्मा परं चेतना समवा-

यसम्बन्धान्न स्वतस्तथाप्रतीतेरिति चेत् तदयुक्तं यतः प्रतीतिश्चेत्प्रमाणीक्रियते तर्हि निर्बाधमुपयोगात्मक एवात्मा प्रसिद्धाति न हि जातु चित्स्वयमचेतनोऽहं चेतनायोगाच्चेतनो ऽचेतने वा मपि चेतनायाः समवाय इति प्रतीतिरस्ति ज्ञाताहमिति समानाधिकरणतया प्रतीतेः भेदे तथाप्रतीतिरिति चेन्न कथं चित्तादात्म्याभावे सामानाधिकरण्यप्रतीतेरदर्शनात् यष्टिः पुरुष इत्यादिप्रतीतिस्तु भेदे सत्युपचारात् दृष्टा न पुनस्तात्त्विकी उपचारस्य तु बीजं पुरुषस्य यष्टिगतस्तब्धत्वादिगुणैरभेदः उपचारस्य मुख्यार्थस्पर्शित्वात्तथा चात्मनि ज्ञाताहमितिप्रतीतिः कथं चिच्चेतनात्मतां गमयति तामन्तरेण ज्ञाताहमितिप्रतीतेरनुपपद्यमानत्वाद् घटादिवत् न हि घटादिरचेतनात्मको ज्ञाताहमिति प्रत्येति चैतन्ययोगाभावादसौ न तथा प्रत्येतीति चेन्न अचेतनस्यापि चैतन्ययोगाच्चेतनोऽहमिति प्रतिपत्तेरनन्तरमेव निरस्तत्त्वादिति चेतनत्वं सिद्धमात्मनो जडस्यार्थपरिच्छेदं पराकरोति तं पुनरिच्छता चैतन्यस्वरूपतास्य स्वीकरणीया ननु ज्ञानवानहमितिप्रत्ययादात्मज्ञानयो भेदो ऽन्यथा धनवानितिप्रत्ययादपि धनधनवतो भेदाभावानुषङ्गात् तदसत् यतो ज्ञानवानहमिति नात्मा भवन्मते प्रत्येति जडत्वैकान्तरूपत्वाद् घटवत् सर्वथा जडश्च स्यादात्मा ज्ञानवानहमितिप्रत्ययश्च स्यादस्य विरोधाभावादिति मानिर्णीत-

स्य तथोत्पत्त्यसम्भवात् ज्ञानवानहमिति हि प्रत्ययो नागृहीतज्ञानाख्ये विशेषणे विशेष्ये चात्मनि जातूत्पद्यते स्वमतविरोधात् "नागृहीतविशेषणा विशेष्ये बुद्धिरि"ति वचनात् गृहीतयोस्तयोरुत्पद्यत इति चेत्कुतस्तत्गृहीति न तावत्स्वतः स्वयंवेदनानभ्युपगमात् स्वयंविदिते ह्यात्मनि ज्ञाने च स्वतः सा युज्यते नान्यथा सन्तानान्तरवत् परतश्चेत्तदपिज्ञानान्तरं विशिष्टं नागृहीते ज्ञानत्वविशेषणे ग्रहीतुं शक्यं गृहीते हि घटत्वे घटग्रहणमिति ज्ञानान्तरात्तद्ग्रहणेन भाव्यमित्यनवस्थानात् कुतः प्रकृतप्रत्ययः तदेवं नात्मनो जडस्वरूपता संगच्छते तदसङ्गतौ च चैतन्यमौपाधिकमात्मनोऽन्यदिति वाङ्मात्रं तथा यदपि न संविदानन्दमयी च मुक्तिरिति व्यवस्थापनायानुमानमवादि सन्तानत्वादिति तत्राभिधीयते ननु किमिदं सन्तानत्वं स्वतन्त्रमपरापरपदार्थोत्पत्तिमात्रं वा एकाश्रया परापरोत्पत्ति र्वा तत्राद्यः पक्षः सव्यभिचारः अपरापरेषामुत्पादकानां घटपटकटादीनां सन्तानत्वेऽप्यत्यन्तमनुच्छिद्यमानत्वादथ द्वितीयपक्षस्तर्हि तादृशं सन्तानत्वं प्रदीपे नास्तीति साधनविकलो दृष्टान्तः परमाणुपाकजरूपादिभिश्च व्यभिचारी हेतुस्तथाविधसन्तानत्वस्य तत्र सद्भावेऽप्यत्यन्तोच्छेदाभावादपि च सन्तानत्वमपि भविष्यति अत्यन्तानुच्छेदश्च भविष्यति विपर्ययबाधकप्रमाणाभावादिति संदिग्धविपक्षव्यावृत्तिकत्वादप्यनैकान्ति-

कोऽयं किं च स्याद्वादवादिनां नास्ति क्वचिदत्यन्तमुच्छेदो द्रव्यरूपतया स्यात्नूनामेव सतां भावानामुत्पादव्यययुक्तत्वादिति विरुद्धश्चेति नाधिकृतानुमानाद्बुध्यादिगुणोच्छेदरूपासिद्धिः सिध्यति नापि "न हि वै सशरीरस्ये" त्यादेरागमात् स हि शुभाशुभादृष्टपरिपाकजन्ये सांसारिकप्रियाप्रिये परस्परानुषक्ते अपेक्ष्य व्यवस्थितः मुक्तिदशायां तु सकलादृष्टक्षयहेतुकमैकान्तिकमात्यन्तिकं च केवलं प्रियमेव तत्कथं प्रतिषिध्यते आगमस्य चायमर्थः सशरीरस्य गतिचतुष्टयान्यतमस्थानवर्तिनः आत्मनः प्रियाप्रिययोः परस्परानुषक्तयोः सुखदुःखयोरपहतिरभावो नास्तीति अवश्यं हि तत्र सुखदुःखाभ्यां भाव्यं परस्परानुषक्तत्वं च समासकरणाद्व्यज्यते अशरीरं मुक्तात्मानं वाशब्दस्यैवकारार्थत्वादशरीरमेव सन्तं सिद्धिक्षेत्रमध्यासीनं प्रियाप्रिये परस्परानुषक्ते सुखदुःखे न स्पृशत इदमत्र हृदयं यथा किल संसारिणः सुखदुःखे परस्परानुषक्ते स्यातां न तथा मुक्तात्मनः किं तु केवलं सुखमेव दुःखमूलस्य शरीरस्यैवाभावात् सुखं त्वात्मस्वरूपत्वादवस्थितमेव स्वस्वरूपावस्थानं हि मोक्षः अत एवाशरीरमित्युक्तं आगमार्थश्चायमित्थमेव समर्थनीयो यत एतदर्थानुपातिन्येव स्मृतिरपि दृश्यते ।

सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम् ।
तं वै मोक्षं विजानीयादुष्प्रापमकृतात्मभिः ॥

न चायं सुखशब्दो दुःखाभावमात्रे वर्तते मुख्य-

सुखवाच्यतायां बाधकाभावात् अयं रोगाद्विप्रमुक्तः सुखी जात इत्यादिवाक्येषु च सुखीतिप्रयोगस्य पौनरुक्त्यप्रसङ्गाच्च दुःखाभावमात्रस्य रोगाद्विप्रयुक्त इतीयतैवगतत्वान्न च भवदुदीरितो मोक्षः पुंसामुपादेयतया संमतः को हि नाम शिलाकल्पमपगतसकलसुखसंवेदनमात्मानमुपपादयितुं यतेत दुःखसंवेदनरूपत्वादस्य सुखदुःखयोरेकस्याभावे ऽपरस्यावश्यभावात् अत एव त्वदुपहासः श्रूयते ।

वरं वृन्दावने रम्ये क्रोष्टृत्वमभिवाञ्छितम् ।
न तु वैशेषिकीं मुक्तिं गौतमो गन्तुमिच्छति ॥

सोपाधिकसावधिकपरिमितानन्दनिष्यन्दात् स्वर्गादप्यधिकं तद्विपरीतानन्दमम्लानज्ञानं च मोक्षमाचक्षते विचक्षणाः यदि तु जडः पाषाणनिर्विशेष एव तस्यामवस्थायामात्मा भवेत् तदलमपवर्गेण संसार एव वरमस्तु यत्र तावदन्तरान्तरापि दुःखकलुषितमपि कियदपि सुखमनुभुज्यते चिन्त्यतां तावत्किमल्पसुखानुभवो भव्य उत सर्वसुखोच्छेद एव अथास्ति तथाभूते मोक्षे लाभातिरेकः प्रेक्षादक्षाणां तेह्येवं विवेचयन्ति संसारे तावत् दुःखास्पृष्टं सुखं न सम्भवति दुःखं चावश्यं हेयं विवेकज्ञानं चानयोरेकभाजनपतितविषमधुनोरिव दुःशक्यमत एव द्वे अपि त्यज्येते अतश्च संसारान्मोक्षः श्रेयान् यतो ऽत्र दुःखं सर्वथा न स्यादरमियतो कादाचित्कसुखमात्रापि त्यक्ता

न तु तस्याः कृते दुःखभार इयान् व्यूढ इति तदेतत्तत्त्यसांसारिकसुखस्य मधुदिग्धधाराकरालमण्डलाग्रग्रासवद्दुःखरूपत्वादेव युक्तैव मुमुक्षूणां तज्जिहासा किंत्वात्यन्तिकसुखविशेषलिप्सूनामेव इहापि विषयनिवृत्तिजसुखमनुभवसिद्धं तद्यदि मोक्षे विशिष्टं नास्ति ततो मोक्षो दुःखरूप एवापद्यत इत्यर्थः ये अपि विषमधुनी एकत्र सम्पृक्ते त्यज्येते ते अपि सुखविशेषलिप्सयैव किञ्च यथा प्राणिनां संसारावस्थायां सुखमिष्टं दुःखं चानिष्टं तथा मोक्षावस्थायां दुःखनिवृत्तिरिष्टा सुखनिवृत्तिस्त्वनिष्टैव ततो यदि त्वदभिमतो मोक्षः स्यात्तदा न प्रेक्षावतां प्रवृत्तिः स्याद्भवति चेयम् ततः सिद्धो मोक्षः सुखसंवेदनस्वभावः प्रेक्षावत्प्रवृत्तेरन्यथानुपपत्तेः अथ यदि सुखसंवेदनैकस्वभावो मोक्षः स्यात्तदा तद्रागेण प्रवर्तमानो मुमुक्षुर्न मोक्षमधिगच्छेत् नापि रागिणां मोक्षोऽस्ति रागस्य बन्धनात्मकत्वात् नैव सांसारिकसुखमेव रागो बन्धनात्मको विषयादिप्रवृत्तिहेतुत्वात् न बन्धनात्मकः परां कोटिमारूढस्य च स्पृहामात्ररूपोऽप्यसौ निवर्तते "मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तम" इति वचनात् अन्यथा भवत्पक्षेऽपि दुःखनिवृत्त्यात्मकमोक्षाङ्गीकृतौ दुःखविषयकषायकालुष्यं केन निषिध्येतेति सिद्धं कृत्स्नकर्मक्षयात्परमसुखसंवेदनात्मको मोक्षो न बुद्ध्यादिविशेषगुणोच्छेदरूप इति अपि च भोः

तपस्विनः कथं चिदुच्छेदोऽस्माकमप्यभिमत एवैषामिति मा विरूपं मनः कृथास्तथा हि बुद्धिशब्देन ज्ञानमुच्यते तच्च मतिश्रुतावधिमनःपर्यायकेवलभेदात्पञ्चधा तत्राद्यं ज्ञानचतुष्टयं क्षायोपशमिकत्त्वात्केवलज्ञानाविर्भावकाल एव प्रलीनं "नट्ठंमि उ छाउ मत्थिए नाणे" इत्यागमात्केवलं तु सर्वद्रव्यपर्यायगतं क्षायिकत्वेन निष्कलङ्कात्मस्वरूपत्वादस्त्येव मोक्षावस्थायां सुखं तु वैषयिकं तत्र नास्ति तद्धेतो र्वेदनीयकर्मणो ऽभावात् यत्तु निरतिशयमक्षयमनपेक्षमनन्तं च सुखं तद्बाढं विद्यते दुःखस्य चाधर्ममूलत्वात्तदुच्छेदादुच्छेदः नन्वेवं सुखस्यापि धर्ममूलत्वाद्धर्मस्य चोच्छेदात्तदपि न युज्यते "पुण्यपापक्षयो मोक्ष" इत्यागमवचनात् नैवं वैषयिकसुखस्यैव धर्ममूलत्वाद्भवतु तदुच्छेदो न पुनरनपेक्षस्यापि सुखस्योच्छेदः इच्छाद्वेषयोः पुनर्मोहभेदत्त्वात्तस्य च समूलकाषंकषितत्त्वादभावः प्रयत्नश्च क्रियाव्यापारगोचरो नास्त्येव कृतकृत्यत्वा द्वीर्यान्तरायक्षयोपनतस्त्वस्त्येव प्रयत्नो दानादिलब्धिवत् न च क्वचिदुपयुज्यते कृतार्थत्वात् धर्माधर्मयोस्तु पुण्यपापापरपर्याययोरुच्छेदोऽस्त्येव तदभावे मोक्षस्यैवायोगात् संस्कारस्य मतिज्ञानविशेष एव तस्य च मोहक्षयानन्तरमेव क्षीणत्वादभाव इति तदेवं न संविदानन्दमयी च मुक्तिरिति युक्तिरिक्तेयमुक्तिरिति काव्यार्थः ।

अथ ते वादिनः कायप्रमाणत्वमात्मनः स्वयंसंवेद्यमानमप्यपलप्य तादृशकुशास्त्रशस्त्रसंपर्कविनष्टदृष्टयस्तस्य विभुत्वं मन्यन्तेऽतस्तत्रोपालम्भमाह ।

**यत्रैव यो दृष्टगुणः स तत्र**
**कुम्भादिवन्निष्प्रतिपक्षमेतत् ।**
**तथापि देहाद्बहिरात्मतत्त्व-**
**मतत्त्ववादोपहताः पठन्ति ॥८॥**

यत्रैव देशे यः पदार्थो दृष्टगुणो दृष्टाः प्रत्यक्षादिप्रमाणतोऽनुभूता गुणा धर्मा यस्य स तथा स पदार्थस्तत्रैव विवक्षितदेश एवोपपद्यते क्रियाध्याहारो गम्यः पूर्वस्यैवकारस्यावधारणार्थस्यात्राप्यभिसम्बन्धात् तत्रैव नान्यत्रेत्यन्ययोगव्यवच्छेदः अमुमेवार्थं दृष्टान्तेन दृढयति कुम्भादिवदिति घटादिवत् यथा कुम्भादेर्यत्रैवदेशे रूपादयो गुणा उपलभ्यन्ते तत्रैव तेषामस्तित्वं प्रतीयते नान्यत्र एवमात्मनोऽपि गुणाश्चैतन्यादयो देह एव दृश्यन्ते न बहिस्तस्मात् तत्प्रमाण एवायमिति यद्यपि पुष्पादीनामवस्थानदेशादन्यत्रापि गन्धादिगुणा उपलभ्यन्ते तथापि तेन न व्यभिचारस्तदाश्रया हि गन्धादिपुद्गलास्तेषां च वैस्रसिक्या प्रायोगिक्या वा गत्या गतिमत्त्वेन तदुपलम्भकघ्राणादिदेशं यावदागमनोपपत्तेरिति अत एवाह निष्प्रतिप-

त्वमेतदिति एतन्निष्प्रतिपक्षं बाधकरहितं "न हि दृष्टे ऽनुपपन्नं नामे "ति न्यायान्ननु मन्त्रादीनां भिन्नदेशस्थानामप्याकर्षणोच्चाटनादिको गुणो योजनशतादेः परतोऽपि दृश्यत इत्यस्ति बाधकमिति चेन्नैवं वोचः स हि न खलु मन्त्रादीनां गुणः किं तु तदधिष्ठातृदेवतानां तासां चाकर्षणीयोच्चाटनीयादिदेशगमने कौतस्कुतोऽयमुपालम्भः न जातु गुणा गुणिनमतिरिच्य वर्तन्त इति अथोत्तरार्द्धं व्याख्यायते तथापीत्यादि तथाप्येवं निःसपत्नं व्यवस्थितेऽपि तत्त्वे अतत्त्ववादोपहता अनाचार इत्यत्रेव नञः कुत्सार्थत्वात् कुत्सिततत्त्ववादेन तदभिमताप्ताभासपुरुषविशेषप्रणीतेन तत्त्वाभासप्ररूपणेनोपहता व्यामोहिता देहाद्बहिः शरीरव्यतिरिक्तेऽपि देशे आत्मतत्त्वमात्मरूपं पठन्ति शास्त्ररूपतया प्रणयन्त इत्यक्षरार्थः भावार्थस्त्वयम् आत्मा सर्वगतो न भवति सर्वत्र तद्गुणानुपलब्धेः योयः सर्वत्रानुपलभ्यमानगुणः स सर्वगतो न भवति यथा घटस्तथा चायं तस्मात् तथा व्यतिरेके व्योमादिः न चायमसिद्धो हेतुः कायव्यतिरिक्तदेशे तद्गुणानां बुद्ध्यादीनां वादिना प्रतिवादिना वानभ्युपगमात् तथा च भट्टः श्रीधरः "सर्वगतत्वेऽप्यात्मनो देहप्रदेशे ज्ञातृत्वं नान्यत्र शरीरस्योपभोगायतनत्वात् अन्यथा तस्य वैयर्थ्यादि"ति अथास्त्यदृष्टमात्मनो विशेषगुणस्तच्च सर्वोत्पत्तिमतां निमित्तं सर्वव्यापकं च कथमितरथा द्वीपान्तरादिष्वपि प्रतिनियतदेशव-

त्तिंगुरुत्रोपभोग्यानि कनकरत्नचन्दनाङ्गनादीनि ते-नोत्पाद्यन्ते गुणश्च गुणिनं विहाय न वर्तते ऽतोऽनु-मीयते सर्वगत आत्मेति नैवम् अदृष्टस्य सर्वगतत्वसा-धने प्रमाणाभावात् अथास्त्येव प्रमाणं वन्हेरूर्द्ध्वं ज्वलनं वायोस्तिर्य्यग्गमनं चादृष्टकारितमिति चेन्न तयो स्तात्स्वभावत्वादेव तत्सिद्धे र्दहनस्य दहनशक्तिवत् सा-प्यदृष्टकारिता चेत्तर्हि जगत्त्रयवैचित्रीसूत्रणोऽपि तदे-वसूत्रधारायतां किमीश्वरकल्पनया तन्नायमसिद्धो हेतुः नचानैकान्तिकः साध्यसाधनयो र्व्याप्तिग्रहणेन व्यभिचाराभावात् नापि विरुद्धोऽत्यन्तं विपक्षव्यावृत्त-त्वात् आत्मगुणाश्च बुद्ध्यादयः शरीर एवोपलभ्यन्ते ततो गुणिनापि तत्रै व भाव्यमिति सिद्धः कायप्रमाणा आत्मा अन्यच्च त्वया आत्मनां बहुत्वमिष्यते "ना-नात्मानो व्यवस्थात" इति वचनात्ते च व्यापकास्तेषां प्रदीपप्रभामण्डलानामिव परस्परानुवेधेन तदाश्रि-तशुभाशुभकर्मणामपि परस्परं सङ्करः स्यात् तथाचै-कस्य शुभकर्मणा अन्यः सुखी भवेदितरस्याशुभकर्मणा अन्योदुःखीत्यसमञ्जसमापद्येत अन्यच्चैकस्यैवात्मनः स्वोपात्तशुभकर्मविपाकेन सुखित्वं परोपार्जिताशुभ-कर्मविपाकसम्बन्धेन च दुःखित्वमिति युगपत्सुखदुः खसंवेदनप्रसङ्गः अथ स्वावष्टब्धभोगायतनमाश्रित्यैव शुभाशुभयो र्भोगस्तर्हि स्वोपार्ज्जितमप्यदृष्टं कथं भो-गायतनाद्बहिर्निष्क्रम्य वह्नेरूर्द्ध्वज्वलनादिकं करो-तीति चिन्त्यमेतत् आत्मनां च सर्वगतत्वे एकैकस्य

सृष्टिकर्तृत्वप्रसङ्गः सर्वगतत्वेनेश्वरान्तरनुप्रवेशस्य सम्भावनीयत्वात् ईश्वरस्य वा तदन्तरनुप्रवेशे तस्याप्यकर्तृत्वापत्तिः न हि क्षीरनीरयोरन्योन्यसंबन्धे एकतरस्य पानादिक्रिया अन्यतरस्य न भवतीति युक्तं वक्तुं किंच आत्मनः सर्वगतत्वे नरनारकादिपर्यायाणां युगपदनुभवानुषङ्गः अथ भोगायतनाभ्युपगमात् नायं दोष इति चेन्ननु स भोगायतनं सर्वात्मना अवष्टभ्नीयादेकदेशेन वा सर्वात्मना चेदस्मदभिमताङ्गीकारः एकदेशेन चेत् सावयवत्वप्रसङ्गः परिपूर्णभोगाभावश्च अथात्मनो व्यापकत्वाभावे दिग्देशान्तरवर्त्तिपरमाणुभिर्युगपत्संयोगाभावादाद्यकर्माभावस्तदभावादन्त्यसंयोगस्य तन्निर्मितशरीरस्य तेन तत्संबन्धस्य चाभावादनुपायसिद्धः सर्वदा सर्वेषां मोक्षः स्यान्नैवं यद्येन संयुक्तं तदेव तं प्रत्युपसर्पतीति नियमासम्भवात् अयस्कान्तं प्रत्ययसस्तेनासंयुक्तस्याप्याकर्षणोपलब्धेः अथासंयुक्तस्याप्याकर्षणे तच्छरीरारम्भं प्रत्येकमुखीभूतानां त्रिभुवनोदरविवरवर्तिपरमाणूनामुपसर्पणप्रसङ्गान्न जाने तच्छरीरं कियत्प्रमाणं स्यादिति चेत् संयुक्तस्याप्याकर्षणे कथं स एव दोषो न भवेदात्मनो व्यापकत्वेन सकलपरमाणूनां तेन संयोगात् अथ तद्भावाविशेषेऽप्यदृष्टवशाद्विवक्षितशरीरोत्पादनानुगुणा नियता एव परमाणव उपसर्पन्ति तदितरत्रापि तुल्यम् अथास्तु यथाकथंचिच्छरीरोत्पत्तिस्तथापि सावयवं शरीरं प्रत्यवय-

वमनुप्रविशन्नात्मा सावयवः स्यात् तथा चास्य पटादिवत् कार्य्यत्वप्रसङ्गः कार्य्यत्वे चासौ विजातीयैः सजातीयै र्वा कारणैरारभ्येत न तावद्विजातीयैस्तेषामनारम्भकत्वा न्न हि तन्तवो घटमारभन्ते न च सजातीयै र्यत आत्मत्वाभिसम्बन्धादेवैतेषां कारणानां सजातीयत्वं पार्थिवादिपरमाणूनां विजातीयत्वात्तथा चात्मभिरात्मा आरभ्यत इत्यायातं तच्चायुक्तम् एकत्र शरीरे ऽनेकात्मनामात्मारम्भकाणामसम्भवात् सम्भवे वा प्रतिसन्धानानुपपत्तिः नह्यन्येन दृष्टमन्यः प्रतिसन्धातुमर्हति अतिप्रसङ्गात् तदारभ्यत्वे चास्य घटवदवयवक्रियातो विभागात्संयोगविनाशाद्विनाशः स्यात् तस्माद्व्यापक एवात्मा युज्यते कायप्रमाणतायामुक्तदोषसद्भावादिति चेन्न सावयवत्वकार्य्यत्वयोः कथंचिदात्मन्यभ्युपगमात् तत्र सावयवत्वं तावदसंख्येयप्रदेशात्मकत्वं तथा च द्रव्यालङ्कारकारः "आकाशोऽपि सदेशः सकृत्सर्वमूर्ताभिसम्बन्धार्हत्वात्" इति यद्यप्यवयवप्रदेशयो र्गन्धहस्त्यादिषु भेदोऽस्ति तथापि नात्रसूक्ष्मेक्षिका चिन्त्या प्रदेशेष्वप्यवयवव्यवहारात्कार्य्यत्वं तु वक्ष्यामः नन्वात्मनां कार्य्यत्वे घटादिवत् प्राक्प्रसिद्धसमानजातीयावयवारभ्यत्वप्रसक्तिः अवयवा ह्यवयविनमारभन्ते यथा तन्तवः पटमिति चेन्न वाच्यं न खलु घटादावपि कार्य्यं प्राक्प्रसिद्धसमानजातीयकपालसंयोगात्मकत्वं दृष्टं कुम्भकारादिव्यापारान्वितान्मृत्पिण्डात्प्रथममेव पृथुबुध्नोदराद्याकारस्यास्यो-

त्पत्तिप्रतीतेः द्रव्यस्य हि पूर्वाकारपरित्यागेन उत्तराकारपरिणामः कार्यत्वं तच्च बहिरिवान्तरप्यनुभूयत एव ततश्चात्मापि स्यात्कार्यः न च पटादौ स्वावयवसंयोगपूर्वककार्यत्वोपलम्भात् सर्वत्र तथाभावो युक्तः काष्ठे लोहलेख्यत्वोपलम्भाद्वज्रेऽपि तथाभावप्रसङ्गात् प्रमाणबाधनमुभयत्र तुल्यं न चोक्तलक्षणकार्यत्वाभ्युपगमेऽप्यात्मनोऽनित्यत्वानुषङ्गात्प्रतिसन्धानाभावोऽनुषज्यते कथं चिदनित्यत्वे सत्येवास्योपपद्यमानत्वात् प्रतिसन्धानं हि यमहमद्राक्षं तमहं स्मरामीत्यादिरूपं तच्चैकान्तनित्यत्वे कथमुपपद्यते अवस्थाभेदात् अन्या ह्यनुभवावस्था अन्या च स्मरणावस्था अवस्थाभेदेचावस्थावतोऽपि भेदादेकरूपत्वच्युतेः कथं चिदनित्यत्वं युक्त्यायातं केन वार्यताम् अथात्मनः शरीरपरिमाणत्वे मूर्त्तत्वानुषङ्गात् शरीरेऽनुप्रवेशो न स्यान्मूर्त्ते मूर्त्तस्यानुप्रवेशविरोधात्ततो निरात्मकमेवाखिलं शरीरं प्राप्नोतीति चेत्किमिदं मूर्त्तत्वं नाम असर्वंगतद्रव्यपरिमाणत्वं रूपादिमत्त्वं वा तत्र नाद्यः पक्षो दोषाय संमतत्वात् द्वितीयस्त्वयुक्तो व्याप्त्यभावात् नहि यदसर्वंगतं तन्नियमेनरूपादिमदित्यविनाभावोऽस्ति मनसोऽसर्वंगतत्वेऽपि भवन्मते तदसंभवात् आकाशकालदिगात्मनां सर्वगतत्वं सर्वसंयोगिसमानदेशत्वं वेत्युक्तत्वात्मनसो वैधर्म्यात्सर्वंगतत्वप्रतिषेधनात् अतो नात्मनः शरीरे अनुप्रवेशानुपपत्तिर्येन निरात्मकं तत् स्यात् असर्वग-

तद्द्रव्यपरिमाणलक्षणमूर्त्तत्वस्य मनोवत्प्रवेशाप्रतिब-न्धकत्वाद्रूपादिमत्त्वलक्षणमूर्त्तत्वापेतस्यापि जलादे-र्बालुकादावनुप्रवेशो न निषिध्यते आत्मनस्तु तद्रहि-तस्यापि तत्रासौ प्रतिषिध्यत इति महच्चित्रम् अथा-त्मनः कायप्रमाणत्वे बालशरीरपरिमाणस्य सतो यु-वशरीरपरिमाणस्वीकारः कथं स्यात्किं तत्परिमाण-परित्यागात्तदपरित्यागाद्वा परित्यागाच्चेत् तदा श-रीरवत्तस्यानित्यत्वप्रसङ्गात्परलोकाद्यभावानुषङ्गः अ-थापरित्यागात् तन्न पूर्वपरिमाणापरित्यागे शरी-रवत्तस्योत्तरपरिमाणोत्पत्त्यनुपपत्तेः तदयुक्तं युवश-रीरपरिमाणावस्थायामात्मनो बालशरीरपरिमाण-परित्यागे सर्वथा विनाशासम्भवात् विफणावस्थोत्पादे सर्पवदिति कथं परलोकाभावोऽनुषज्यते पर्यायतस्त-स्यानित्यत्वेऽपि द्रव्यतो नित्यत्वात् अथात्मनः का-यप्रमाणत्वे तत्खण्डने खण्डनप्रसङ्ग इति चेत्कः कि-माह शरीरस्य खण्डने कथंचित्तत्खण्डनस्येष्टत्वाच्छ-रीरसम्बद्धात्मप्रदेशेभ्यो हि कतिपयात्मप्रदेशानां ख-ण्डितशरीरप्रदेशेऽवस्थानादात्मनः खण्डनं तच्चात्र विद्यत एवान्यथा शरीरात्पृथग्भूतावयवस्य कम्पोप-लब्धिर्न स्यान्न च खण्डितावयवानुप्रविष्टस्यात्मप्रदे-शस्य पृथगात्मत्वप्रसङ्गस्तत्रैवानुप्रवेशात् न चैकत्र सन्तानेऽनेके आत्मानः अनेकार्थप्रतिभासिज्ञानानामेक-प्रमात्राधारतया प्रतिभासाभावप्रसङ्गात् शरीरान्तर-व्यवस्थितानेकज्ञानावसेयार्थसंवित्तिवत् कथं खण्डि-

तावयवयोः संघट्टनं पश्चादिति चेदेकान्तेन छेदानभ्युपगमात् पद्मनालतन्तुवच्छेदस्यापि स्वीकारात् तथाभूतादृष्टवशात्तत्संघट्टनमविरुद्धमेवेति तनुपरिमाण एवात्माङ्गीकर्त्तव्यो न व्यापकस्तथा चात्माव्यापको न भवति चेतनत्वात् यत्तु व्यापकं न तच्चेतनं यथा व्योम चेतनश्चात्मा तस्मान्न व्यापकः अव्यापकत्वे चास्यतत्त्वैवोपलभ्यमानगुणत्वेन सिद्धा कायप्रमाणता यत्पुनरष्टसमयसाध्यकेवलिसमुद्घात*दशायामार्हतानामपि चतुर्दशरज्ज्वात्मकलोकव्यापित्वेनात्मनः सर्वव्यापकत्वं तत्कादाचित्कमिति न तेन व्यभिचारः स्याद्वादमन्त्रकवचावगुण्ठितानां च नेदृशविभीषिकाभ्यो भयमिति काव्यार्थः ॥ ९ ॥

वैशेषिकनैयायिकयोः प्रायःसमानतन्त्रत्वादौलूक्यमते क्षिप्ते न्यायमतमपि क्षिप्तमेवावसेयं पदार्थेषु च तयोरपि न तुल्या प्रतिपत्तिरिति सांप्रतमक्षपादप्रतिपादितपदार्थानां सर्वेषां चतुर्थपुरुषार्थं प्रत्यसाधकतमत्वे वाच्येऽपि तदन्तःपातिनां छलजातिनिग्रहस्थानानां परोपन्यासनिरासमात्रफलतया अत्यन्तमनुपादेयत्वात् तदुपदेशदातुर्वैराग्यमुपहसन्नाह ।

**स्वयंविवादग्रहिले वितण्डा-**
**पाण्डित्यकण्डूलमुखे जनेऽस्मिन् ।**

---

* समुद्घातेति २ पु० पाठः ।

## मायोपदेशात्परमर्म भिन्द-
## न्नहो विरक्तो मुनिरन्यदीयः॥१०॥

अन्ये अविज्ञाततत्त्वदाज्ञासारतया ऽनुपादेयनामानः परे तेषामयं शास्त्रत्वेन संबन्धी अन्यदीयो मुनिरक्षपादऋषिः अहो विरक्त अहो वैराग्यवान् अहो इत्युपहासगर्भमाश्चर्यं सूचयति अन्यदीय इत्यत्र "ईयकारके" इति दोन्तः किं कुर्वन्नित्याह परमर्म भिन्दन् जातावेकवचनप्रयोगात् परमर्माणि व्यथयन् बहुभिरात्मप्रदेशैरधिष्ठिता देहावयवा मर्माणीति पारिभाषिकी संज्ञा तत उपचारात्साध्यस्वतत्त्वसाधनाव्यभिचारितया प्राणभूतः साधनोपन्यासोऽपि मर्मैव मर्म कस्मात्तद्भिन्दन् मायोपदेशाद्धेतोः माया परवञ्चनं तस्या उपदेशश्छलजातिनिग्रहस्थानलक्षणपदार्थत्रयप्ररूपणद्वारेण शिष्येभ्यः प्रतिपादनं तस्मात् "गुणादस्त्रियां न वे" त्यनेन हेतौ तृतीयाप्रसङ्गे पञ्चमी कस्मिन् विषये मायामयमुपदिष्टवान् इत्याह अस्मिन् प्रत्यक्षोपलक्ष्यमाणे जनेऽतत्त्वविमर्शबहिर्मुखतया प्राकृतप्राये लोके कथंभूते स्वयमात्मना परोपदेशनिरपेक्षमेव विवादग्रहिले विरुद्धः परस्परकक्षीकृतपक्षाधिक्षेपदक्षो वादो वचनोपन्यासो विवादस्तथा च भगवान् हरिभद्रसूरिः ।

लब्धिख्यात्यर्थिना तु स्याद्दुःस्थितेनामहात्मना ।

छलजातिप्रधानो यः स विवाद इति स्मृतः ॥

तेन ग्रहिल इव ग्रहगृहीत इव विवादग्रहिल-स्तत्र यथा ग्रहाद्यपस्मारपरवशः पुरुषो यत्किंचन प्रलापी स्यादेवमयमपि जन इति भावः तथा वितण्डा प्रतिपक्षस्थापनाहीनं वाक्यं वितण्ड्यते आहन्यतेऽनया प्रतिपक्षसाधनमिति व्युत्पत्तेः "अभ्युपेत्य पक्षं यो न स्थापयति स वैतण्डिक इत्युच्यते" इति न्यायवार्त्तिकं वस्तुतस्तु अपरामृष्टतत्त्वातत्त्वविचारं मौखर्यं वितण्डा तत्र यत्पाण्डित्यमविकलं कौशलं तेन कण्डूलमिव कण्डूलं मुखं लपनं यस्य स तथा तस्मिन् कण्डूः खर्जूः कण्डूरस्यास्तीति कण्डूलः सिध्मादित्वा न्मत्वर्थीयो लप्रत्ययः यथा किलान्तरुत्पन्नकृमिकुलजनितां कण्डूतिं निरोद्धुमपारयन् पुरुषो व्याकुलतां कलयति एवं तन्मुखमपि वितण्डापाण्डित्येन असम्बद्धप्रलापचापलमाकलयत् कण्डूलमित्युपचर्यते एवं च स्वरसत एव स्वस्वाभिमतव्यवस्थापनाविसंष्ठुलो वैतण्डिकलोकस्तत्र च तत्परमाप्तभूतपुरुषविशेषपरिकल्पितपरवञ्चनप्रचुरवचनोपदेशस्तैत्सहायः समजनि तदा स्वत एव ज्वालाकलापजटिले प्रज्वलति हुताशन इव कृतो घृताहुतिप्रक्षेप इति तैश्च भवाभिनन्दिभिर्वादिभिरेताशोहपदेशदानमपि तस्य मुनेः कारुणिकत्वकोटावारोपितं तथा चाहुः ।

दुःशिक्षितकुतर्कांशलेशवाचालिताननाः ।

शक्याः किमन्यथा जेतुं वितण्डाटोपमण्डिताः ॥

गतानुगतिको लोकः कुमार्गं तत्प्रतारितः ।
मागादिति च्छलादीनि प्राह कारुणिको मुनिः ॥

कारुणिकत्वं च वैराग्यान्न भिद्यते ततो युक्तमुक्तम् अहो विरक्त इति स्तुतिकारेणोपहासवचनम् अथ मायोपदेशादितिसूचनासूत्रं वितन्यते अक्षपादमते किल षोडश पदार्थाः "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिःग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगम" इति वचनान्न चैतेषां व्यस्तानां समस्तानां वा अधिगमो निःश्रेयसावाप्तिहेतुर्न ह्येकेनैव क्रियाविरहितेन ज्ञानमात्रेण मुक्ति र्युक्तिमती असमग्रसामग्रीकत्त्वाद्विघटितैकचक्ररथेन मनीषितनगरप्राप्तिवन्न च वाच्यं न खलु वयं क्रियां प्रतिक्षिपामः किं तु तत्वज्ञानपूर्विकाया एव तस्या मुक्तिहेतुत्वमिति ज्ञापनार्थं तत्वज्ञानान्निःश्रेयसाधिगम इति ब्रूमः न ह्यमीषां संहते अपि ज्ञानक्रिये मुक्तिप्राप्तिहेतुभूते वितथत्वात् तज्ज्ञानक्रिययोः न च वितथत्वमसिद्धं विचार्यमाणानां षोडशानामपि तत्वाभासत्वात् तथा हि तैः प्रमाणस्य तावल्लक्षणमित्थं सूत्रितम् "अर्थोपलब्धिहेतुः प्रमाणमि"ति एतच्च न विचारसहं यतोऽर्थोपलब्धौ हेतुत्वं यदि निमित्तत्वमात्रं तत्सर्वकारकसाधारणमिति कर्तृकर्मादेरपि प्रमाणत्वप्रसङ्गः अथ कर्तृकर्मादिविलक्षणं हेतुशब्देन करणमेव विवक्षितं तर्हि तज्ज्ञानमेव युक्तं न चेन्द्रियसन्निक-

र्यादिर्यस्मिन् हि समर्थ उपलब्धो भवति स तत्करणं न चेन्द्रियसन्निकर्षसामग्र्यादौ सत्यपि ज्ञानाभावे ऽर्थोपलम्भः साधकतमं हि करणमव्यवहितफलं तदिष्यते व्यवहितफलस्यापि करणत्वे दुग्धभोजनादेरपि तथा प्रसङ्गः तन्न ज्ञानादन्यत्र प्रमाणत्वमन्यत्रोपचारात् यदपि न्यायभूषणसूत्रकारेणोक्तं "सम्यगनुभवसाधनं प्रमाणमि" ति तत्रापिसाधनग्रहणात्कर्तृकर्मनिरासेन करणस्यैव प्रमाणत्वं सिध्यति तथाप्यव्यवहितफलत्वेन साधकतमत्वं ज्ञानस्यैवेति न तत्सम्यग्लक्षणं "स्वपरव्यवसायि ज्ञानं प्रमाणमि" ति तु तात्त्विकं लक्षणं प्रमेयमपि तैरात्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदाद् द्वादशविधमुक्तं तच्च न सम्यग् यतः शरीरेन्द्रियबुद्धिमनःप्रवृत्तिदोषफलदुःखानामात्मन्येवान्तर्भावो युक्तः संसारिणः आत्मनः कथं चित्तदविष्वग्भूतत्वात् आत्मा च प्रमेय एव न भवति तस्य प्रमातृत्वात् इन्द्रियबुद्धिमनसां तु करणत्वात् प्रमेयत्वाभावः दोषास्तु रागद्वेषमोहास्ते च प्रवृत्ते र्न पृथग्भवितु मर्हन्ति वाङ्मनःकायव्यापारस्य शुभाशुभफलस्य विंशतिविधस्य तन्मते प्रवृत्तिशब्दवाच्यत्वात् रागादिदोषाणां च मनोव्यापारात्मकत्वात् दुःखस्य शब्दादीनामिन्द्रियार्थानां च फल एवान्तर्भावः "प्रवृत्तिदोषजनितं सुखदुःखात्मकं मुख्यं फलं तत्साधनं तु गौणमि" ति जयन्तवचनात् प्रेत्यभावापवर्गयोः पुनरात्मन एव

परिणामान्तरापत्तिरूपत्वान्न पार्थक्यमात्मनः सका-शादुचितं तदेवं द्वादशविधं प्रमेयमिति वाग्विस्तर-मात्रं "द्रव्यपर्यायात्मकं वस्तु प्रमेयमि" ति तु स-मीचीनं लक्षणं सर्वसङ्ग्राहकत्वात् एवं संशयादीना-मपि तत्त्वाभासत्वं प्रेक्षावद्भिरनुपेक्षणीयम् अत्र तु प-तीतत्वाद् ग्रन्थगौरवभयाच्च न प्रपञ्चितं प्रत्यक्षरेण ह्यत्र न्यायशास्त्रमवतारणीयं तच्चावतार्यमाणं ग्रन्था-न्तरतामवगाहत इत्यास्तां तदेवं प्रमाणादिषोडश-पदार्थानामविशिष्टेऽपि तत्त्वाभासत्वे प्रकटकपटना-टकसूत्रधाराणां त्रयाणामेव छलजातिनिग्रहस्था-नानां मायोपदेशादितिपदेनोपक्षेपः कृतः तत्र परस्य वदतोऽर्थविकल्पोपपादनेन वचनविघातश्छलं तत्त्रिधा वाक्छलं सामान्यच्छलमुपचारच्छलं चेति तत्र साधा-रणे शब्दे प्रयुक्ते वक्तुरभिप्रेतादर्थादर्थान्तरकल्पनया तन्निषेधो वाक्छलं यथा नवकम्बलोऽयं माणवक इति नूतनविवक्षया कथिते परः संख्यामारोप्य निषेधति कुतोऽस्य नव कम्बला इति संभावनयातिप्रसङ्गि-नोऽपि सामान्यस्योपन्यासे हेतुत्वारोपणेन तन्नि-षेधः सामान्यच्छलं यथा अहो नु खल्वसौ ब्रा-ह्मणो विद्याऽऽचरणसंपन्न इति ब्राह्मणस्तुतिप्रसङ्गे कश्चिद्वदति संभवति ब्राह्मणे विद्याऽऽचरणसंप-दिति तच्छलवादी ब्राह्मणत्वस्य हेतुतामारोप्य निराकुर्वन्नभियुङ्क्ते यदि ब्राह्मणे विद्याऽऽचरणसंपद्भ-वति व्रात्येऽपि सा भवेद् व्रात्योऽपि ब्राह्मण एवेति

औपचारिके प्रयोगे मुख्यप्रतिषेधेन प्रत्यवस्थानमुपचारच्छलं यथा मञ्चाः क्रोशन्तीत्युक्ते परः प्रत्यवतिष्ठते कथमचेतनाः मञ्चाः क्रोशन्ति मञ्चस्थाः पुरुषाः क्रोशन्तीति तथा सम्यगहेतौ हेत्वाभासे वा वादिना प्रयुक्ते झटिति तद्दोषतत्त्वाप्रतिभासे हेतुप्रतिबिम्बनप्रायं किमपि प्रत्यवस्थानं जातिं दूषणाभास इत्यर्थः सा च चतुर्विंशतिभेदा साधर्म्यादिप्रत्यावस्थानभेदेन यथा साधर्म्य १ वैधर्म्यो २ त्कर्षा ३ पकर्ष ४ वर्ण्या ५ वर्ण्य ६ विकल्प ७ साध्य ८ प्राप्त्य ९ प्राप्ति १० प्रसङ्ग ११ प्रतिदृष्टान्ता १२ नुत्पत्ति १३ संशय १४ प्रकरणा १५ हेत्व १६ र्थापत्त्य १७ विशेषो १८ पपत्त्यु १९ पलब्ध्य २० नुपलब्धि २१ नित्या २२ नित्य २३ कार्यसमाः २४ तत्र साधर्म्येण प्रत्यवस्थानं साधर्म्यसमा जातिर्भवति अनित्यः शब्दः कृतकत्वाद् घटवदिति प्रयोगे कृते साधर्म्यप्रयोगेणैव प्रत्यवस्थानं नित्यः शब्दो निरवयवत्वादाकाशवत् न चास्ति विशेषहेतुर्घटसाधर्म्यात्कृतकत्वादनित्यः शब्दो न पुनराकाशसाधर्म्यान्निरवयवत्वान्नित्य इति १ वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमा जातिर्भवति अनित्यः शब्दः कृतकत्वाद् घटवदित्यत्रैव प्रयोगे स एव प्रतिहेतुर्वैधर्म्येण प्रयुज्यते नित्यः शब्दो निरवयवत्वात् अनित्यं हि सावयवं दृष्टं घटादीति न चास्ति विशेषहेतुर्घटसाधर्म्यात् कृतकत्वादनित्यः शब्दो न पुनस्तद्वैधर्म्यान्निरवयवत्वान्नित्य इति २ उत्कर्षापकर्षाभ्यां प्रत्यव-

स्थानमुत्कर्षापकर्षसमे जाती भवतः तत्रैव प्रयोगे दृष्टान्तधर्मं कंचित्साध्यधर्मिण्यापादयन्नुत्कर्षसमां जातिं प्रयुङ्क्ते यदि घटवत् कृतकत्वादनित्यः शब्दो घटवदेव मूर्तो भवतु न चेन्मूर्तो घटवदनित्योऽपि माभूदिति शब्दे धर्मान्तरोत्कर्षमापादयति ३ अपकर्षस्तु घटः कृतकः सन्नश्रावणो दृष्टः एवं शब्दोऽप्यस्तु नो चेद् घटवदनित्योऽपि माभूदिति शब्दे श्रावणत्वधर्ममपकर्षतीति ४ इत्येताश्चतस्रो दिङ्मात्रदर्शनार्थं जातय उक्ता एवं शेषा अपि विंशतिरक्षपादशास्त्रादवसेयाः। अत्र तु अनुपयोगित्वान्नलिखिताः तथा विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानं तत्र विप्रतिपत्तिः साधनाभासे साधनबुद्धिर्दूषणाभासे च दूषणबुद्धिरिति अप्रतिपत्तिः साधनस्यादूषणं दूषणस्य चानुद्धरणं तच्च निग्रहस्थानं द्वाविंशतिविधं तद्यथा प्रतिज्ञाहानिः १ प्रतिज्ञान्तरं २ प्रतिज्ञाविरोधः ३ प्रतिज्ञासंन्यासः ४ हेत्वन्तरम् ५ अर्थान्तरं ६ निरर्थकम् ७ अविज्ञातार्थम् ८ अपार्थकम् ९ अप्राप्तकालं १० न्यूनम् ११ अधिकं १२ पुनरुक्तम् १३ अननुभाषणम् १४ अज्ञानम् १५ अप्रतिभा १६ विक्षेपो १७ मतानुज्ञा १८ पर्यनुयोज्योपेक्षणं १९ निरनुयोज्यानुयोगः २० अपसिद्धान्तः २१ हेत्वाभासाश्च २२ तत्र हेतावनैकान्तिकीकृते प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्युपगच्छतः प्रतिज्ञाहानिर्नाम निग्रहस्थानं यथा नित्यः शब्द ऐन्द्रियिकत्वाद् घटवदिति प्रतिज्ञासाधनाय वादी वदन् परेण सामान्यमैन्द्रियिकमपि नित्यं

दृष्टमिति हेतावनैकान्तिकीकृते यद्येवं ब्रूयात् सामान्यवद्घटोऽपि नित्यो भवत्विति स एवं ब्रुवाणः शब्दानित्यत्वप्रतिज्ञां जह्यात् १ प्रतिज्ञातार्थप्रतिषेधे परेण कृते तत्रैव धर्मिणि धर्मान्तरं साधनीयमभिदधतः प्रतिज्ञान्तरं नाम निग्रहस्थानं भवति अनित्यः शब्द ऐन्द्रियिकत्वादित्युक्ते तथैव सामान्येन व्यभिचारे चोदिते यदि ब्रूयाद्युक्तं सामान्यमैन्द्रियकं नित्यं तद्धि सर्वगतम् असर्वगतस्तु शब्द इति तदिदं शब्दोऽनित्यत्वलक्षणपूर्वप्रतिज्ञातः प्रतिज्ञान्तरमसर्वगतः शब्द इति निग्रहस्थानं अनया दिशा शेषाण्यपि विंशति र्ज्ञेयानि इह तु न लिखितानि पूर्वहेतोरेवेत्येवं मायाशब्देनावच्छलादित्रयं सूचितं तदेवं परवञ्चनात्मकान्यपि छलजातिनिग्रहस्थानानि तत्वरूपतयोपदिशतोऽक्षपादर्षेर्वैराग्यव्यावर्णनं तमसः प्रकाशात्मकत्वप्रख्यापनमिव कथमिव नोपहसनीयमिति काव्यार्थः ॥ १० ॥

अधुना मीमांसकभेदाभिमतं वेदविहितहिंसाया धर्महेतुत्वमुपपत्तिपुरस्सरं निरस्यन्नाह ।

न धर्महेतुर्विहितापि हिंसा
नोत्सृष्टमन्यार्थमपोद्यते च ।
स्वपुत्रघातान्नृपतित्वलिप्सा-
सब्रह्मचारि स्फुरितं परेषाम् ॥११॥

इह खल्वर्चिर्मार्गप्रतिपन्थिधूममार्गाश्रिता जैमिनीया इत्थमाचक्षते या हिंसा गार्ध्याद् व्यसनितया वा क्रियते सैवाधर्मानुबन्धहेतुः प्रमादसंपादितत्त्वाच्छौनिककलुब्धकादीनामिव वेदविहिता तु हिंसा प्रत्युत धर्म्महेतुर्देवतातिथिपितृणां प्रीतिसंपादकत्वात् तथाविधपूजोपचारवत् न च तत्प्रीतिसम्पादकत्वमसिद्धं कारीरीप्रभृतियज्ञानां स्वसाध्ये वृष्ट्यादिफले यः खल्वव्यभिचारः स तत्प्रीणितदेवताविशेषानुग्रहहेतुकः एवं त्रिपुरार्णववर्णितच्छगलजाङ्गलहोमात्परराष्ट्रवशीकृतिरपि तदनुकूलितदैवतप्रसादसंपाद्या अतिथिप्रीतिस्तु मधुपर्कसंस्कारादिसमास्वादजा प्रत्यक्षोपलक्ष्यैव पितृणामपि तत्तदुपयाचितश्राद्धादिविधानेन प्रीणितानां स्वसन्तानवृद्धिविधानं साक्षादेव वीक्ष्यते आगमश्चात्र प्रमाणं स च देवप्रीत्यर्थमश्वमेधगोमेधनरमेधादिविधानाभिधायकः प्रतीत एव अतिथिविषयस्तु "महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेदि" त्यादिः पितृप्रीत्यर्थस्तु।

द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु।
औरभ्रेणाथ चतुरः शाकुनेनेह पञ्च तु॥

इत्यादिः एवं पराभिप्रायं हृदि संप्रधार्याचार्यः प्रतिविधत्ते न धर्मेत्यादि विहितापि वेदप्रतिपादितापि आस्तां तावदविहिता हिंसा प्राणिप्राणव्यपरोपणरूपा न धर्महेतुर्न धर्मानुबन्धनिबन्धनं यतोऽत्र

आत्मनः प्रतिकूलानि परेषां न समाचरेत् । ३१—
प्रकट एव स्ववचनविरोधस्तथाहि हिंसा चेद्धर्महेतुः कथं धर्महेतुश्चेद्धिंसा कथं "श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्" इत्यादि न हि भवति माता च बन्ध्या चेति हिंसा कारणं धर्मस्तु तत्कार्यमिति पराभिप्रायः न चायं निरुपायः यतो यद्यस्यान्वयव्यतिरेकावनुविधत्ते तत्तस्य कार्यं यथा मृत्पिण्डादेर्घटादिः न च धर्मो हिंसात एव भवतीति प्रातीतिकं तपोविधानदानध्यानादीनां तदकारणत्वप्रसङ्गात् अथ न वयं सामान्येन हिंसां धर्महेतुं ब्रूमः किं तु विशिष्टामेव विशिष्टा च सैव या वेदविहितेति चेत् ननु तस्या धर्महेतुत्वं किं वध्यजीवानां मरणाभावेन मरणेऽपि तेषामार्त्तध्यानाभावात्सुगतिलाभेन वा नाद्यः पक्षः प्राणत्यागस्य तेषां साक्षाद्वैक्ष्यमाणत्वात् न द्वितीयः परचेतोवृत्तीनां दुर्लक्षतयाऽऽर्त्तध्यानाभावस्य वाङ्मात्रत्वात् प्रत्युत हा कष्टमस्ति न कोऽपि कारुणिकः शरणमिति स्वभाषया विरसमारसत्सु तेषु वदनदैन्यनयनतरलतादीनां लिङ्गानां दर्शनात् दुर्ध्यानस्य स्पष्टमेव निष्टङ्कमानत्वात् अथेत्थमाचक्षीथाः यथा अयःपिण्डो गुरुतया मज्जनात्मकोऽपि तनुतरपत्रादिकरणेन संस्कृतः सन् जलोपरि प्लवते यथा च मारणात्मकमपि विषं मन्त्रादिसंस्कारविशिष्टं सद्गुणाय जायते यथा वा दहनस्वभावोऽपि अग्निः सत्यादिप्रभावप्रतिहतशक्तिः सन्न हि प्रदहति एवं मन्त्रादिविधिसंस्कारान्न खलु वेदविहिता हिंसा दोषपोषाय न च तस्याः कुत्सि-

तत्रं शङ्कनीयं तत्कारिणां याज्ञिकानां लोके पूज्यत्व-
दर्शनादिति तदेतन्न दक्षाणां क्षमते क्षोदं वैषम्येण दृ-
ष्टान्तानामसाधकतमत्वादयःपिण्डादयो हि पत्रादिभा-
वान्तरापन्नाः सन्तः सलिलतरणादिक्रियासमर्थाः न-
च वैदिकमन्त्रसंस्कारविधिनापि विशस्यमानानां पशू-
नां काचिद्वेदनानुत्पादादिरूपा भावान्तरापत्तिः प्रती-
यते अथ तेषां वधानन्तरं देवतापत्तिर्भावान्तरमस्त्येवे-
ति चेत्किमत्र प्रमाणं न तावत्प्रत्यक्षं तस्य संबद्धवर्त्तमा-
नार्थग्राहकत्वात् "सम्बद्धवर्तमानं च गृह्यते चक्षुरा-
दिने"ति वचनात् नाप्यनुमानं तत्प्रतिबद्धलिङ्गानुप-
लब्धेः नाप्यागमस्तस्याद्यापि विवादास्पदत्वात् अर्था-
पत्त्युपमानयोस्त्वनुमानान्तर्गततया तद्दूषणेनैव ग-
तार्थत्वम् अथ भवतामपि जिनायतनादिविधाने परि-
णामविशेषात्पृथिव्यादिजन्तुजातघातनमपि यथा
पुण्याय कल्प्यत इति कल्पना तथा अस्माकमपि किं ने-
ष्यते वेदोक्तविधिविधानरूपस्य परिणामविशेषस्य नि-
र्विकल्पं तत्रापि भावात् नैवं परिणामविशेषोऽपि स
एव शुभफलो यत्रानन्योपायत्वेन यतनयापकृष्टप्रत-
नुचैतन्यानां पृथिव्यादिजीवानां वधेऽपि स्वल्पपुण्य-
व्ययेनापरिमितसुकृतसम्प्राप्तिर्न पुनरितरः भवत्पक्षे
तु सत्स्वपि तत्तच्छ्रुतिस्मृतिपुराणेतिहासप्रतिपादि-
तेषु यमनियमादिषु स्वर्गावाप्त्युपायेषु तांस्तान् देवा-
नुद्दिश्य प्रतिप्रतीकं कर्त्तनकदर्थनया कान्दिशीकान्
कृपणपञ्चेन्द्रियान् शौनिकाधिकं मारयतां कृत्स्नसु-

कृतव्ययेन दुर्गतिमेवानुकूलयतां दुर्लभः शुभपरिणा-
मविशेषः एवं च यं कं चन पदार्थं किंचित्साधर्म्यद्वा-
रेणैव दृष्टान्तीकुर्वतां भवतामतिप्रसङ्गः सङ्गच्छते न-
च जिनायतनविधापनादौ पृथिव्यादिजीववधेऽपि न
गुणस्तथाहि तद्दर्शनाद्गुणानुरागितया भव्यानां बो-
धलाभः पूजातिशयविलोकनादिना च मनःप्रसाद-
स्ततः समाधिस्ततश्च क्रमेण निश्श्रेयसप्राप्तिरिति तथा
च पञ्चलिङ्गीकारः ।

पुठवाइयाण जइ वि हु
हो इविणासो जिणालयाहिंतो ।
तव्वि सयाविसुदिव्वि
सनिय मनुअच्छिअणुकंपा ॥ १ ॥
एयाहिंतो बुद्धा विरयारक्कंति जेण पुठवाई ।
इत्तोनिव्वाणगयाअवाहियाआभवमिमाणं ॥२॥
रोगिसिरावेहाइवसुविय्वकिरियावसुप्पउत्ताउ ।
परिणामसुंदरच्चियचिट्ठासिबाहजोगेविति ॥३॥

वैदिकवधविधाने तु न कं चि त्पुण्यार्ज्जनानु-
गुणं गुणं पश्यामः अथ विप्रेभ्यः पुरोडाशादिप्रदा-
नेन पुण्यानुबन्धी गुणोऽस्त्येवेति चेत् न पवित्रसुव-
र्णादिप्रदानमात्रेणैव पुण्योपार्ज्जनसम्भवात् कृपणप-
शुगणव्यपरोपणसमुत्थमांसदानं केवलं निर्घृणत्व-
मेव व्यनक्ति अथ न प्रदानमात्रं पशुवधक्रियायाः फ-
लं किं तु भूत्यादिकं यदाह श्रुतिः "श्वेतं वायव्यमज-

मालभेत भूतिकाम इत्यादि एतदपि व्यभिचारपि-शाचग्रस्तत्वादप्रमाणमेव भूतेश्चौपयिकान्तरैरपि सा-ध्यत्वादथ तत्र सर्वे हन्यमानानां छागादीनां प्रेत्य सद्गतिप्राप्तिरूपोऽस्त्येवोपकार इति चेद्वाङ्मात्रमेतत् प्रमाणाभावात् न हि ते निहताः पशवः सद्गतिला-भमुदितमनसः कस्मै चिदागत्य तथाभूतमात्मानं कथयन्ति अथास्त्यागमाख्यं प्रमाणं यथा।

औषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितं पुनः॥

इत्यादि नैवं तस्य पौरुषेयापौरुषेयविकल्पाभ्यां निराकरिष्यमाणत्वान्न च श्रौतेन विधिना पशुवि-शसनविधायिना स्वर्गावाप्तिरुपकार इति वाच्यं य-दि हि हिंसयाऽपि स्वर्गप्राप्तिः स्यात्तर्हि बाढं पि-हिता नरकपुरप्रतोल्यः शौनकिकादीनामपि स्वर्ग-प्राप्तिप्रसङ्गात् तथा च पठन्ति परमार्षाः।

यूपं छित्वा पशून् हत्वा कृत्वा रुधिरकर्द्दमम्।
यद्येवं गम्यते स्वर्गे नरके केन गम्यते॥

किं चापरिचितास्पष्टचैतन्यानुपकारिपशुहिंस-नेनापि त्रिदिवपदवीप्राप्तिस्तदा परिचितस्पष्टचैत-न्यपरमोपकारिमातापित्रादिव्यापादनेन यज्ञकारि-णामधिकतरपदप्राप्तिः प्रसज्यते अथाचिन्त्यो हि म-णिमन्त्रौषधीनां प्रभाव इति वचनाद्वैदिकमन्त्राणा-

मचिन्त्यप्रभावत्वात् तत्संस्कृतपशुवधे सम्भवत्येव स्वर्गप्राप्तिरिति चेन्न इह लोके विवाहगर्भाधानजातकर्मादिषु तन्मन्त्राणां व्यभिचारोपलम्भाददृष्टे स्वर्गादावपि तद्व्यभिचारो ऽनुमीयते दृश्यन्ते हि वेदोक्तमन्त्रसंस्कारविशिष्टेभ्यो ऽपि विवाहादिभ्यो ऽनन्तरं वैधव्याल्पायुष्कतादारिद्र्याद्युपद्रवविधुराः परःशताः परे च मन्त्रसंस्कारविनाकृतेभ्यो ऽनन्तरं तद्विपरीताः अथ तत्र क्रियावैगुण्यं विसंवादहेतुरिति चेन्न संशयानिवृत्तेः किं तत्र क्रियावैगुण्यात्फले विसंवादः किं वा मन्त्राणामसामर्थ्यादिति न निश्चयः तेषां फलेनाविनाभावासिद्धेः अथ यथा युष्मन्मते "आरोग्गं बोहि लाभं समाहिवरमुत्तमंदेतुम्" इत्यादीनां वाक्यानां लोकान्तर एव फलमिष्यते एवमस्मदभिमतवेदवाक्यानामपि नेह जन्मनि फलमिति किं न प्रतिपद्यते ततश्च विवाहादौ नोपलम्भावकाश इति चेदहो वचनवैचित्री यथा वर्त्तमानजन्मनि विवाहादिषु प्रयुक्तैर्मन्त्रसंस्कारैरागामिनि जन्मनि तत्फलमेव द्वितीयादिजन्मान्तरेष्वपि विवाहादीनामेव प्रवृत्तिधर्माणां पुण्यहेतुत्वाङ्गीकारे ऽनन्तभवानुसन्धानं प्रसज्यते एवं च न कदा चन संसारस्य परिसमाप्तिस्तथा च न कस्य चिदपवर्गप्राप्तिरिति प्राप्तं भवदभिमतवेदस्यापर्यवसितसंसारवल्लरीमूलकन्दत्वम् आरोग्यादिप्रार्थना तु असत्यामृषा*

* भाषा नामनी ।

भाषापरिणामविशुद्धिकारणत्वान्न दोषाय तत्र हि भावारोग्यादिकमेव विवक्षितं तच्च चातुर्गतिकसंसारलक्षणभावरोगपरिक्षयस्वरूपत्वादुत्तमफलं तद्विषया च प्रार्थना कथमिव विवेकिनामनादरणीया न च तज्जन्यपरिणामविशुद्धेस्तत्फलं न प्राप्यते सर्ववादिनां भावशुद्धेरपवर्गफलसम्पादनेऽविप्रतिपत्तेरिति न च वेदनिवेदिता हिंसा न कुत्सिता सम्यग्दर्शनज्ञानसम्पन्नैरर्चिर्मार्गप्रपन्नैर्वेदान्तवादिभिश्च गर्हितत्वात् तथा च तत्त्वदर्शिनः पठन्ति।

देवोपहारव्याजेन यज्ञव्याजेन येऽथवा।
घ्नन्ति जन्तून् गतघृणा घोरं ते यान्ति दुर्गतिम्॥
वेदान्तिका अप्याहुः।
अन्धे तमसि मज्जामः पशुभिर्ये यजामहे।
हिंसा नाम भवेद्धर्मो न भूतो न भविष्यति॥

तथा अग्निर्मामेतस्माद्धिंसाकृतादेनसो मुञ्चतु छान्दसत्वान्मोचयतु इत्यर्थ इति। व्यासेनाप्युक्तम्

ज्ञानपालिपरिक्षिप्ते ब्रह्मचर्यदयाम्भसि।
स्नात्वातिविमले तीर्थे पापपङ्कापहारिणि॥
ध्यानाग्नौ जीवकुण्डस्थे दममारुतदीपिते।
असत्कर्मसमित्क्षेपै रग्निहोत्रं कुरूत्तमम्॥२॥
कषायपशुभिर्दुष्टै धर्मकामार्थनाशकैः।
शममन्त्रहुतैर्यज्ञं विधेहि विहितं बुधैः॥ ३॥
प्राणिघातात्तु यो धर्ममीहते मूढमानसः।

स वाञ्छति सुधावृष्टिं कृष्णाहिमुखकोटरात् ॥४॥

इत्यादि यच्च याज्ञिकानां लोकपूज्यत्वोपलम्भादित्युक्तं तदप्यसारम् अबुधा एव हि पूजयन्ति तान् न तु विविक्तबुद्धयः अबुधपूज्यता तु न प्रमाणं तस्याः सारमेयादिष्वप्युपलम्भात् यदप्यभिहितं देवतातिथिपितृप्रीतिसंपादकत्वाद्वेदविहिता हिंसा न दोषायेति तदपि वितथं यतो देवानां संकल्पमात्रोपनताभिमताहारपुद्गलरसास्वादसुहितानां वैक्रियशरीरत्वात् युष्मदावर्जितजुगुप्सितपशुमांसाद्याहुतिग्रहीताविच्छैव दुःसंभवा औदारिकशरीरिणामेव तदुपादानयोग्यत्वात् प्रक्षेपाहारस्वीकारे च देवानां मन्त्रमयदेहत्वाभ्युपगमाबाधः न च तेषां मन्त्रमयदेहत्वं भवत्पक्षे न सिद्धं चतुर्थ्यन्तपदमेव देवता इति जैमिनिवचनप्रामाण्यात् तथा च मृगेन्द्रः

शब्देतरत्वे युगपद्भिन्नदेशेषु यष्टृषु ।
न सा प्रयाति सांनिध्यं मूर्तत्वादस्मदादिवत् ॥

इति सेति देवता हूयमानस्य च वस्तुनो भस्मीभावमात्रोपलम्भात्तदुपयोगजनिता देवानां प्रीतिः प्रलापमात्रम् अपि च योऽयं त्रेताग्निः स त्रयस्त्रिंशत्कोटिदेवतानां मुखम् "अग्निमुखा वै देवा" इति श्रुतेः ततश्चोत्तममध्यमाधमदेवानामेकेनैव मुखेन भुञ्जानानामन्योच्छिष्टभुक्तिप्रसङ्गः तथा च ते तुरुष्केभ्योऽप्यतिरिच्यन्ते तेऽपि तावदेकत्रैवामत्रे भुञ्जते न पुनरेकेनैव

वदनेन किंच एकस्मिन् वपुषि वदनबाहुल्यं क्वचन श्रूयते यत्पुनरनेकशरीरेष्वेकं मुखमिति मद्दास्वयं सर्वेषां च देवानामेकस्मिन्नेव मुखेऽङ्गीकृते यदा केन चिदेको देवः पूजादिनाऽऽराद्धोऽन्यश्च निन्दादिना विराद्धस्ततश्चैकेनैव मुखेन युगपदनुग्रहनिग्रहवाक्योच्चारणासंकरः प्रसज्येत अन्यच्च मुखं देहस्य नवमो भागस्तदपि येषां दाहात्मकं तेषामेकैकशः सकलदेहदाहात्मकत्वं त्रिभुवनभस्मीकरणपर्यवसितमेव संभाव्यत इत्यलमतिचर्चया यच्च कारीरीयज्ञादौ वृष्ट्यादिफले ऽव्यभिचारस्तत्प्रीणितदेवतानुग्रहहेतुक उक्तः सोऽप्यनैकान्तिकः क्वचिद्व्यभिचारस्यापि दर्शनाद्यत्रापि न व्यभिचारस्तत्रापि न त्वदाहिताहुतिभोजनजन्मा तदनुग्रहः किं तु स देवताविशेषोऽतिशयज्ञानी स्वोद्देशनिर्वर्तितं पूजोपचारं यदा स्वस्थानावस्थितः सन् जानीते तदा तत्कर्त्तारं प्रति प्रसन्नचेतोवृत्तिस्तत्कार्याणीच्छावशात्साधयति अनुपयोगादिना पुनरजानानो जानानो ऽपि वा पूजाकर्तुरभाग्यसहकृतः सन्न साधयति द्रव्यक्षेत्रकालभावादिसहकारिसाचिव्यापेक्षस्यैव कार्योत्पादस्योपलम्भात् स च पूजोपचारः पशुविशसनव्यतिरिक्तैः प्रकारान्तरैरपि सुकरस्तत्किमनया पापैकफलया शौनिकवृत्त्या यच्च छगलजाङ्गलहोमात्परराष्ट्रवशीकृतिसिद्ध्या देव्याः परितोषानुमानं तत्र कः किमाह कासां चित् क्षुद्रदेवतानां तथैव प्रत्यङ्गीकारात् केवलं तत्रापि

तद्दस्तुदर्शनस्नानादिनैव परितोषो न पुनस्तद्भुक्त्या निम्बपत्रकटुकतैलधूमांशादीनां हूयमानद्रव्यादीनामपि तद्भोज्यत्वप्रसङ्गात् परमार्थतस्तु तत्तत्सहकारिसमवधानसचिवाराधकानां भक्तिरेव तत्तत्फलं जनयति अचेतने चिन्तामण्यादौ तथादर्शनात् अतिथीनां तु प्रीतिः संस्कारसंपन्नपक्वान्नादिनापि साध्या तदर्थं महोक्षमहाजादिप्रकल्पनं निर्विवेकतामेव ख्यापयति पितॄणां पुनः प्रीतिरनैकान्तिकी श्राद्धादिविधानेनापि भूयसां संतानवृद्धेरनुपलब्धेः तदविधानेऽपि च केषांचिद्गर्दभशूकराजादीनामिव सुतरां तद्दर्शनात् ततश्च श्राद्धादिविधानं मुग्धजनविप्रतारणमात्रफलमेव ये हि लोकान्तरं प्राप्तास्ते तावत्स्वकृतकर्मानुसारेण सुरनारकादिगतिषु सुखमसुखं वा भुञ्जाना एवासते ते कथमिव तनयादिभिरावर्जितं पिण्डमुपभोक्तुं स्पृहयालवोऽपि स्युः तथा च युष्मद्यूथिनः पठन्ति।

मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम्।
तन्निर्वाणप्रदीपस्य स्नेहः संवर्द्धयेच्छिखाम्॥

इति कथं श्राद्धविधानाद्यर्जितं पुण्यं तेषां समीपमुपैतु तदन्यकृतत्वात् तस्य जडत्वान्निश्चरणत्वाच्च अथ तेषामुद्देशेन श्राद्धादिविधानेऽपि पुण्यं दातुरेव तनयादेः स्यादिति चेन्न तेन तज्जन्यपुण्यस्य स्वाध्यवसायादुत्तारितत्वादेवं च तत्पुण्यं नैवेतरस्यापि

इति विचाल एव विलोचनं त्रिशङ्कुज्ञातेन किं तु पापानुबन्धिपुण्यत्वात् तत्त्वतः पापमेव अथ विप्रोपभुक्तं तेभ्य उपतिष्ठत इति चेत्क इवैतत्प्रत्येतु विप्राणामेव मेदुरोदरतादर्शनात् तद्वपुषि च तेषां संक्रमः श्रद्धातुमपि न शक्यते भोजनावसरे तत्संक्रमलिङ्गस्य कस्याप्यनवलोकनात् विप्राणामेव च तृप्तेः साक्षात्करणात् यदि परं त एव स्थूलकवलैराकुलतरमतिगाद्धर्याद्भक्षयन्तः प्रेतप्राया इति मुधैव श्राद्धादिविधानं यदपि गयाश्राद्धादियाचनमुपलभ्यते तदपि तादृशविप्रलम्भकविभङ्गज्ञानवत्तरादिकृतमेव निश्चेयं यदप्युदितम् आगमश्चात्र प्रमाणमिति तदप्यप्रमाणं स हि पौरुषेयो वा स्यादपौरुषेयो वा पौरुषेयश्चेत् सर्वज्ञकृतस्तदितरकृतो वा आद्यपक्षे युष्मन्मतव्याहतिस्तथा च भवत्सिद्धान्तः।

अतीन्द्रियाणामर्थानां साक्षाद्द्रष्टा न विद्यते।
नित्येभ्यो वेदवाक्येभ्यो यथार्थत्वविनिश्चयः॥

द्वितीयपक्षे तु तत्र दोषवत्कर्तृकत्वेनानाश्वासप्रसङ्गः अपौरुषेयश्चेन्न सम्भवत्येव स्वरूपनिराकरणात् तुरङ्गशृङ्गवत् तथाह्युक्तिर्वचनमुच्यत इति चेति पुरुषक्रियानुगतं रूपमस्य एतत्क्रियाभावे कथं भवितुमर्हति नचैतत्केवलं क्वचिद्ध्वनदुपलभ्यते उपलब्धावप्यदृश्यवक्त्राशङ्कासम्भवात् तस्माद्यद्वचनं तत्पौरुषेयमेव वर्णात्मकत्वात्कुमारसम्भवादिवचनवत् वचनात्मकश्च वेदस्तथाचाहुः।

तात्वादिजन्मा ननु वर्णवर्गो
वर्णात्मको वेद इति स्फुटं च।
पुंसश्च तात्वादि ततः कथं स्या-
दपौरुषेयोऽयमिति प्रतीतिः॥ इति

श्रुतेरपौरुषेयत्वमुररीकृत्यापि तावद्भवद्भिरपि तदर्थव्याख्यानं पौरुषेयमेवाङ्गीक्रियते अन्यथाऽग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्र श्वमांसम्भक्षयेदिति किं नार्थो नियामकाभावात् ततो वरं सूत्रमपि पौरुषेयमभ्युपगन्तव्यम् अस्तु वाऽपौरुषेयस्तथापि तस्य न प्रामाण्यम् आप्तपुरुषाधीना हि वाचां प्रमाणतेति एवं च तस्याप्रामाण्ये तदुक्तस्तदनुपातिस्मृतिप्रतिपादितश्च हिंसात्मको यागश्राद्धादिविधिः प्रामाण्यविधुर एवेति अथ योऽयं न हिंस्यात्सर्वभूतानीत्यादिना हिंसानिषेधः स औत्सर्गिको मार्गः सामान्यतो विधिरित्यर्थः ततश्चापवादेनोत्सर्गस्य बाधितत्वान्न श्रौतो हिंसाविधिर्दोषायोत्सर्गापवादयोरपवादो विधि र्बलीयानिति न्यायाद्भवतामपि हि न खल्वेकान्तेन हिंसानिषेधः तत्तत्कारणजाते पृथिव्यादिप्रतिसेवनानामनुज्ञानात् ग्लानाद्यर्थमसंस्तरे आधाकर्मादिग्रहणभणनाच्च अपवादपदं च याज्ञिकीहिंसा देवतादिप्रीतेः पुष्टालम्बनत्वादिति परमाशङ्क्य स्तुतिकार आह नोत्सृष्टमित्यादि अन्यार्थमिति मध्यवर्त्ति पदं डमरुकमणिन्यायेनोभयत्रापि सम्बन्धनीयम् अन्या-

र्थमुत्सृष्टम् अन्यस्मै कार्याय प्रयुक्तम् उत्सर्गवाक्यमन्यार्थप्रयुक्तेन वाक्येन नापोद्यते नापवादगोचरीक्रियते यमेवार्थमाश्रित्य शास्त्रे उत्सर्गः प्रवर्तते तमेवाश्रित्यापवादोऽपि प्रवर्तते तयोर्निम्नोन्नतादिव्यवहारवत्परस्परसापेक्षत्वेनैकार्थसाधनविषयत्वात् यथा जैनानां संयमपरिपालनार्थं नवकोटिविशुद्धाहारग्रहणमुत्सर्गः तथाविधद्रव्यक्षेत्रकालभावापत्सु च निपतितस्य गत्यन्तराभावे पञ्चकादियतनयाऽनेषणीयादिग्रहणमपवादः सोऽपि च संयमपरिपालनार्थमेव न च मरणैकशरणस्य गत्यन्तराभावोऽसिद्ध इति वाच्यम्।

सव्वत्थसञ्जमंसं जमाउअप्पाणमेवरक्खिज्जा।
मुच्चइ अइवायाउपुणोविसोहीनयाविरई॥

इत्यागमात् तथा आयुर्वेदेऽपि यमेवैकं रोगमधिकृत्य कस्यांचिदवस्थायां किंचिद्वस्त्वपथ्यं तदेवावस्थान्तरे तत्रैव रोगे पथ्यम्।

उत्पद्यते हि सावस्था देशकालामयान् प्रति।
यस्यामकार्यं कार्यं स्यात्कर्म कार्यं तु वर्जयेत्॥

इति वचनात् यथा बलवदादेर्ज्वरिणो लङ्घनं क्षीणधातोस्तु तद्विपर्यय एवं देशाद्यपेक्षया ज्वरिणोऽपि दधिपानादि योज्यं तथा च वैद्याः।

कालाविरोधि निर्दिष्टं ज्वरादौ लङ्घनं हितम्।
ऋतेऽनिलश्रमक्रोधशोककामकृतज्वरान्॥

एवं च यः पूर्वमपथ्यपरिहारो यत्र तत्रैवावस्थान्तरे तस्यैव परीभोगः स खलूभयोरपि तस्यैव रोगस्य शमनार्थ इति सिद्धमेकविषयत्वमुत्सर्गापवादयोरिति भवतां चोत्सर्गोऽन्यार्थोऽपवादश्चान्यार्थः न हिंस्यात्सर्वभूतानीत्युत्सर्गो हि दुर्गतिनिषेधार्थः अपवादस्तु वैदिकहिंसाविधिर्दैवताऽतिथिपितृप्रीतिसंपादनार्थः अतश्च परस्परनिरपेक्षत्वे कथमुत्सर्गोऽपवादेन बाध्यते तुल्यबलयोर्विरोध इति न्यायात् भिन्नार्थत्वेऽपि तेन तद्बाधनेऽतिप्रसङ्गात् न च वाच्यं वैदिकहिंसाविधिरपि स्वर्गहेतुतया दुर्गतिनिषेधार्थ एवेति तस्योक्तयुक्त्या स्वर्गहेतुत्वनिर्लोठनात् तमन्तरेणापि च प्रकारान्तरैरपि तत्सिद्धिभावाद्गत्यन्तराभावे ह्यपवादपक्षकक्षीकारः न च वयमेव यागविधेः सुगतिहेतुत्वं नाङ्गीकुर्महे किं तु भवदाप्ता अपि यदाह व्यासमहर्षिः

पूजया विपुलं राज्यमग्निकार्येण संपदः ।
तपः पापविशुद्ध्यर्थं ज्ञानं ध्यानं च मुक्तिदम् ॥

अत्राग्निकार्यशब्दवाच्यस्य यागादिविधेरुपायान्तरैरपि लभ्यानां संपदामेव हेतुत्वं वदन्नाचार्यस्तस्य सुगतिहेतुत्वमर्थात्कदर्थितवानेव तथा च स एव भावाग्निहोत्रं ज्ञानपालीत्यादिश्लोकैः स्थापितवान् तदेवं स्थिते तेषां वादिनां चेष्टामुपमया दूषयति स्वपुत्रेत्यादि परेषां भवत्प्रणीतवचनपराङ्मुखानां

स्फुरितं चेष्टितं स्वपुत्रघातान्नृपतित्वलिप्सासब्रह्मचारि निजसुतनिपातनेन राज्यप्राप्तिमनोरथसदृशं यथा किल कश्चिद्विपश्चित्पुरुषः परुषाशयतया निजमङ्गजं व्यापाद्य राज्यश्रियं प्राप्तुमीहते न च तस्य तत्प्राप्तावपि पुत्रघातपातककलङ्कपङ्कः क्वचिदुपयाति एवं वेदविहितहिंसया देवतादिप्रीसिद्धावपि हिंसासमुत्थं दुष्कृतं न खलु पराहन्यतेऽत्र च लिप्साशब्दं प्रयुञ्जानः स्तुतिकारो ज्ञापयति यथा तस्य दुराशयस्यासदृशतादृक्कर्मणा निर्मूलितसत्कर्मणो राज्यप्राप्तौ केवलं समीहामात्रमेव न पुनस्तत्सिद्धिरेवं तेषां दुर्वादिनां वेदविहितहिंसामनुतिष्ठतामपि नृपूज्यत्वे देवतादिपरितोषणे च मनोराज्यमेव न पुनस्तेषामुत्तमजनपूज्यत्वमिन्द्रादिदिवौकसां च तृप्तिः प्रागुक्तयुक्त्या निराकृतत्वादिति काव्यार्थः ॥११॥

सांप्रतं नित्यपरोक्षज्ञानवादिनां मीमांसकभेदभट्टानामेकात्मसमवायिज्ञानान्तरवेद्यज्ञानवादिनां च यौगानां मतं विकुट्टयन्नाह

**स्वार्थावबोधक्षम एव बोधः**
**प्रकाशते नार्थकथाऽन्यथा तु ॥**
**परे परेभ्यो भयतस्तथापि**
**प्रपेदिरे ज्ञानमनात्मनिष्ठम् ॥१२॥**

बोधो ज्ञानं स च स्वार्थावबोधक्षम एव प्रकाशते स्वस्यात्मस्वरूपस्यार्थस्य योऽवबोधः परिच्छेदस्तत्र क्षम एव समर्थ एव प्रतिभासत इत्ययोगव्यवच्छेदः प्रकाशत इति क्रियया ऽवबोधस्य प्रकाशरूपत्वसिद्धेः सर्वप्रकाशानां तु स्वार्थप्रकाशकत्वेन बोधस्यापि तत्सिद्धिर्विपर्यये दूषणमाह नार्थकथान्यथात्विति अन्यथेति अर्थप्रकाशने ऽविवादात् ज्ञानस्य स्वसंविदितत्वाऽनभ्युपगमे ऽर्थकथैव न स्यात् अर्थकथा पदार्थसंबन्धिनी वार्त्ता सदसद्रूपात्मकं स्वरूपमिति यावत् तु शब्दोवधारणे भिन्नक्रमश्च स चार्थकथया सह योजित एवं यदि हि ज्ञानं स्वसंविदितं नेष्यते तदा तेनात्मज्ञानाय ज्ञानान्तरमपेक्षणीयं तेनाप्यपरमित्याद्यनवस्था ततो ज्ञानं तावत्स्वावबोधव्यग्रतामग्नम् अर्थस्तु जडतया स्वरूपज्ञापनासमर्थ इति को नामार्थस्य कथामपि कथयेत् तथाप्येवं ज्ञानस्य स्वसंविदितत्वे युक्त्या घटमानेऽपि परे तीर्थान्तरीयाः ज्ञानं कर्मतापन्नमनात्मनिष्ठं न विद्यते आत्मनः स्वस्य निष्ठा निश्चयो यस्य तदनात्मनिष्ठं अस्वसंविदितमित्यर्थः प्रपेदिरे प्रपन्नाः कुत इत्याह परेभ्यो भयतः परे पूर्वपक्षवादिनस्तेभ्यः सकाशात् ज्ञानस्य स्वसंविदितत्वं नोपपद्यते स्वात्मनि क्रियाविरोधादित्युपालम्भसम्भावनासम्भवं यद्भयं तस्मात्तदाश्रित्येत्यर्थः इत्यमक्षरगमनिकां विधाय भावार्थः प्रपञ्च्यते भट्टास्तावदिदं वदन्ति यत् ज्ञानं स्वसंविदितं न भवति स्वा-

त्मनि क्रियाविरोधान्न हि सुशिक्षितो ऽपि नटवटुः स्वस्कन्धमधिरोढुं पटु र्न च सुतीक्ष्णाप्यसिधारा स्वं छेत्तुमाहितव्यापारा ततश्च परोक्षमेव ज्ञानमिति तदेतन्न सम्यक् यतः किमुत्पत्तिः स्वात्मनि विरुध्यते ज्ञप्तिर्वा यद्युत्पत्तिः सा विरुध्यतां न हि वयमपि ज्ञानमात्मानमुत्पादयतीति मन्यामहे अथ ज्ञप्ति र्नैयमात्मनि विरुद्धा तदात्मनैव ज्ञानस्य स्वहेतुभ्य उत्पादात् प्रकाशात्मनैव प्रदीपालोकस्य अथ प्रकाशात्मैव प्रदीपालोक उत्पन्न इति परप्रकाशको ऽस्तु आत्मानमप्येतावन्मात्रेणैव प्रकाशयतीति को ऽयं न्याय इति चेत्तत्किं तेन वराकेणाप्रकाशितेनैव स्थातव्यम् आलोकान्तराद्वाऽस्य प्रकाशेन भवितव्यं प्रथमे प्रत्यक्षबाधो द्वितीये ऽपि सैवानवस्थापत्तिश्च अथ नासौ स्वमपेक्ष्य कर्मतया चकास्तीत्यस्वप्रकाशकः स्वीक्रियते आत्मानं न प्रकाशयतीत्यर्थः प्रकाशरूपतया उत्पन्नत्वात्स्वयंप्रकाशत एवेति चेच्चिरंजीव न हि वयमपि ज्ञानं कर्मतयैव प्रतिभासमानं स्वसंवेद्यं ब्रूमः ज्ञानं स्वयं प्रतिभासत इत्यादावकर्मकस्य तस्य चकासनात् यथा तु ज्ञानं स्वं जानामीति कर्मतयापि तज्ज्ञाति तथा प्रदीपः स्वं प्रकाशयतीत्ययमपि कर्मतया प्रथत एव यस्तु स्वात्मनि क्रियाविरोधो दोष उद्भावितः सोऽयुक्तो ऽनुभवसिद्धे ऽर्थे विरोधासिद्धेः घटमहं जानामीत्यादौ कर्तृकर्मवत् ज्ञप्तेरप्यवभासमानत्वात् न चाप्रत्यक्षोप-

लम्भस्यार्थदृष्टिः प्रसिध्यति न च ज्ञानान्तरादुपलम्भ-
सम्भावना तस्याप्यनुपलब्धस्य प्रस्तुतोपलम्भप्रत्यक्षी-
काराभावात् उपलम्भान्तरसम्भावने चानवस्था अ-
र्थोपलम्भात्तस्योपलम्भे ऽन्योन्याश्रयदोषः अथार्थप्रा-
कट्यमन्यथा नोपपद्यते यदि ज्ञानं तस्मादित्यर्थापत्त्या
तदुपलम्भ इति चेन्न तस्या अपि ज्ञापकत्वेना-
ज्ञापकत्वायोगात् अर्थापत्त्यन्तरात्तज्ज्ञानेऽनवस्थेतरे
तराश्रयदोषापत्तेस्तदवस्थः परिभवः तस्मादर्थो-
न्मुखतयेव स्वोन्मुखतयापि ज्ञानस्य प्रतिभासा-
त्स्वसंविदितत्वं नन्वनुभूतेरनुभाव्यत्वे घटादिवदनु-
भूतित्वप्रसङ्गः प्रयोगस्तु ज्ञानमनुभवरूपमप्यनुभूतिर्न
भवति अनुभाव्यत्वाद् घटवत् अनुभाव्यं च भ-
वद्भिरिष्यते ज्ञानं स्वसंवेद्यत्वात् नैवं ज्ञातुर्ज्ञा-
तृत्वेनेवानुभूतेरनुभूतित्वेनैवानुभवात् नचानुभूतेर-
नुभाव्यत्वं दोषोऽर्थापेक्षयानुभूतित्वात्स्वापेक्षयाचानु-
भाव्यत्वात्स्वपितृपुत्रापेक्षयैकस्य पुत्रत्वपितृत्ववद्विरो-
धाभावात् अनुमानाच्च स्वसंवेदनसिद्धिस्तथा हि
ज्ञानं स्वयं प्रकाशमानमेवार्थं प्रकाशयति प्रकाश-
कत्वात्प्रदीपवत् संवेदनस्य प्रकाश्यत्वात्प्रकाशकत्व-
मसिद्धमिति चेन्न अज्ञाननिरासादिद्वारेण प्रकाश-
कत्वोपपत्तेः ननु नेत्रादयः प्रकाशका अपि स्वं न
प्रकाशयन्तीति प्रकाशकत्वहेतोरनैकान्तिकतेति चे-
न्नात्र नेत्रादिभिरनैकान्तिकता तेषां लब्ध्युपयोग-
लक्षणभावेन्द्रियरूपाणामेव प्रकाशकत्वात् भावेन्द्रि-

यायां च स्वसंवेदनरूपतैवेति न व्यभिचारः तथा संवित् स्वप्रकाशार्थप्रतीतित्वात् यः स्वप्रकाशो न भवति नासावर्थप्रतीति यथा घटः तदेवं सिद्धेऽपि प्रत्यक्षानुमानाभ्यां ज्ञानस्य स्वसंविदितत्वे संप्रयोगे इन्द्रियबुद्धिजन्मलक्षणं ज्ञानं ततोऽर्थपाकट्य तस्मादर्थापत्तिस्तया प्रवर्तकज्ञानस्योपलम्भ इत्येवंरूपा त्रिपुटीप्रत्यक्षकल्पना भट्टानां प्रयासफलैव यौगास्त्वाहुः ज्ञानं स्वान्यप्रकाश्यम् ईश्वरज्ञानान्यत्वे सति प्रमेयत्वात् घटवत् समुत्पन्नं हि ज्ञानमेकात्मसमवेताऽनन्तरोद्भविष्णुमानसप्रत्ययेणैव लक्ष्यते न पुनः स्वेन न चैवमनवस्था अर्थावसायिविज्ञानोत्पादमात्रेणैवार्थसिद्धौ प्रमातुः कृतार्थत्वात् अर्थज्ञानजिज्ञासायां तु तत्रापिज्ञानमुत्पद्यत एवेति तदयुक्तं पक्षस्य प्रत्यनुमानबाधितत्वेन हेतोः कालात्ययापदिष्टत्वात् तथा हि विवादास्पदं ज्ञानं स्वसंविदितं ज्ञानत्वादीश्वरज्ञानवत् न चायं वाद्यप्रतीतोदृष्टान्तः पुरुषस्येश्वरतया जैनैरपि स्वीकृतत्वेन तज्ज्ञानस्य तेषां प्रसिद्धेः व्यर्थविशेष्यश्चायं तव हेतुः समर्थविशेषणोपादानेनैव साध्यसिद्धेरग्निसिद्धौ धूमवत्त्वे सति द्रव्यत्वादिवत् ईश्वरज्ञानान्यत्वादित्येतावतैव गतत्वान्न ह्यीश्वरज्ञानादन्यत्स्वसंविदितमप्रमेयं वा ज्ञानमस्ति यद्व्यवच्छेदाय प्रमेयत्वादिति क्रियेत भवन्मते तदन्यज्ञानस्य सर्वस्य प्रमेयत्वात्-अप्रयोजकश्चायं हेतुः सोपाधित्वात् साधनाव्यापकः

साध्येन समव्याप्तिश्च खलूपाधिरभिधीयते तत्पुत्रत्वादिना श्यामत्वे साध्ये शाकाद्याहारपरिणामवत् उपाधिश्चात्र जडत्वं तथाहीश्वरज्ञानाऽन्यत्वे प्रमेयत्वे च सत्यपि यदेव जडस्तम्भादि तदेव स्वस्मादन्येन प्रकाश्यते स्वप्रकाशे परमुखप्रेक्षित्वं हि जडस्य लक्षणं न च ज्ञानं जडस्वरूपम् अतः साधनाव्यापकत्वं जडत्वस्य साध्येन समव्याप्तिकत्वं चास्य स्पष्टमेव जाड्यं विहाय स्वप्रकाशाभावस्य तं वा त्यक्त्वा जाड्यस्य क्वचिदप्यदर्शनादिति यच्चोक्तं "समुत्पन्नं हि ज्ञानमेकात्मसमवेते" त्यादि तदप्यसत्यम् इत्थमर्थज्ञानतज्ज्ञानयोरुत्पद्यमानयोः क्रमानुपलक्षणात् आशूत्पादात् क्रमानुपलक्षणमुत्पलपत्रशतव्यतिभेदवदिति चेत्तन्न जिज्ञासाव्यवहितस्यार्थज्ञानस्योत्पादप्रतिपादनात् न च ज्ञानानां जिज्ञासासमुत्पाद्यत्वं घटते अजिज्ञासितेष्वपि योग्यदेशेषु विषयेषु तदुत्पादप्रतीतेर्न चार्थज्ञानमयोग्यदेशम् आत्मसमवेतस्यास्य समुत्पादादिति जिज्ञासामन्तरेणैवार्थज्ञाने ज्ञानोत्पादप्रसङ्गः अथोत्पद्यन्तां नामेदं को दोष इति चेन्न ते च मे च तज्ज्ञानज्ञानेऽप्यपरज्ञानोत्पादप्रसङ्गस्तत्रापि चैवमेवायम् इत्यपरापरज्ञानोत्पादपरंपरायामेवात्मनो व्यापारान्न विषयान्तरसंचारः स्यादिति तस्मादर्थज्ञानं तदात्मबोधं प्रति अनपेक्षितज्ञानान्तरव्यापारं यथा गोचरान्तरग्राहिज्ञानात्प्राग्भाविगोचरान्तरग्राहिधारावाहिज्ञान-

प्रबन्धस्यान्त्यज्ञानं ज्ञानं च विवादाध्यासितं रूपादि-ज्ञानमिति न ज्ञानस्य ज्ञानान्तरज्ञेयता युक्तिं सहत इति काव्यार्थः ॥ १२ ॥

अथ ये ब्रह्माद्वैतवादिनो ऽविद्याऽपरपर्य्यायमायावशात्प्रतिभासमानत्वेन विश्वत्रयवर्त्तिवस्तुप्रपञ्चमपारमार्थिकं समर्थयन्ते तन्मतमुपहसन्नाह।

**माया सती चेद्द्वयतत्वसिद्धि-**
**रथासती हन्त कुतः प्रपञ्चः।**
**मायैव चेदर्थसहा च तत्किं**
**माता च बन्ध्या च भवत्परेषाम्॥१३॥**

तैर्वादिभिस्तात्त्विकात्मब्रह्मव्यतिरिक्ता या माया ऽविद्या प्रपञ्चहेतुः परिकल्पिता सा सद्रूपा ऽसद्रूपा वा द्वयी गतिः सती सद्रूपा चेत्तदा द्वयतत्वसिद्धिर्द्वावयवौ यस्य तद्द्वयं तथाविधं यत्तत्वं परमार्थस्तस्य सिद्धिरयमर्थः एकं तावत्त्वदभिमतं तात्त्विकमात्मब्रह्म द्वितीया च माया तत्वरूपा सद्रूपतयाङ्गीक्रियमाणत्वात् तथा चाद्वैतवादस्य मूले निहितः कुठारः अथेति पक्षान्तरद्योतने यदि असती गगनाम्भोजवदवस्तुरूपा सा माया ततो हन्तेत्युपदर्शने आश्चर्य्ये वा कुतः प्रपञ्चः अयं त्रिभुवनोदरविवरवित्तिपदार्थसार्थरूपप्रपञ्चः कुतो न कुतोऽपि

सम्भवीत्यर्थः मायाया अवस्तुत्वेनाभ्युपगमाद्वस्तुनश्च तुरङ्गशृङ्गस्येव सर्वोपाख्याविरहितस्य साचात्क्रियमाणेहृशविवर्तजनने ऽसमर्थत्वात् किलेन्द्रजालादौ मृगतृष्णादौ वा मायोपदर्शितार्थानामर्थक्रियायामसामर्थ्यं दृष्टम् अत्र तु तदुपलम्भात्कथं मायाव्यपदेशः श्रद्धीयताम् अथ मायापि भविष्यति अर्थक्रियासमर्थपदार्थोपदर्शनक्षमा च भविष्यति इति चेतर्हि स्ववचनविरोधः न हि भवति माता च वन्ध्या चेति एतमेवार्थं हृदि निधायोत्तरार्द्धमाह मायैवचेदित्यादि अत्र चकारोप्यर्थो ऽपिश्च समुच्चयार्थो ऽग्रेतनचकारश्च तथा उभयोश्च समुच्चयार्थयोर्यौगपद्यद्योतकत्वं प्रतीतमेव यथा रघुवंशे ते च "प्रापुरुदन्वन्तं बुबुधे चादिपूरुष" इति तदयं वाक्यार्थो माया च भविष्यति अर्थसहा च भविष्यति अर्थसहा अर्थक्रियासमर्थपदार्थोपदर्शनक्षमा चेच्छब्दो ऽत्र योज्यते इति चेत् एवं परमाशङ्का तस्य स्ववचनविरोधमुद्भावयति तत्किं भवत्परेषां माता च वन्ध्या च किमिति सम्भावने सम्भाव्यते एतत् भवतो ये परे प्रतिपक्षास्तेषां भवत्परेषां भवद्व्यतिरिक्तानां भवदाज्ञापृथग्भूतत्वेन तेषां वादिनां यन्माता च भविष्यति वन्ध्या च भविष्यतीत्युपहासः माता हि प्रसवधर्मिणी वनितोच्यते वन्ध्या च तद्विपरीता ततश्च वन्ध्या चेत्कथं माता माता चेत्कथं वन्ध्या तदेवं मायाया अवास्तव्या अप्यर्थसहत्वे ऽङ्गीक्रियमाणे प्रस्तुतवाक्यवत् स्पष्ट एव

स्ववचनविरोध इति समासार्थः व्यासार्थस्त्वयं ते वादिन इदं प्रणिगदन्ति तात्त्विकमात्मब्रह्मैवास्ति

"सर्वं खल्विदं ब्रह्म नेह नानास्ति किं चन।
आरामं तस्य पश्यन्ति न तत्पश्यति कश्चन" ॥

इति समयात् अयं तु प्रपञ्चो मिथ्यारूपः प्रतीयमानत्वाद्यदेवं तदेवं यथा शुक्तिशकले कलधौतं तथा चायं तस्मात्तथा तदेतद्भ्रान्तं तथा हि मिथ्यारूपत्वं तैः कीदृग् विवक्षितं किमत्यन्तासत्त्वमुतान्यस्यान्याकारतया प्रतीतत्वम् आहोस्विदनिर्वाच्यत्वं प्रथमपक्षे ऽसत्ख्यातिप्रसङ्गः द्वितीये विपरीतख्यातिस्वीकृतिः तृतीये तु किमिदम् अनिर्वाच्यत्वं निःस्वभावत्वं चेन्निसः प्रतिषेधार्थत्वे स्वभावशब्दस्यापि भावाभावयोरन्यतरार्थत्वे ऽसत्ख्यातिसत्ख्यात्यभ्युपगमप्रसङ्गः भावप्रतिषेधे ऽसत्ख्यातिरभावप्रतिषेधे सत्ख्यातिरिति प्रतीत्यगोचरत्वं निःस्वभावत्वमिति चेदत्रविरोधः स प्रपञ्चो हि न प्रतीयते चेत्कथं धर्मितयोपात्तः कथं च प्रतीयमानत्वं हेतुतयोपात्तं तथोपादाने वा कथं न प्रतीयते यथा प्रतीयते न तथेति चेत्तर्हि विपरीतख्यातिरियमभ्युपगता स्यात् किं चेयमनिर्वाच्यता प्रपञ्चस्य प्रत्यक्षबाधिता घटोऽयमित्याद्याकारं हि प्रत्यक्षं प्रपञ्चस्य सत्यतामेव व्यवस्यति घटादिप्रतिनियतपदार्थपरिच्छेदात्मनस्तस्योत्पादादितरेतरविविक्तवस्तूनामेव च प्रपञ्चशब्दवा-

च्यत्वात् अथ प्रत्यक्षस्य विधायकत्वात्कथं प्रतिषेधे सामर्थ्यं प्रत्यक्षं हि इदमिति वस्तुस्वरूपं गृह्णाति नान्यत्स्वरूपं प्रतिषेधति ।

आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः
नैकत्व आगमस्तेन प्रत्यक्षेण प्रबाध्यते ॥

इति वचनात् इति चेन्न अन्यरूपनिषेधमन्तरेण तत्स्वरूपपरिच्छेदस्याप्यसंपत्तेः पीतादिव्यवच्छिन्नं हि नीलं नीलमिति गृहीतं भवति नान्यथा केवलवस्तुस्वरूपप्रतिपत्तेरेवान्यप्रतिषेधप्रतिपत्तिरूपत्वात् मुण्डभूतलग्रहणे घटाभावग्रहणात् तस्माद्यथा प्रत्यक्षं विधायकं प्रतिपन्नं तथा निषेधकमपि प्रतिपत्तव्यम् अपि च विधायकमेव प्रत्यक्षमित्यङ्गीकृते यथा प्रत्यक्षेण विद्या विधीयते तथा किं नाविद्यापीति तथा च द्वैतापत्तिः ततश्च सुव्यवस्थितः प्रपञ्चः तदमी वादिनो ऽविद्याविवेकेन सन्मात्रं प्रत्यक्षात्प्रतियन्तोऽपि न निषेधकं तदिति ब्रुवाणाः कथं नोन्मत्ता इति सिद्धं प्रत्यक्षबाधितः पक्ष इति अनुमानबाधितश्च प्रपञ्चो मिथ्या न भवति असद्विलक्षणत्वादात्मवत् प्रतीयमानत्वं च हेतुर्ब्रह्मात्मना व्यभिचारी स हि प्रतीयते न च मिथ्या अप्रतीयमानत्वे त्वस्य तद्विषयवचसामप्रवृत्तेर्मूकतैव तेषां श्रेयसी साध्यविकलश्च दृष्टान्तः शुक्तिशकलधौतेऽपि प्रपञ्चान्तर्गतत्वेन अनिर्वचनीयतायाः साध्यमानत्वात् किं चेदमनुमानं प्र-

पञ्चाद्भिन्नमभिन्नं यदि भिन्नं तर्हि सत्यमसत्यं वा यदि सत्यं तद्वदेव प्रपञ्चस्यापि सत्यत्वं स्याद्द्वैतवाद-प्रकारे खड्ग*पातात् अथासत्यं तर्हि न किंचित्तेन साधयितुं शक्यमवस्तुत्वात् अभिन्नं चेत्प्रपञ्चस्वभाव-तया तस्यापि मिथ्यारूपत्वापत्ति मिथ्यारूपं च त-त्कथं स्वासाध्यसाधनायालम् एवं च प्रपञ्चस्यापि मि-थ्यरूपत्वासिद्धेः कथं परमब्रह्मणस्तात्विकत्वं स्याद्यतो बाह्यार्थाभावो भवेदिति अथ वा प्रकारान्तरेण स-न्मात्रलक्षणस्य परमब्रह्मणः साधनं दूषणं चोपन्य-स्यते ननु परमब्रह्मण एवैकस्य परमार्थसतो विधिरू-पस्य विद्यमानत्वात् प्रमाणविषयत्वम् अपरस्य द्वितीयस्य कस्य चिदप्यभावात् तथा हि प्रत्यक्षं तदावेद-दकमस्ति प्रत्यक्षं द्विधा भिद्यते निर्विकल्पकसविक-ल्पकभेदात् ततश्च निर्विकल्पकप्रत्यक्षात्सन्मात्रविषया त्तस्यैकस्यैव सिद्धिस्तथाचोक्तम्।

अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥

न च विधिवत्परस्परव्यावृत्तिरप्यध्यक्षत एव प्रतीयत इति द्वैतसिद्धिस्तस्य निषेधाविषयत्वात् "आहुर्विधातृ प्रत्यक्षं न निषेद्धृ" इत्यादिवचनात् यच्च सविकल्पकप्रत्यक्षं घटपटादिभेदसाधकं तदपि-सत्तारूपेणान्वितानामेतेषां प्रकाशकत्वात् सत्ताद्वैत-

* खड्गिपातात् २ पु० पाठः।

स्यैव साधकं सत्तायाश्च परमब्रह्मरूपत्वात् तदुक्तं "यदद्वैतं तद्ब्रह्मणो रूपमि"ति अनुमानादपि तत्सद्भावो विभाव्यत एव तथा हि विधिरेव तत्त्वं प्रमेयत्वात् यतः प्रमाणविषयभूतो ऽर्थः प्रमेयः प्रमाणानां च प्रत्यक्षानुमानागमोपमानार्थापत्तिसंज्ञकानां भावविषयत्वेनैव प्रवृत्तेस्तथाचोक्तम् ।

प्रत्यक्षाद्यवतारः स्याद्भावांशो गृह्यते यदा ।
व्यापारस्तदनुत्पत्तेरभावांशे जिघृक्षिते ॥

यच्चाभावाख्यं प्रमाणं तस्य प्रामाण्याभावान्न तत्प्रमाणं तद्विषयस्य कस्य चिदप्यभावात् यस्तु प्रमाणपञ्चकविषयः स तु विधिरेव तेनैव च प्रमेयत्वस्य व्याप्तत्वात् सिद्धं प्रमेयत्वेन विधिरेव तत्त्वं यत्तु न विधिरूपं तन्न प्रमेयं यथा खरविषाणं प्रमेयं चेदं निखिलं वस्तुतत्वं तस्माद्विधिरूपमेव अतो वा तत्सिद्धिः ग्रामारामादयः पदार्थाः प्रतिभासान्तःप्रविष्टाः प्रतिभासमानत्वात् यत्प्रतिभासते तत्प्रतिभासान्तःप्रविष्टं यथा प्रतिभासस्वरूपं प्रतिभासन्ते च ग्रामारामादयः पदार्थास्तस्मात्प्रतिभासान्तःप्रविष्टाः आगमोऽपि परमब्रह्मण एव प्रतिपादकः समुपलभ्यते "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति यदेजति यन्नेजति यद्दूरे यदन्तिके यदन्तरस्य सर्वस्य यदुत सर्वस्यास्य बाह्यत" इत्यादिः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो ऽनुमन्तव्य

इत्यादिः वेदवाक्यैरपि तत्सिद्धेः कृत्रिमेणापि आगमेन तस्यैव प्रतिपादनात् उक्तं च ।

सर्वं वै खल्विदं ब्रह्म नेह नानास्ति किं चन ।
आरामं तस्य पश्यन्ति न तत्पश्यति कश्चन इति ॥

प्रमाणतस्तस्यैव सिद्धेः परमपुरुष एक एव तत्त्वं सकलभेदानां तद्विवर्त्तत्वात् तथा हि सर्वे भावा ब्रह्मविवर्त्ताः सत्त्वैकरूपेणान्वितत्वात् यद्यद्रूपेणान्वितं तत्तदात्मकमेव यथा घटघटीशरावोदञ्चनादयो मृद्रूपेणैकेनान्विता मृद्विवर्त्ताः सत्त्वैकरूपेणान्वितं च सकलं वस्त्विति सिद्धं ब्रह्मविवर्त्तत्वं निखिलभेदानामिति तदेतत्सर्वं मदिरारसास्वादगद्गदोद्गदितमिवाभासते विचारासहत्वात् सर्वं हि वस्तु प्रमाणसिद्धं न तु वाङ्मात्रेण अद्वैतमते च प्रमाणमेव नास्ति तत्सद्भावे द्वैतप्रसङ्गात् अद्वैतसाधकस्य प्रमाणस्य द्वितीयस्य सद्भावात् अथ मतं लोकप्रत्यायनाय तदपेक्षया प्रमाणमप्यभ्युपगम्यते तदसत् त्वन्मते लोकस्यैवासंभवात् एकस्यैव नित्यनिरंशस्य परब्रह्मण एव सत्त्वात् अथास्तु यथाकथंचित्प्रमाणमपि तत्किं प्रत्यक्षमनुमानमागमो वा तत्साधकं प्रमाणमुररीक्रियते न तावत्प्रत्यक्षं तस्य समस्तवस्तुजातगतभेदस्यैव प्रकाशकत्वात् आबालगोपालं तस्यैव प्रतिभासनात् यच्च निर्विकल्पकं प्रत्यक्षं तदावेदकमित्युक्तं तदपि न सम्यक् तस्य प्रामाण्यानभ्युपगमा-

स्सर्वस्यापि प्रमाणतत्त्वस्य व्यवसायात्मकस्यैव विसंवादकत्वेन प्रामाण्योपपत्तेः सविकल्पकेन तु प्रत्यक्षेण प्रमाणभूतेनैकस्यैव विधिरूपस्य परब्रह्मणः स्वप्नेऽप्यप्रतिभासनात् यदप्युक्त "आहु विधातृ प्रत्यक्ष" मित्यादि तदपि न पेशलं प्रत्यक्षेण ह्यनुवृत्तव्यावृत्ताकारात्मकवस्तुन एव प्रकाशनात् एतच्च प्रागेव क्षुण्णं न ह्यनुस्यूतमेकमखण्डं सत्तामात्रं विशेषनिरपेक्षं सामान्यं प्रतिभासते येन यदद्वैतं तद्ब्रह्मणो रूपमित्याद्युक्तं शोभते विशेषनिरपेक्षस्य खरविषाणवदप्रतिभासनात् तदुक्तम्

निर्विशेषं हि सामान्यं भवेत्खरविषाणवत्।
सामान्यरहितत्त्वेन विशेषास्तद्वदेव हि॥

ततः सिद्धे सामान्यविशेषात्मन्यर्थे प्रमाणविषये कुत एवैकस्य परमब्रह्मणः प्रमाणविषयत्वं यच्च प्रमेयत्वादित्यनुमानमुक्तम् तदप्येतेनैवापास्तं बोद्धव्यं पक्षस्य प्रत्यक्षबाधितत्वेन हेतोः कालात्ययापदिष्टत्वात् यच्च तत्सिद्धौ प्रतिभासमानत्वसाधनमुक्तं तदपि साधनाभासत्वेन न प्रकृतसाध्यसाधनायालं प्रतिभासमानत्वं हि निखिलभावानां स्वतः परतो वा न तावत्स्वतो घटपटमुकुटशकटादीनां स्वतः प्रतिभासमानत्वेनासिद्धेः परतः प्रतिभासमानत्वं च परं विना नोपपद्यत इति यच्च परमब्रह्मविवर्तवर्तित्वमखिलभेदानामित्युक्तं तदप्यन्यत्रस्थलेऽन्वीयमानद्वयावि-

नाभावित्वेन पुरुषाद्वैतं प्रतिबध्नात्येव न च घटादीनां चैतन्यान्वयोऽप्यस्ति मृदाद्यन्वयस्यैव तत्र दर्शनात् ततो न किंचिदेतदपि अतोऽनुमानादपि न तत्सिद्धिः किं च पक्षहेतुदृष्टान्ता अनुमानोपायभूताः परस्परं भिन्ना अभिन्ना वा भेदे द्वैतसिद्धिरभेदे त्वेकरूपतापत्तिः तत्कथमेतेभ्योऽनुमानमात्मानमासादयति यदि च हेतुमन्तरेणापि साध्यसिद्धिः स्यात्तर्हि द्वैतस्यापि वाङ्मात्रतः कथं न सिद्धिस्तदुक्तम्।

हेतोरद्वैतसिद्धिश्चेद् द्वैतं स्याद्धेतुसाध्ययोः॥
हेतुना चेद्विना सिद्धि द्वैतं वाङ्मात्रतो न किम्।

"पुरुष एवेदं सर्वमि"त्यादेः "सर्वं वै खल्विदं ब्रह्मे"त्यादेश्चागमादपि न तत्सिद्धिस्तस्यापि द्वैताविनाभावित्वेन अद्वैतं प्रति प्रामाण्यासम्भवात् वाच्यवाचकभावलक्षणस्य द्वैतस्यैव तत्रापि दर्शनात् तदुक्तम्।

कर्मद्वैतं फलद्वैतं लोकद्वैतं विरुध्यते।
विद्याविद्याद्वयं न स्याद्बन्धमोक्षद्वयं तथा॥

ततः कथमागमादपि तत्सिद्धिस्ततो न पुरुषाद्वैतलक्षणमेकमेव प्रमाणस्य विषय इति सुव्यवस्थितः प्रपञ्च इति काव्यार्थः॥१३॥

अथ स्वाभिमतसामान्यविशेषोभयात्मकवाच्यवाचकभावसमर्थनपुरस्सरं तीर्थान्तरीयप्रकल्पिततदेकान्तगोचरवाच्यवाचकभावनिरासद्वारेण तेषां प्रतिभावैभवाभावमाह।

अनेकमेकात्मकमेव वाच्यं
द्वयात्मकं वाचकमप्यवश्यम् ।
अतोऽन्यथा वाचकवाच्यक्लृप्ता-
वतावकानां प्रतिभाप्रमादः ॥१४॥

वाच्यमभिधेयं चेतनमचेतनं वस्तु एवकारस्याप्यर्थत्वात् सामान्यरूपतया एकात्मकमपि व्यक्तिभेदेनानेकम् अनेकरूपम् अथ वा ऽनेकरूपमपि एकात्मकमन्योन्यसंवलितत्वादित्थमपि व्याख्याने न दोषः तथा वाचकमभिधायकं शब्दरूपं तदप्यवश्यं निश्चितं द्वयात्मकं सामान्यविशेषोभयात्मकत्वात् एकानेकात्मकमित्यर्थः उभयत्र वाच्यलिङ्गत्वेऽप्यव्यक्तत्वान्नपुंसकत्वम् अवश्यमितिपदं वाच्यवाचकयोरुभयोरप्येकानेकात्मकत्वं निश्चिन्वत्तदेकान्तं व्यवच्छिनत्ति अत उपदर्शितप्रकारादन्यथा सामान्यविशेषैकान्तरूपेण प्रकारेण वाचकवाच्यक्लृप्तौ वाच्यवाचकभावकल्पनायाम् अतावकानामत्वदीयानामन्ययूथ्यानां प्रतिभाप्रमादः प्रज्ञास्खलितमित्यक्षरार्थः अत्र चाल्पस्वरत्वेन वाच्यपदस्य प्राग्निपाते प्राप्तेऽपि यदादौ वाचकग्रहणं तत्प्रायोऽर्थप्रतिपादनस्य शब्दाधीनत्वेन वाचकस्यार्घ्यत्वज्ञापनार्थं तथा च शाब्दिकाः ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

इति भावार्थस्त्वेवम् एके तीर्थिकाः सामान्यरूपमेव वाच्यतया अभ्युपगच्छन्ति ते च द्रव्यास्तिकनयानुपातिनो मीमांसकभेदा अद्वैतवादिनः सांख्याश्च केचिच्च विशेषरूपमेव वाच्यं निर्ब्रुवन्ति ते च पर्यायास्तिकनयानुसारिणः सौगताः अपरे च परस्परनिरपेक्षपदार्थपृथग्भूतसामान्यविशेषयुक्तं वस्तु वाच्यत्वेन निश्चिन्वते ते च नैगमनयानुगामिनः काणादा आक्षपादाश्च एतच्च पक्षत्रयमपि किंचिच्चर्च्यते तथा हि संग्रहनयावलम्बिनो वादिनः प्रतिपादयन्ति सामान्यमेव तत्त्वं ततःपृथग्भूतानांविशेषाणामदर्शनात् तथा सर्वमेकमविशेषेण सदितिज्ञानाभिधानानुवृत्तिलिङ्गानुमितसत्ताकत्वात् तथा द्रव्यत्वमेव तत्त्वं ततो ऽर्थान्तरभूतानां धर्माधर्माकाशकालपुद्गलजीवद्रव्याणामनुपलब्धेः किं च यैः सामान्यात् पृथग्भूता अन्योन्यव्यावृत्त्यात्मका विशेषाः कल्प्यन्ते तेषु विशेषत्वं विद्यते न वा नो चेन्निःस्वभावताप्रसङ्गः स्वरूपस्यैवाभावात् अस्ति चेत्तर्हि तदेव सामान्यं यतः समानानां भावः सामान्यं विशेषरूपतया च सर्वेषां तेषामविशेषेण प्रतीतिः सिद्धैव अपि च विशेषाणां व्यावृत्तिप्रत्ययहेतुत्वं लक्षणं व्यावृत्तिप्रत्यय एव विचार्यमाणो न घटते व्यावृत्ति हि विवक्षित पदार्थे इतरपदार्थप्रतिषेधो विवक्षितपदार्थश्च स्वस्वरूपव्यवस्थापनमात्रपर्यवसायी कथं पदार्थान्तरप्रतिषेधे प्रगल्भते न च स्वरूपसत्वादन्य त्तत्र किमपि

येन तन्निषेधः प्रवर्त्तते तत्र च व्यावृत्तौ क्रियमाणायां स्वात्मव्यतिरिक्तविश्वत्रयवर्त्तिनोऽतीतवर्तमानानागताः पदार्थास्तस्माद्‌व्यावर्त्तनीयास्ते च नाज्ञानस्वरूपा व्यावर्त्तयितुं शक्यास्ततश्चैकस्यापि विशेषस्य परिज्ञाने प्रमातुः सर्वज्ञत्वं स्यान्न चैतत्प्रातीतिकं यौक्तिकं वा व्यावृत्तिश्च निषेधः स चाभावरूपत्वात्तुच्छः कथं प्रतीतिगोचरमञ्चति खपुष्पवत् तथा येभ्यो व्यावृत्तिस्ते असद्रूपा सद्रूपा वा असद्रूपाश्चेत्तर्हि खरविषाणात् किं न व्यावृत्तिः सद्रूपाश्चेत् सामान्यमेव या चेयं व्यावृत्ति र्विशेषैः क्रियते सा सर्वासु विशेषव्यक्तिष्वेका अनेका वा अनेका चेत्तस्या अपि विशेषत्वापत्तिरनेकरूपत्वेकजीवितत्वाद्विशेषाणां ततश्च तस्या अपि विशेषत्वान्यथानुपपत्ते र्व्यावृत्त्या भाव्यं व्यावृत्तेरपि च व्यावृत्तौ विशेषाणामभाव एव स्यात् तत्स्वरूपभूताया व्यावृत्तेः प्रतिषिद्धत्वात् अनवस्थापाताच्च एका चेत्सामान्यमेव संज्ञान्तरेण प्रतिपन्नं स्यादनुवृत्तिप्रत्ययलक्षणाव्यभिचारात् किं चामी विशेषाः सामान्याद्भिन्ना अभिन्ना वा भिन्नाश्चेन्मण्डूकजटाभारानुकारा अभिन्नार्थाश्चेत्तदेव तत्स्वरूपवत् इति सामान्यैकान्तः पर्यायनयान्वयिनस्तु भाषन्ते विविक्ताः क्षणक्षयिणो विशेषा एव परमार्थस्ततो विष्वग्भूतस्य सामान्यस्याप्रतीयमानत्वात् न हि गवादिव्यक्त्यनुभवकाले वर्णसंस्थानात्मकंव्यक्तिरूपमपहायाऽन्यत्किंचिदेकमनुयायि प्रतिभासते

तादृशस्यानुभवाभावात् तथा च पठन्ति।

एतासु पञ्चस्ववभासिनीषु।
प्रत्यक्षबोधे स्फुटमङ्गुलीषु॥
साधारणं रूपमपेक्षते यः।
शृङ्गं शिरस्यात्मन ईक्षते सः॥

एकाकारपरामर्शप्रत्ययस्तु स्वहेतुदत्तशक्तिभ्य एवोत्पद्यत इति न तेन सामान्यसाधनं न्याय्यं किं च यदिदं सामान्यं परिकल्प्यते तदेकमनेकं वा एकमपि सर्वगतमसर्वगतं वा सर्वगतं चेत्किं न व्यक्त्यन्तरालेषूपलभ्यते सर्वगतैकत्वाभ्युपगमे च तस्य यथा गोत्वं सामान्यं गोव्यक्तीः क्रोडीकरोति एवं किं न घटपटादिव्यक्तीरप्यविशेषात् असर्वगतं चेद्विशेषरूपापत्तिरभ्युपगमबाधश्च अथानेकं गोत्वाश्वत्वघटत्वपटत्वादिभेदभिन्नत्वात्तर्हि विशेषा एव स्वीकृताः अन्योन्यव्यावृत्तिहेतुत्वान्न हि यद्गोत्वं तदश्वत्वात्मकमिति अर्थक्रियाकारित्वं च वस्तुनो लक्षणं तच्च विशेषेष्वेव स्फुटं प्रतीयते न हि सामान्येन काचिदर्थक्रिया क्रियते तस्य निष्क्रियत्वात् वाहदोहादिकास्वर्थक्रियासु विशेषाणामेवोपयोगात् तथेदं सामान्यं विशेषेभ्यो भिन्नमभिन्नं वा भिन्नं चेदवस्तु विशेषविश्लेषेणार्थक्रियाकारित्वाभावात् अभिन्नं चेद्विशेषा एव तत्स्वरूपवदिति विशेषैकान्तवादः नैगमनयानुगामिनस्त्वाहुः स्वतन्त्रौ सामान्यविशेषौ तथैव प्रमाणेन प्रती-

तत्वात् तथाहि सामान्यविशेषावत्यन्तं भिन्नौ विरुद्धधर्माध्यासितत्वाद्यावेवं तावेवं यथा पाथःपावकौ तथा चैतौ तस्मात्तथा सामान्यं हि गोत्वादि सर्वगतं तद्विपरीताश्च शवलशावलेयादयो विशेषास्ततः कथमेषामैक्यं युक्तं न सामान्यात्पृथग्विशेषस्योपलम्भ इति चेत् कथं तर्हि तस्योपलम्भ इति वाच्यं सामान्यव्याप्तस्येति चेन्न तर्हि सविशेषोपलम्भः सामान्यस्यापि तेन ग्रहणात् ततश्च तेन बोधेन विविक्तविशेषग्रहणाभावात् तद्वाचकं ध्वनिं तत्साध्यं च व्यवहारं न प्रवर्तयेत्प्रमाता न चैतदस्ति विशेषाभिधानव्यवहारयोः प्रवृत्तिदर्शनात्तस्माद्विशेषमभिलषता तत्र च व्यवहारं प्रवर्त्तयता तद्ग्राहके बोधो विविक्तोऽभ्युपगन्तव्यः एवं सामान्यस्थाने विशेषशब्दं विशेषस्थाने च सामान्यशब्दं प्रयुञ्जानेन सामान्येऽपि तद्ग्राहके बोधो विविक्तोऽङ्गीकर्तव्यस्तस्मात्स्वस्वग्राहिणि ज्ञाने पृथक् प्रतिभासमानत्वात् द्वावपीतरेतरविश्कलितौ ततो न सामान्यविशेषात्मकत्वं वस्तुनो घटत इति स्वतन्त्रसामान्यविशेषवादः तदेतत्पक्षत्रयमपि न क्षमते चोदं प्रमाणबाधितत्वात् सामान्यविशेषोभयात्मकस्यैव वस्तुनो निर्विगानमनुभूयमानत्वात् वस्तुनो हि लक्षणमर्थक्रियाकारित्वं तच्चानेकान्तवाद एवाविकलं कलयन्ति परीक्षकाः तथा हि यथा गौरित्युक्ते खुरककुदसास्नालाङ्गूलविषाणाद्यवयवसंपन्नं वस्तु स्वरूपं सर्वव्यक्त्यनुयायि प्रतीयते तथा महिष्यादि-

व्यावृत्तिरपि प्रतीयते यत्रापि च शवला गौरित्युच्यते तत्रापि यथा विशेषप्रतिभासस्तथा गोत्वप्रतिभासोऽपि स्फुट एव शवलेतिकेवलविशेषणोच्चारणेऽपि अर्थात्प्रकरणाद्वा गोत्वमनुवर्त्तते अपि च शवलत्वमपि नानारूपं तथादर्शनात् ततो वक्रा शवलेत्युक्ते क्रोडीकृतसकलशवलसामान्यं विवक्षितगोव्यक्तिगतमेव शवलत्वं व्यवस्थाप्यते तदेवमाबालगोपालं प्रतीतिप्रसिद्धेऽपि वस्तुतः सामान्यविशेषात्मकत्वे तदुभयैकान्तवादः प्रलापमात्रं न हि क्वचित्कदाचित्केनचित्सामान्यं विशेषविनाकृतमनुभूयते विशेषा वा तद्विनाकृताः केवलं दुर्नयप्रभावितमतिव्यामोहवशादेकमपलप्याऽन्यतरद्व्यवस्थापयन्ति बालिशाः सोऽयमन्धगजन्यायः येऽपि च तदेकान्तपक्षोपनिपातिनः प्रागुक्ता दोषास्तेऽपि अनेकान्तवादप्रचण्डमुद्गरजर्जरितत्वान्नोच्छ्वसितुमपि क्षमाः स्वतन्त्रसामान्यविशेषवादिनस्त्वेवं प्रतिक्षेप्याः सामान्यं प्रतिव्यक्ति कथंचिद्विभिन्नं कथंचित्तदात्मकत्वाद्विसदृशपरिणामवत् तथैव हि काचिद्व्यक्तिरुपलभ्यमानाद्व्यक्त्यन्तराद्विशिष्टा विसदृशपरिणामदर्शनाऽवतिष्ठते तथा सदृशपरिणामात्मकसामान्यदर्शनात्समानेति तेन समानो गौरयं सोऽनेन समान इति प्रतीतेः न चास्य व्यक्तिस्वरूपादभिन्नत्वात्सामान्यरूपताव्याघातो यतो रूपादीनामपि व्यक्तिस्वरूपादभिन्नत्वमस्ति न चैतेषां गुणरूपताव्याघातः कथंचिद्व्यतिरेकस्तु रू-

पादीनामिव सदृशपरिणामस्याप्यस्त्येव पृथग्व्यपदेशादिभाक्त्वात् विशेषा अपि नैकान्तेन सामान्यात्पृथग्भवितुमर्हन्ति यतो यदि सामान्यं सर्वगतं सिद्धं भवेत् तदा तेषामसर्वगतत्वेन ततो विरुद्धधर्माध्यासः स्यात् न च तस्य तत्सिद्धं प्रागुक्तयुक्त्या निराकृतत्वात् सामान्यस्य विशेषाणां च कथं चित्परस्पराव्यतिरेकेणैकानेकरूपतया व्यवस्थितत्वात् विशेषेभ्योऽव्यतिरिक्तत्वाद्धि सामान्यमप्यनेकमिष्यते सामान्यात्तु विशेषाणामव्यतिरेकात्ते ऽप्येकरूपा इति एकत्वं च सामान्यस्य संग्रहनयार्पणात् सर्वत्र विज्ञेयं प्रमाणार्पणात्तस्य कथं चिद्विरुद्धधर्माध्यासितत्वं सदृशपरिणामरूपस्य विसदृशपरिणामवत्कथं चित्प्रतिव्यक्तिभेदात् एवं चासिद्धं सामान्यविशेषयोः सर्वथा विरुद्धधर्माध्यासितत्वं कथं चिद्विरुद्धधर्माध्यासितत्वं चेद्विवक्षितं तदास्मत्कक्षाप्रवेशः कथं चिद्विरुद्धधर्माध्यासस्य कथं चिद्भेदाविनाभूतत्त्वात् पाथःपावकदृष्टान्तोऽपि साध्यसाधनविकलस्तयोरपि कथं चिदेव विरुद्धधर्माध्यासितत्वेन भिन्नत्वेन च स्वीकारात्पयस्त्वपावकत्वादिना हि तयोर्विरुद्धधर्माध्यासो भेदश्च द्रव्यत्वादिना पुनस्तद्विपरीत्यमिति तथा च कथं न सामान्यविशेषात्मकत्त्वं वस्तुनो घटत इति ततः सूक्तं वाच्यमेकमनेकरूपमिति एवं वाचकमपि शब्दाख्यं द्वयात्मकं सामान्यविशेषात्मकं सर्वशब्दव्यक्तिष्वनुयायि शब्दत्वमेकं शाङ्खशार्ङ्गतीव्रमन्दो-

दात्तानुदात्तस्वरितादिविशेषभेदादनेकं शब्दस्य हि सामान्यविशेषात्मकत्वं पौद्गलिकत्वाद्व्यक्तमेव तथा हि पौद्गलिकः शब्द इन्द्रियार्थत्वाद्रूपादिवत् यच्चास्य पौद्गलिकत्वनिषेधाय स्पर्शशून्याश्रयत्वादतिनिविडप्रदेशे प्रवेशनिर्गमयोरप्रतिघातात्पूर्वपश्चाच्चावयवानुपलब्धेः सूक्ष्ममूर्त्तद्रव्यान्तराप्रेरकत्वाद्गगनगुणत्वाच्चेति पञ्च हेतवो यौगैरुपन्यस्तास्ते हेत्वाभासास्तथा हि शब्दपर्यायस्याश्रयो भाषावर्गणा न पुनराकाशं तत्र च स्पर्शो निर्णीयत एव यथा शब्दाश्रयः स्पर्शवाननुवातप्रतिवातयोर्विप्रकृष्टनिकटशरीरिणोपलभ्यमानानुपलभ्यमानेन्द्रियार्थत्वात् तथाविधगन्धाधारद्रव्यपरमाणुवत् इत्यसिद्धः प्रथमः द्वितीयस्तु गन्धद्रव्येण व्यभिचारादनैकान्तिकः वर्त्त्यमानजात्यकस्तूरिकादिगन्धद्रव्यं हि पिहितद्वारापवरकस्यान्तर्विशति बहिश्च निर्याति न चापौद्गलिकम् अथ तत्र सूक्ष्मरन्ध्रसम्भवान्नातिनिविडत्वमतस्तत्र तत्प्रवेशनिष्क्रमौ कथमन्यथोद्घाटितद्वारावस्थायामिव न तदेकार्णवत्वं सर्वथा नीरन्ध्रे तु प्रदेशे न तयोः सम्भव इति चेत्तर्हि शब्देऽप्येतत्समानमित्यासिद्धो हेतुः तृतीयस्तु तडिल्लतोल्कादिभिरनैकान्तिकः चतुर्थोऽपि तथैव गन्धद्रव्यविशेषसूक्ष्मरजोधूमादिभिर्व्यभिचारी न हि गन्धद्रव्यादिकमपि नासायां निविशमानं तद्विवरद्वारदेशोद्भिन्नश्मश्रुप्रेरकं दृश्यते पञ्चमः पुनरसिद्धः तथा हि न गगनगुणः शब्दोऽस्मदा-

दिप्रत्यक्षत्वाद्रूपादिवदिति सिद्धः पौद्गलिकात्वात्सामान्यविशेषात्मकः शब्द इति न च वाच्यम् आत्मन्यपौद्गलिकेऽपि कथं सामान्यविशेषात्मकत्वं निर्विवादमनुभूयत इति यतः संसार्यात्मनः प्रतिप्रदेशमनन्तानन्तकर्मपरमाणुभिः सह वह्नितापितघनकुट्टितनिर्विभागपिण्डीभूतसूचीकलापवल्लोलीभावमापन्नस्य कथं चित्पौद्गलिकत्वाभ्यनुज्ञानादिति यद्यपि स्याद्वादवादिनां पौद्गलिकमपौद्गलिकं च सर्वं वस्तु सामान्यविशेषात्मकं तथाप्यपौद्गलिकेषु धर्माधर्माकाशकालेषु तदात्मकत्वमर्वाग्दृशां न तथा प्रतीतिविषयमायातीति पौद्गलिकेषु पुनस्तत्साध्यमानं तेषां सुश्रद्धानमित्यप्रस्तुतमपि शब्दस्य पौद्गलिकत्वमत्र सामान्यविशेषात्मकत्वसाधनायोपन्यस्तमिति अत्रापि नित्यशब्दवादिसंमतः शब्दैकत्वैकान्तो ऽनित्यशब्दवाद्यभिमतः शब्दानैकत्वैकान्तश्च प्राग्दर्शितदिशा प्रतिक्षेप्यः अथ वा वाच्यस्य घटादेरर्थस्य सामान्यविशेषात्मकत्वे तद्वाचकस्य ध्वनेरपि तत्त्वं शब्दार्थयोः कथंचित्तादात्म्याभ्युपगमात् यदाह भद्रबाहुस्वामिपादाः ।

अभिहाणं अभिहेयाउ होइ भिन्नं अभिन्नं च ।
खुरअग्गिमोयगुच्चारणं मिजम्हाउ वयणसवणाणं ॥
न विछेदुन विदाहो न पूरणं तेन भिन्नं तु ।
जम्हायमोयगुच्चारणं मितच्छेव यच्चउहोइ ॥

न वहोइ सअसन्नच्छेतेण अभिन्नं तदच्छाउ।

एतेन

विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः।
कार्यकारणता तेषां नार्थं शब्दाः स्पृशन्त्यपि॥

इति प्रत्युक्तम् "अर्थाभिधानप्रत्ययास्तुल्यनामधेया" इति वचनात् शब्दस्य ह्येतदेव तत्त्वं यदभिधेयं याथात्म्येनासौ प्रतिपादयति स च तत्तथाप्रतिपादयन् वाच्यस्वरूपपरिणामपरिणत एव वक्तुं शक्तो नान्यथा अतिप्रसङ्गात् घटाभिधानकाले पटाद्यभिधानस्य प्राप्तेरित्यर्थः अथ वा भङ्ग्यन्तरेण सकलं काव्यमिदं व्याख्यायते वाच्यं वस्तु घटादिकमेकात्मकमेवैकरूपमेव सदनेकमनेकस्वरूपम् अयमर्थः प्रमाता तावत्प्रमेयं लक्षणेन निश्चिनोति तच्च सजातीयविजातीयव्यवच्छेदादात्मलाभं लभते यथा घटस्य सजातीया मृन्मयपदार्था विजातीयाश्च पटादयस्तेषां व्यवच्छेदस्तल्लक्षणं पृथुबुध्नोदराद्याकारः कम्बुग्रीवो जलधारणादिक्रियासमर्थः पदार्थविशेषो घट इत्युच्यते तेषां च सजातीयानां स्वरूपं तत्र बुद्ध्याऽऽरोप्य व्यवच्छिद्यते अन्यथा प्रतिनियततत्स्वरूपपरिच्छेदानुपपत्तेः सर्वभावनां हि भावाभावात्मकं स्वरूपं एकान्तभावात्मकत्वे वस्तुनो वैस्वरूप्यं स्यादेकान्ताभावात्मकत्वे च निःस्वभावता स्यात्तस्मात्स्वरूपेण सत्वात्पररूपेण चासत्त्वाद्भावाभावात्मकं वस्तु यदाह।

सर्वमस्ति स्वरूपेण पररूपेण नास्ति च ।
अन्यथा सर्वसत्वं स्यात्स्वरूपस्याप्यसंभवः ॥ १ ॥

ततश्चैकस्मिन् घटे सर्वेषां घटव्यतिरिक्तपदार्थानामभावरूपेण वृत्तेरनेकात्मकत्वं घटस्य सूपपादम् एवं चैकस्मिन्नर्थे ज्ञाते सर्वेषाम् अर्थानां ज्ञानं सर्वपदार्थपरिच्छेदमन्तरेण तन्निषेधात्मन एकस्य वस्तुनो विविक्ततया परिच्छेदासंभवात् आगमोऽप्येवमेव व्यवस्थितः " जे एगं जाणइ से सव्वं जाणइ जे सव्वंजाणइ से एगं जाणइ " तथा ।

एको भावः सर्वथा येन दृष्टः
सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा
एको भावः सर्वथा तेन दृष्टः ॥ १ ॥

ये तु सौगताः परासत्वं नाङ्गीकुर्वते तेषां घटादेः सर्वात्मकत्वप्रसङ्गः तथा हि यथा घटस्य स्वरूपादिनापि सत्त्वं तथा पररूपादिनापि स्यात्तथा च सति स्वरूपादिसत्त्ववत्पररूपादिसत्त्वप्रसक्तेः कथं न सर्वात्मकं भवेत् परासत्त्वेन तु प्रतिनियतोऽसौ सिध्यति अथ न नाम नास्ति परासत्त्वं किं तु स्वसत्त्वमेव तदितिचेदहो वैदग्धी न खलु यदेव सत्त्वं तदेवासत्त्वं भवितुमर्हति विधिप्रतिषेधरूपतया विरुद्धधर्माध्यासेनानयोरैक्यायोगात् अथ युष्मत्पक्षेऽप्येवं विरोधस्तदवस्थ एवेतिचेदहो वाचाटता देवानां-

प्रियस्य न हि वयं येनैवप्रकारेण सत्वं तेनैवासत्वं येनैवासत्त्वं तेनैव सत्त्वमभ्युपेमः किं तु स्वरूपद्रव्यक्षेत्रकालभावैः सत्त्वं पररूपद्रव्यक्षेत्रकालभावैस्त्वसत्वं तदा क्व विरोधावकाशः यौगास्तु प्रगल्भन्ते सर्वथापृथग्भूतपरस्पराभावाभ्युपगममात्रेणैव पदार्थप्रतिनियमसिद्धेः किं तेषामसत्त्वात्मकत्वकल्पनयेति तदसत् यदा हि पटाद्यभावरूपो घटो न भवति तदा घटो घटादिरिव स्यात् यथा च घटाभावाद्भिन्नत्वाद्घटस्य घटरूपता तथा पटादेरपि स्याद्घटाभावाद्भिन्नत्वादेवेत्यलं विस्तरेण एवं वाचकमपि शब्दरूपं द्वयात्मकम् एकात्मकमपि सदनेकमित्यर्थः यदुक्तन्यायेन शब्दस्यापि भावाभावात्मकत्त्वात् अथ वा एकविषयस्यापि वाचकस्याऽनेकविषयत्वोपपत्तेः यथा किल घटशब्दः संकेतवशात् पृथुबुध्नोदराद्याकारवति पदार्थे प्रवर्त्तते वाचकतया तथा देशकालाद्यपेक्षया तद्वशादेव पदार्थान्तरेष्वपि च तथा प्रवर्तमानः केन वार्यते भवन्ति हि वक्तारो योगिनः शरीरं प्रति घट इति संकेतानां पुरुषेच्छाधीनतयाऽनियतत्वात् तथा चौरशब्दोऽन्यत्र तस्करे रूढोऽपि दाक्षिणात्यानामोदने प्रसिद्धः यथा च कुमारशब्दः पूर्वदेशे आश्विनमासे रूढ एवं कर्कटीशब्दादयोऽपि तत्तद्देशापेक्षया योन्यादिवाचका ज्ञेयाः कालापेक्षया पुनर्यथा जैनानां प्रायश्चित्तविधौ धृतिश्रद्धासंहननादिमति प्राचीनकाले षड्गुरुशब्देन शतमशीत्यधिकमु-

पवासानामुच्यते स्म सांप्रतकाले तु तद्विपरीते तेनैव-
षड्गुरुशब्देनोपवासत्रयमेव संकेत्यते जीवितकल्पव्यव-
हारानुसारात् शास्त्रापेक्षया तु यथा पुराणेषु द्वाद-
शीशब्देनैकादशी त्रिपुरार्णवे चालिशब्देन मदिरा
भिषक्तन्त्रे च मैथुनशब्देन मधुसर्प्पिषोर्ग्रहणमित्यादि
न चैवं सङ्केतस्यैवार्थप्रत्यायने प्राधान्यं स्वाभाविक-
सामर्थ्यसाचिव्यादेव तस्य तत्र प्रवृत्तेः सर्वशब्दानां स-
र्वार्थप्रत्यायनशक्तियुक्तत्वाद्यत्र च देशकालादौ पदा-
र्थप्रतिपादनशक्तिसहकारी सङ्केतस्तत्र तमर्थं प्रति-
पादयति तथा च निर्जितदुर्जयपरप्रवादाः श्रीदेवसू-
रिपादाः "स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोधनि-
बन्धनं शब्दः" अत्र शक्तिपदार्थसमर्थनं ग्रथान्तरा-
दवसेयम् अतोऽन्यथेत्यादि उत्तरार्द्धं पूर्ववत् प्रतिभा-
प्रमादस्तु तेषां सदसदेकान्ते वाच्यस्य प्रतिनियता-
र्थविषयत्वे च वाचकस्योक्तयुक्त्या दोषसद्भावाद् व्यवहा-
रानुपपत्तेः तदयं समुदायार्थः सामान्यविशेषात्मकस्य
भावाभावात्मकस्य वस्तुनः सामान्यविशेषात्मको भा-
वाभावात्मकश्च ध्वनिर्वाचक इत्यन्यथा प्रकारान्तरैः
पुनर्वाच्यवाचकभावव्यवस्थामातिष्ठमानानां प्रतिभैव
प्रमाद्यति न तु तद्भणितयो युक्तिस्पर्शमात्रमपि स-
हन्ते कानि तानि वाच्यवाचकभावप्रकारान्तराणि
परवादिनामिति चेदेते ब्रूमः अपोह एव शब्दार्थ
इत्येके "अपोहः शब्दलिङ्गाभ्यां न वस्तुविधिनो-
च्यते" इति वचनात् अपरे च सामान्यमात्रमेव

शब्दानां गोचरस्तस्य क्वचित्प्रतिपन्नस्यैकरूपतया सर्वत्र संकेतविषयतोपपत्ते र्न पुनर्विशेषास्तेषामानन्त्येतत: कार्त्स्न्येनोपलब्धुमशक्यतया तद्विषयतानुपपत्ते: विधिवादिनस्तु विधिरेववाक्यार्थो ऽप्रवृत्तप्रवर्तनस्वभावत्वात् तस्येत्याचक्षते विधिरपि तत्तद्वादिविप्रतिपत्त्याऽनेकप्रकारस्तथाहि वाक्यरूप: शब्द एव प्रवर्त्तकत्वाद्विधिरित्येके तद्व्यापारो भावनापरपर्यायो विधिरित्यन्ये नियोग इत्यपरे प्रैषादय इत्येके तिरस्कृततदुपाधिप्रवर्तनामात्रमित्यन्ये एवं फलतदभिलाषकर्मादयो वाच्या एतेषां निराकरणं सपूर्वोत्तरपक्षं न्यायकुमुदचन्द्रादवसेयमिति काव्यार्थ:॥ १४ ॥

इदानीं सांख्याभिमतप्रकृतिपुरुषादितत्वानां विरोधावरुद्धत्वं ख्यापयन् तद्बालिशताविलसितानामपरिमितत्वं दर्शयति।

**चिदर्थशून्या च जडा च बुद्धि:**
**शब्दादितन्मात्रजमम्बरादि।**
**न बन्धमोक्षौ पुरुषस्य चेति**
**कियज्जडैर्न ग्रथितं विरोधि॥१५॥**

चिच्चैतन्यशक्तिरात्मस्वरूपभूताऽर्थशून्या विषयपरिच्छेदविरहितार्थाध्यवसायस्य बुद्धिव्यापारत्वादित्येककल्पना बुद्धिश्च महत्तत्वाख्या जडाऽन-

वबोधरूपा इति द्वितीया अम्बरादि व्योमप्रभृति भूतपञ्चकं शब्दादितन्मात्रजं शब्दादीनि पञ्चतन्मात्राणि सूक्ष्मसंज्ञानि तेभ्यो जातमुत्पन्नं शब्दादितन्मात्रजम् इति तृतीया अत्र चशब्दो गम्यः पुरुषस्य च प्रकृतिविकृत्यनात्मकस्यात्मनो न बन्धमोक्षौ किं तु प्रकृतेरेव तथा च कापिलाः ।

तस्मान्न बध्यतेऽद्धा न नापि नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥

तत्र बन्धः प्राकृतिकादि मोक्षः पञ्चविंशतितत्त्वज्ञानपूर्वकोऽपवर्ग इति चतुर्थी इति शब्दस्य प्रकारार्थत्वादेवं प्रकारम् अन्यदपि विरोधीति विरुद्धं पूर्वापरविरोधादिदोषाघ्रातं जडै मूर्खैस्तत्त्वावबोधविधुरधीभिः कापिलैः कियन्न ग्रथितं कियन्न स्वशास्त्रेरूपनिबद्धं कियदित्यसूयागर्भं तत्प्ररूपितविरुद्धार्थानामानन्त्येनेयत्ताऽनवधारणात् इति संक्षेपार्थः व्यासार्थस्त्वयं सांख्यमते किल दुःखत्रयाभिहतस्य पुरुषस्य तदपघातहेतुतत्त्वजिज्ञासा उत्पद्यते आध्यात्मिकमाधिदैविकमाधिभौतिकं चेति दुःखत्रयं तत्राध्यात्मिकं द्विविधं शारीरं मानसं च शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं मानसं कामक्रोधलोभमोहेर्ष्याविषयादर्शननिबन्धनं सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखं बाह्योपायसाध्यं दुःखं द्वेधा आधिभौतिकमाधिदैविकं चेति तत्राधिभौति-

कं मानुषपशुपक्षिमृगसरीसृपस्थावरनिमित्तम् आधिदैविकं यक्षराक्षसग्रहाद्यावेशहेतुकम् अनेन दुःखत्रयेण रजःपरिणामभेदेन बुद्धिवर्त्तिना चेतनाशक्तेः प्रतिकूलतयाऽभिसम्बन्धो ऽभिघातः तत्त्वानि च पञ्चविंशतिस्तद्यथा अव्यक्तमेकं महदहंकारपञ्चतन्मात्रैकादशेन्द्रियपञ्चमहाभूतभेदात् त्रयोविंशतिविधं व्यक्तं पुरुषश्चिद्रूप इति तथा चेश्वरकृष्णः।

मूलप्रकृतिरविकृति र्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृति र्न विकृतिः पुरुषः॥

प्रीत्यप्रीतिविषादात्मकानां लाघवोपष्टम्भगौरवधर्माणां परस्परोपकारिणां त्रयाणां गुणानां सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रध ानमव्यक्तमित्यनर्थान्तरं तच्चानादिमध्यान्तम् अनवयवं साधारणमशब्दमस्पर्शमरूपमरसमगन्धमव्ययं प्रधानाद्बुद्धिर्महदित्यपरपर्यायोत्पद्यते योऽयमध्यवसायो गवादिषु प्रतिपत्तिरेवमेतत् नान्यथा गौरेवायं नाश्वः स्थाणुरेष नायं पुरुष इत्येषा बुद्धिस्तस्यास्त्वष्टौ रूपाणि धर्मज्ञानवैराग्यैश्वर्यरूपाणि चत्वारि सात्विकानि अधर्मादीनि तु तत्प्रतिपक्षभूतानि चत्वारि तामसानि बुद्धेरहंकारः स चाभिमानात्मकोऽहंशब्दे ऽहंस्पर्शे ऽहं रूपे ऽहंगन्धे ऽहंरसे ऽहंस्वामी अहमीश्वरो ऽसौ मया हतः ससत्वोऽमुं हनिष्यामि इत्यादिप्रत्ययरूपस्तस्मात्पञ्चतन्मात्राणि शब्दतन्मात्रादीन्यविशेषरूपाणि सू-

च्छ्मपर्यायवाच्यानि शब्दतन्मात्रादि शब्द एवोपलभ्यते न पुनरुदात्तानुदात्तस्वरितकम्पितषड्जादिभेदः षड्जादयः शब्दविशेषादुपलभ्यन्ते एवं स्पर्शरूपरसगन्धतन्मात्रेष्वपि योजनीयमिति तत एव चाहङ्कारादेकादशेन्द्रियाणि च तत्र चक्षुः श्रोत्रं घ्राणं रसनं त्वगिति पञ्चबुद्धीन्द्रियाणि वाक्पाणिपादपायूपस्थाः पञ्च कर्मेन्द्रियाणि एकादशं मन इति पञ्चतन्मात्रेभ्यश्च पञ्चमहाभूतानि उत्पद्यन्ते तद्यथा शब्दतन्मात्रादाकाशं शब्दगुणं शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणं शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरूपरसतन्मात्रसहिताद्गन्धतन्मात्रात् शब्दस्पर्शरूपरसगन्धगुणा पृथ्वी जायत इति पुरुषस्त्वमूर्त्तश्चेतनो भोगी नित्यः सर्वगतोऽक्रियः अकर्त्ता निर्गुणः सूक्ष्म आत्मा कापिलदर्शन इति पङ्ग्वन्धवत् प्रकृतिपुरुषयोः संयोगः चिच्छक्तिश्च विषयपरिच्छेदशून्या यत इन्द्रियद्वारेण सुखदुःखादयो विषया ऽबुद्धौ प्रतिसंक्रामन्ति बुद्धिश्चोभयमुखदर्पणाकारा ततस्तस्यां चैतन्यशक्तिः प्रतिबिम्बते ततः सुख्यहं दुःख्यहम् इत्युपचारः आत्मा हि स्वं बुद्धेरव्यतिरिक्तमभिन्यते आह च पतञ्जलिः ।

" शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति तमनुपश्यन्नतदात्मापि तदात्मक इव प्रतिभासत "

इति मुख्यतस्तु बुद्धेरेव विषयपरिच्छेदास्तथा च वाचस्पतिः सर्वो व्यवहर्त्ता आलोच्य नन्वहमत्राधिकृत इत्यभिमत्य कर्तव्यमेतन्मयेति अध्यवस्यति ततश्च प्रवर्त्तत इति लोकतः सिद्धं तत्र कर्त्तव्यमिति योऽयं निश्चयश्चितिसन्निधानापन्नचैतन्याया बुद्धेः सोऽध्यवसायो बुद्धेरसाधारणो व्यापार इति चिच्छक्तिसन्निधानाच्चाचेतनापि बुद्धिश्चेतनावतीवाभासते वादमहार्णवोऽप्याह "बुद्धिदर्पणसंक्रान्तमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंसि अध्यारोहति तदेवभोक्तृत्वमस्य नत्वात्मनो विकारापत्ति" रिति तथा चासुरिः

विविक्ते दृक्परिणतौ बुद्धौ भोगोऽस्य कथ्यते ।
प्रतिबिम्बोदयः स्वच्छे यथा चन्द्रमसोऽम्भसि ॥
विन्ध्यवासी त्वेवं भोगमाचष्टे ।
पुरुषोऽविकृतात्मैव स्वनिर्भासमचेतनम् ॥
मनः करोति सांनिध्यादुपाधिः स्फटिकं यथा ।

न च वक्तव्यं पुरुषश्चेदगुणोऽपरिणामी कथमस्य मोक्षो मुचेर्बन्धनविश्लेषार्थत्वात्सवासनक्लेशकर्माशयानां च बन्धनसमाम्नातानां पुरुषेऽपरिणामिन्यसंभवात् अत एव नास्य प्रेत्यभावापरनामा संसारोऽस्ति निष्क्रियत्वादिति यतः प्रकृतिरेव नानापुरुषाश्रया सती बध्यते संसरति मुच्यते च न पुरुष इति बन्धमोक्षसंसाराः पुरुषे उपचर्यन्ते तथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्यन्ते तत्फलस्य कोश-

त्वाभावे: स्वामिनि संबन्धात्तथा भोगापवर्गयो: प्रकृतिगतयोरपि विवेकाग्रहात्पुरुषे संबन्ध इति तदेतदखिलमाल्मजालं चिच्छक्तिश्च विषयपरिच्छेदशून्या चेति परस्परविरुद्धं वच: चितौ संज्ञाने चेतनं चिन्त्यते वा ऽनयेति चित् सा चेत्स्वपरपरिच्छेदात्मिका नेष्यते तदा चिच्छक्तिरेव सा न स्याद्घटवत् न चामूर्त्तायाश्चिच्छक्ते बुद्धौ प्रतिबिम्बोदयो युक्त: तस्य मूर्तधर्मत्वात् न च तथा परिणाममन्तरेण प्रतिसंक्रमो ऽपि युक्त: कथं चित्सक्रियाकताव्यतिरेकेण प्रकृत्युपधाने ऽप्यन्यथात्वानुपपत्ते: अप्रच्युतप्राचीनरूपस्य च सुखदु:खादिभोगव्यपदेशानर्हत्वात् तत्प्रच्यवे च प्राक्तनरूपत्यागेनोत्तररूपाध्यासिततया सक्रियत्वापत्ति: स्फटिकादावपि तथा परिणामेनैव प्रतिबिम्बोदयसमर्थनादन्यथा कथमन्धोपलादौ न प्रतिबिम्बस्तथा परिणामाभ्युपगमे च बलादायातं चिच्छक्ते: कर्तृत्वं साक्षाद्भोक्तृत्वं च अथापरिणामिनी भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुभवतीति पतञ्जलिवचनादौपचारिक एवायं प्रतिसंक्रम इति चेत्तर्हि उपचारस्तत्त्वचिन्तायामनुपयोगीति प्रेक्षावतामनुपादेय एवायं तथा च प्रतिप्राणिप्रतीतं सुखदु:खादिसंवेदनं निराश्रयमेव स्यान्न चेदं बुद्धेरुपपन्नं तस्या जडत्वेनाभ्युपगमात् अत एव जडा च बुद्धिरित्यपि विरुद्धं न हि जडस्वरूपायां बुद्धौ विषयाध्यवसाय: साध्यमान: साधीय-

स्तां दधाति ननूक्तमचेतनापि बुद्धिश्चिच्छक्तिसांनि-ध्याच्चेतनावतीवावभासत इति सत्यमुक्तमयुक्तं तूक्तं न हि चैतन्यवति पुरुषादौ प्रतिसंक्रान्ते दर्पणस्य चैतन्यापत्तिश्चैतन्याचैतन्ययोरपरावर्तिस्वभावत्वेन शक्रेणाप्यन्यथाकर्तुमशक्यत्वात् किं चाचेतनापि चे-तनावतीव प्रतिभासत इति इव शब्देनारोपो ध्व-न्यते न चारोपोऽर्थक्रियासमर्थः न खल्वतिकोपन-त्वादिना समारोपिताग्नित्वो माणवकः कदा चिद-पि मुख्याग्निसाध्यां दाहपाकाद्यर्थक्रियां कर्तुमीश्वर इति चिच्छक्तेरेव विषयाध्यवसायो घटते न जड-रूपाया बुद्धेरिति अत एव धर्माद्यष्टरूपतापि तस्या वाङ्मात्रमेव धर्मादीनामात्मधर्मत्वात् अत एव चाहंकारोऽपि न बुद्धिजन्यो युज्यते तस्याभिमानात्म-कत्वेनात्मधर्मस्याचेतनादुत्पादायोगात् अम्बरादी-नां च शब्दादितन्मात्रजत्वं प्रतीतिपराहतत्वेनैव विहितोत्तरम् अपि च सर्वैरादिभिस्तावदविगानेन ग-गनस्य नित्यत्वमङ्गीक्रियतेऽयं च शब्दतन्मात्रात्तस्या-विर्भावमुद्भावयन्नित्यैकान्तवादिनां च धुरि आसनं-न्यासयन्नसंगतप्रलापीव प्रतिभाति न च परिणा-मिकारणं स्वकार्यस्य गुणो भवितुमर्हतीति शब्दगुण-माकाशमित्यादि वाङ्मात्रं वागादीनां चेन्द्रियत्वमेव न युज्यते इतरासाध्यकार्यकारित्वाभावात्परप्रतिपा-दनग्रहणविहरणमलोत्सर्गादिकार्याणामितरावयवै-रपि साध्यत्वोपलब्धेस्तथापि तत्त्वकल्पने इन्द्रिय-

संख्या न व्यवतिष्ठते अन्याङ्गोपाङ्गादीनामपीन्द्रियत्वप्रसङ्गात् यच्चोक्तं नानाश्रयायाः प्रकृतेरेव बन्धमोक्षौ संसारश्च न पुरुषस्येति तदप्यसारम् अनादिभवपरंपरानुबद्धया प्रकृत्या सह यः पुरुषस्य विवेकाग्रहणलक्षणोऽविष्वग्भावः स एव चेन्न बन्धस्तदा को नामान्यो बन्धः स्यात् प्रकृतिः सर्वोत्पत्तिमतां निमित्तमिति च प्रतिपद्यमानेनायुष्मता संज्ञान्तरेण कर्मैव प्रतिपन्नं तस्यैवैवंस्वरूपत्वादचेतनत्वाच्च यस्तु प्राकृतिकवैकारिकदाक्षिणभेदात् त्रिविधो बन्धस्तद्यथा प्रकृतावात्मज्ञानाद्ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः ये विकारानेव भूतेन्द्रियाहंकारबुद्धीः पुरुषबुद्ध्योपासते तेषां वैकारिकः इष्टापूर्ते दाक्षिणः पुरुषतत्त्वानभिज्ञो हीष्टापूर्तिकारी कामोपहतमना बध्यत इति

इष्टापूर्तं मन्यमाना वरिष्ठं
नान्यच्छ्रेयो येऽभिनन्दन्ति मूढाः।
नाकस्य पृष्ठे ते सुकृतेन भूत्वा
इमं लोकं हीनतरं वा विशन्ति॥

इतिवचनात् स त्रिविधोऽपि कल्पनामात्रं कथंचिन्मिथ्यादर्शनाविरतिप्रमादकषाययोगेभ्योऽभिन्नस्वरूपत्वेन कर्मबन्धहेतुष्वेवान्तर्भावात् बन्धसिद्धौ च सिद्धस्तस्यैव निर्बाधः संसारो बन्धमोक्षयोश्चैकाधिकरणत्वाद्य एव बद्धः स एव मुच्यत इति पुरुषस्यैव मो-

त्वः आबालगोपालं तथाप्रतीतेः प्रकृतिपुरुषविवेकद-र्शनात्प्रवृत्तेरुपरतायां प्रकृतौ पुरुषस्य स्वरूपेणाव-स्थानं मोक्ष इति चेन्न प्रवृत्तिस्वभावायाः प्रकृतेरौ-दासीन्यायोगात् अथ पुरुषार्थनिबन्धना तस्याः प्रवृ-त्तिर्विवेकख्यातिश्च पुरुषार्थस्तस्यां जातायां निवर्तते कृतकार्यत्वात्

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥

इति वचनात् इतिचेन्नैवं तस्या अचेतनाया विमृश्यकारित्वाभावात् यथेयं कृतेऽपि शब्दा-द्युपलम्भे पुनस्तदर्थं प्रवर्त्तते तथा विवेकख्या-तौ कृतायामपि पुनस्तदर्थं प्रवर्तिष्यते प्रवृत्ति-लक्षणस्य स्वभावस्यानपेतत्वात् नर्तकीदृष्टान्तस्तु स्वेष्टविघातकारी यथा हि नर्तकी नृत्यं पा-रिषदेभ्यो दर्शयित्वा निवृत्तापि पुनस्तत्कुतूहलात्प्र-वर्तते तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा नि-वृत्तापि पुनः कथं न प्रवर्ततामिति तस्मात्कृत्स्नकर्म-क्षये पुरुषस्यैव मोक्ष इति प्रतिपत्तव्यम् एवमन्यासा-मपि तत्कल्पनानां तमोमोहमहामोहतामिस्राम्धता-मिस्रभेदात्पञ्चधाविद्यास्मितारागद्वेषाभिनिवेशरूपो विपर्ययो ब्राह्मप्राजापत्यसौम्यैन्द्रगान्धर्वयक्षराक्षसपै-शाचभेदादष्टविधो दैवः सर्गः पशुमृगपक्षिसरीसृप-स्थावरभेदात्पञ्चविधस्तैर्यक्योनो ब्राह्मणत्वाद्यवा-

न्तरभेदाविवक्षया चैकविधो मानुष इति चतुर्दशधा भूतसर्गः बाधिर्यकुष्ठितान्धत्वजडताऽजिघ्रतामूकता-कौण्यपङ्गुत्वक्लैब्योदावर्त्तमत्तता रूपैकादशेन्द्रियवधतु-ष्टिनवकविपर्ययसिद्ध्यष्टकविपर्ययलक्षणसप्तदशबुद्धि-वधभेदादष्टाविंशतिधा शक्तिः प्रकृत्युपादानकालभो-गाख्याः अम्भःसलिलौघवृष्ट्यपरपर्यायवाच्याश्चतस्र आध्यात्मिक्यः शब्दादिविषयोपरतयश्चार्जनरक्षणक्ष-यभोगहिंसादोषदर्शनहेतुजन्मानः पञ्च बाह्यास्तुष्ट-यस्ताश्च पारसुपारपारापारानुत्तमाम्भउत्तमाम्भःश-ब्दव्यपदेश्या इति नवधा तुष्टिः वर्गो दुःखविघाता इ-ति मुख्यास्तिस्रः सिद्धयः प्रमोदमुदितमोदमानाख्या-स्तथाध्ययनं शब्द ऊहः सुहृत्प्राप्तिर्दानमिति दुःखवि-घातोपायतया गौण्यः पञ्च तारसुतारतारतारर-म्यकसदामुदिताख्या इत्येवमष्टधा सिद्धिः धृतिश्रद्धा-सुखविविदिषाविज्ञप्तिभेदात्पञ्च कर्मयोनय इत्यादी-नां संचरप्रतिसंचरादीनां च तत्त्वानां कौमुदीगौड-पादभाष्यादिप्रसिद्धानां विरुद्धत्वमुद्भावनीयमिति का-व्यार्थः ॥ १५ ॥

इदानीं ये प्रमाणादेकान्तेनाभिन्नं प्रमाणफलमा-हुर्ये च बाह्यार्थप्रतिक्षेपेण ज्ञानाद्वैतमेवास्तीति ब्रुवते तन्मतस्य विचार्यमाणत्वे विशरारुतामाह ।

**न तुल्यकालः फलहेतुभावो**
**हेतौ विलीने न फलस्य भावः ।**

**न संविदद्वैतपथेऽर्थसंवि-
द्विलूनशीर्णं सुगतेन्द्रजालम् ॥१६॥**

बौद्धाः किल प्रमाणात्तत्फलमेकान्तेनाभिन्नं मन्यन्ते तथा च तत्सिद्धान्त उभयत्र तदेवज्ञानं प्रमाणं फलम् अधिगमरूपत्वात् उभयत्रेति प्रत्यक्षे ऽनुमाने च तदेवज्ञानं प्रत्यक्षानुमानलक्षणं फलं कार्यं कुतोऽधिगमरूपत्वात् इति परिच्छेदरूपत्वात् तथा हि परिच्छेदरूपमेव ज्ञानमुत्पद्यते न च परिच्छेदादृते ऽन्यज् ज्ञानफलं भिन्नाधिकरणत्वादिति सर्वथा न प्रत्यक्षानुमानाभ्यां भिन्नं फलमस्तीति एतच्च न समीचीनं यतो यद्यस्मादेकान्तेनाभिन्नं तत्तेन सहैवोत्पद्यते यथा घटेन घटत्वं तैश्च प्रमाणफलयोः कार्यकारणभावो ऽभ्युपगम्यते प्रमाणं कारणं फलं कार्यमिति स चैकान्ताभेदे न घटते न हि युगपदुत्पद्यमानयोस्तयोः सव्येतरगोविषाणयोरिव कार्यकारणभावो युक्तः नियतप्राक्कालभावित्वात्कारणस्य नियतोत्तरकालभावित्वात्कार्यस्य एतदेवाह न तुल्यकालः फलहेतुभाव इति फलं कार्यं हेतुः कारणं तयोर्भावः स्वरूपं कार्यकारणभावः स तुल्यकालः समानकालो न युज्यत इत्यर्थः अथ क्षणान्तरितत्वात्तयोः क्रमभावित्वं भविष्यतीत्याशङ्क्याह हेतौ विलीने न फलस्य भाव इति हेतौ कारणे प्रमाणलक्षणे विलीने क्षणिकत्वादुत्पत्त्यनन्तरमेव निरन्वयं विनष्टे फलस्य

प्रमाणकार्यस्य न भावः सत्ता निर्मूलत्वात् विद्यमाने हि फलहेतावस्येदं फलमिति प्रतीयते नान्यथाऽति-प्रसङ्गात् किं च हेतुफलभावः संबन्धः स च द्विष्ठ एव स्यात् न चानयोः क्षणक्षयैकदीक्षितो भवान् संबन्धं क्षमते ततः कथमयं हेतुरिदं फलमिति प्रतिनियता प्रतीतिरेकस्य ग्रहणेऽप्यन्यस्याग्रहणे तदसम्भवात्

द्विष्टसंबन्धसंवित्तिर्नैकरूपप्रवेदनात् ॥

द्वयोः स्वरूपग्रहणे सति संबन्धवेदनम् ॥ इति

वचनात् यदपि धर्मोत्तरेणाऽर्थसारूप्यमस्य प्रमाणं तद्वशादर्थप्रतीतिसिद्धेरिति न्यायबिन्दुसूत्रं विवृण्वता भणितं नीलनिर्भासं हि विज्ञानं यतस्तस्मान्नीलस्य प्रतीतिरवसीयते येभ्यो हि चक्षुरादिभ्यो ज्ञानमुत्पद्यते न तद्वशात्तज्ज्ञानं नीलस्य संवेदनं शक्यतेऽवस्थापयितुं नीलसदृशं त्वनुभूयमानं नीलस्य संवेदनमवस्थाप्यते न चात्र जन्यजनकभावनिबन्धनः साध्यसाधनभावो येनैकस्मिन्वस्तुनि विरोधः स्यात् अपि तु व्यवस्थाप्यव्यवस्थापकभावेन तत एकस्य वस्तुनः किंचिद्रूपं प्रमाणं किंचित्प्रमाणफलं न विरुध्यते व्यवस्थापनहेतु हि सारूप्यं तस्य ज्ञानस्य व्यवस्थाप्यं च नीलसंवेदनरूपमित्यादि तदप्यसारम् एकस्य निरंशस्य ज्ञानलक्षणस्य व्यवस्थाप्यव्यवस्थापकत्वलक्षणस्वभावद्वयायोगात् व्यवस्थाप्यव्यवस्थापकभावस्यापि च सम्बन्धत्वेन द्विवृत्तित्वादेकस्मि-

न्नसम्भवात् किं चार्थसारूप्यमर्थाकारता तच्च नि-
श्चयरूपमनिश्चयरूपं वा निश्चयरूपं चेत्तदेव व्य-
वस्थापकमस्तु किमुभयकल्पनयाऽनिश्चितं चेत्स्व-
यमव्यवस्थितं कथं नीलादिसम्वेदनव्यवस्थापने स-
मर्थम् अपि च केयमर्थाकारता किमर्थग्रहणपरिणाम
आहोस्विदर्थाकारधारित्वं नाद्यः सिद्धसाधनात् द्वि-
तीयस्तु ज्ञानस्य प्रमेयाकारानुकरणाज्जडत्वापत्त्या-
दिदोषाघ्रातः तन्न प्रमाणादेकान्तेन फलस्याभेदः
साधीयान् सर्वथा तादात्म्ये हि प्रमाणफलयोर्न व्य-
वस्था तद्भावविरोधात् न हि सारूप्यमस्य प्रमाणम-
धिगतिः फलमिति सर्वथा तादात्म्ये सिद्ध्यत्यतिप्रस-
ङ्गात् न तु प्रमाणस्यासारूप्यव्यावृत्तिः सारूप्यमन-
धिगतिव्यावृत्तिरधिगतिरिति व्यावृत्तिभेदादेकस्यापि
प्रमाणफलव्यवस्थेति चेन्नैवं स्वभावभेदमन्तरेणान्य-
व्यावृत्तिभेदस्याप्यनुपपत्तेः कथं च प्रमाणस्य फलस्य
चाप्रमाणाफलव्यावृत्त्या प्रमाणफलव्यवस्थावत्प्रमा-
णान्तरफलान्तरव्यावृत्त्याप्यप्रमाणत्वस्याफलत्वस्य च
व्यवस्था न स्याद्विजातीयादिव सजातीयादपि व्यावृ
त्तत्वाद्वस्तुनः तस्मात्प्रमाणात्फलं कथंचिद्भिन्नमेवेष्टव्यं
साध्यसाधनभावेन प्रतीयमानत्वात् ये हि साध्यसा-
धनभावेन प्रतीयेते ते परस्परं भिद्येते यथा कुठार-
च्छिदिक्रिये इति एवं यौगाभिप्रेतः प्रमाणात्फल-
स्यैकान्तभेदोऽपि निराकर्तव्यः तस्यैकप्रमातृतादा
त्म्येन प्रमाणात्कथंचिदभेदव्यवस्थितेः प्रमाणतया

परिणतस्यैवात्मनः फलतया परिणतिप्रतीतेः यः प्रमिमीते स एवोपादत्ते परित्यजत्युपेक्षते चेति सर्वव्यवहारिभिरस्खलितमनुभवादितरथा स्वपरयोः प्रमाणफलव्यवस्थाविप्लवः प्रसज्यत इत्यलम् अथ वा पूर्वार्द्धमिदमन्यथाव्याख्येयं सौगताः किलेत्थं प्रमाणयन्ति सर्वं सत् क्षणिकं यतः सर्वं तावत् घटादिकं वस्तु मुद्गरसंनिधौ नाशं गच्छद् दृश्यते तत्र येन स्वरूपेणान्त्यावस्थायां घटादिकं विनश्यति तच्चेतत्स्वरूपम् उत्पन्नमात्रस्य विद्यते तदानीमुत्पादानन्तरमेव तेन नष्टव्यमिति व्यक्तमस्य क्षणिकत्वम् अथेदृश एव स्वभावस्तस्य हेतुतो जातो यत्कियन्तमपि कालं स्थित्वा विनश्यति एवं तर्हि मुद्गरादिसंनिधानेऽपि एष एव तस्य स्वभाव इति पुनरप्यनेन तावन्तमेव कालं स्थातव्यम् इति नैव विनश्येदिति सोऽयमदित्सोर्वणिजः-प्रतिदिनं पत्रलिखितश्वस्तनदिनभणनन्यायस्तस्मात्-क्षणद्वयस्थायित्वेनाप्युत्पत्तौ प्रथमक्षणवत् द्वितीयेऽपि क्षणे क्षणद्वयस्थायित्वात्पुनरपरक्षणद्वयमवतिष्ठेत एवं तृतीयेऽपि क्षणे तत्स्वभावत्वान्नैव विनश्येदिति स्यादेतत् स्थावरमेव च तत् स्वहेतोर्जातं परं बलिना विरोधकेन मुद्गरादिना विनाश्यत इति तदसत् कथं पुनरेतत् घटिष्यते न च तद्विनश्यति स्थावरत्वाद्विनाशश्च तस्य विरोधिना बलिना क्रियत इति न ह्येतत्संभवति जीवति च देवदत्तो मरणं चास्य भवतीति अथ विनश्यति तर्हि कथमविनश्वरं तद्वस्तु

स्वहेतोर्जातमिति न हि म्रियते चामरणधर्मा चेति युज्यते वक्तुं तस्मादविनश्वरत्वे कदाचिदपि नाशायोगात् दृष्टत्वाच्च नाशस्य नश्वरमेव तद्वस्तु स्वहेतोरुपजातमेवाङ्गीकर्त्तव्यं तस्मादुत्पन्नमात्रमेव विनश्यति तथा च क्षणक्षयित्वं सिद्धं भवति प्रयोगस्त्वेवं यद्विनश्वररूपं तदुत्पत्तेरनन्तरानवस्थायि यथान्त्यक्षणवर्तिघटस्य स्वरूपं विनश्वरस्वरूपं च रूपादिकमुदयकाल इति स्वभावहेतुः यदि क्षणक्षयिणो भावाः कथं तर्हि स एवायमिति प्रत्यभिज्ञा स्यात् उच्यते निरन्तरसदृशापरापरोत्पादादविद्यानुबन्धाच्च पूर्वक्षणविनाशकाल एव तत्सदृशं क्षणान्तरमुदयते तेनाकारविलक्षणत्वाभावादव्यवधानाच्चात्यन्तोच्छेदेऽपि स एवायमित्यभेदाध्यवसायी प्रत्ययः प्रसूयते अत्यन्तभिन्नेष्वपि लूनपुनरुत्पन्नकुशकाशकेशादिषु दृष्ट एवायं स एवायमिति प्रत्ययस्तथेहापि किं न सम्भाव्यते तस्मात्सर्वं सत् क्षणिकमिति सिद्धम् अत्र च पूर्वक्षणोपादानकारणं उत्तरक्षण उपादेयमिति च पराभिप्रायमङ्गीकृत्याह न तुल्यकाल इत्यादि ते विशकलितमुक्तावलीकल्पा निरन्वयविनाशिनः पूर्वक्षणा उत्तरक्षणान् जनयन्तः किं स्वोत्पत्तिकाल एव जनयन्ति उत क्षणान्तरे न तावदाद्यः समकालभाविनोर्युवतिकुचयोरिवोपादानोपादेयभावाभावादतः साधूक्तं न तुल्यकालः फलहेतुभाव इति न च द्वितीयस्तदानीं निरन्वयविनाशेन पूर्वक्षणस्य नष्टत्वादुत्तर-

क्षणजनने कुतः सम्भावनापि न चानुपादानस्योत्पत्तिर्दृष्टाऽतिप्रसङ्गादिति सुष्ठु व्याहृतं हेतौ विलीने न फलस्य भाव इति पदार्थस्त्वनयोः पादयोः प्रागेवोक्तः केवलमत्र फलमुपादेयं हेतुरुपादानं तद्भाव उपादानोपादेयभाव इत्यर्थः यच्च क्षणिकत्वस्थापनाय मोक्षाकरगुप्तेनानन्तरमेव प्रलपितं तत् स्याद्वादवादे निरवकाशमेव निरन्वयनाशवर्जं कथंचित्सिद्धसाधनात् प्रतिक्षणं पर्यायनाशस्यानेकान्तवादिभिरभ्युपगमात् यदप्यभिहितं नह्येतत् सम्भवति जीवति च देवदत्तो मरणं चास्य भवतीति तदपि संभवादेव न स्याद्वादवादिनां क्षतिमावहति यतो जीवनं प्राणधारणं मरणं चायुर्दलिकक्षयस्ततो जीवतोऽपि देवदत्तस्य प्रतिसमयमायुर्दलिकानामुदीर्णानां क्षयादुपपन्नमेव मरणं न च वाच्यमन्त्यावस्थायामेव कृत्स्नायुर्दलिकक्षयात् तत्रैव मरणव्यपदेशो युक्त इति तस्यामप्यवस्थायां प्रत्यक्षेण तत्क्षयाभावात् तत्रापि ह्यवशिष्टानामेव तेषां क्षयो न पुनस्तत्क्षण एव युगपत्सर्वेषामिति सिद्धं गर्भादारभ्य प्रतिक्षणं मरणमित्यलं प्रसङ्गेन अथ वा ऽपरथा व्याख्या सौगतानां किलार्थेन ज्ञानं जन्यते तच्च ज्ञानं तमेव स्वोत्पादकमर्थं गृह्णातीति ज्ञानकारणं विषय इति वचनात् ततश्चार्थः कारणं ज्ञानं च कार्यमिति एतच्च न चारु यतो यस्मिन् क्षणेऽर्थस्य स्वरूपसत्ता तस्मिन्नद्यापि ज्ञानं नोत्पद्यते तस्य तदा स्वोत्पत्तिमात्रव्यग्रत्वात् यत्र च क्षणे ज्ञानं

समुत्पन्नं तत्रार्थो ऽतीतः पूर्वापरकालभावनियतश्च कार्यकारणभावः क्षणातिरिक्तं चावस्थानं नास्ति ततः कथं ज्ञानस्योत्पत्तिः कारणस्य विलीनत्वात् तद्विलये च ज्ञानस्य निर्विषयता अनुषज्यते कारणस्यैव युष्मन्मते तद्विषयत्वान्निर्विषयं च ज्ञानमप्रमाणमेवाकाशकेशज्ञानवत् ज्ञानसहभाविनश्चार्थक्षणस्य न ग्राह्यत्वं तस्याकारणत्वात् अत आह न तुल्यकाल इत्यादि ज्ञानार्थयोः फलहेतुभावः कार्यकारणभावस्तुल्यकालो न घटते ज्ञानसहभाविनोऽर्थक्षणस्य ज्ञानानुत्पादकत्वात् युगपद्भाविनोः कार्यकारणभावायोगात् अथ प्राचोऽर्थक्षणस्य ज्ञानोत्पादकत्वं भविष्यति तन्न यत आह हेतावित्यादि हेतावर्थरूपे ज्ञानकारणे विलीने क्षणिकत्वान्निरन्वयं विनष्टे न फलस्य ज्ञानलक्षणकार्यस्य भाव आत्मलाभः स्यात् जनकस्यार्थक्षणस्यातीतत्वान्निर्मूलमेव ज्ञानोत्थानं स्यात् जनकस्यैव च ग्राह्यत्वे इन्द्रियाणामपि ग्राह्यत्वापत्तिस्तेषामपि ज्ञानजनकत्वात् न चान्वयव्यतिरेकाभ्यामर्थस्य ज्ञानहेतुत्वं दृष्टं मृगतृष्णादौ जलाभावेऽपि जलज्ञानोत्पादात् अन्यथा तत्प्रवृत्तेरसम्भवात् भ्रान्तं तत् ज्ञानमिति चेन्ननु भ्रान्ताभ्रान्तविचारः स्थिरीभूय क्रियतां त्वया सांप्रतं प्रतिपद्यस्व तावदनर्थजमपि ज्ञानम् अन्वयेनार्थस्य ज्ञानहेतुत्वं दृष्टमेवेति चेन्न न हि तद्भावे भावलक्षणोऽन्वय एव हेतुफलभावनिश्चयनिमित्तमपि तु तदभावेऽभावलक्षणो

व्यतिरेकोऽपि स चोक्तयुक्त्या नास्त्येव योगिनां चातीतानागतार्थग्रहणे किमर्थस्य निमित्तत्वं तयोरसत्वात् ।

न निव्वाणगयाभग्गापुजो न व्छिन्नणागए ।
निव्वुणुयानेवचिट्ठन्ति आरगेसरिसवोमा ॥

इति वचनात् निमित्तत्वे चार्थक्रियाकारित्वेन सत्त्वादतीतानागतत्वक्षतिः न च प्रकाश्यादात्मलाभ एव प्रकाशकस्य प्रकाशकत्वं प्रदीपादेर्घटादिभ्योऽनुत्पन्नस्यापि तत्प्रकाशकत्वात् जनकस्यैव च ग्राह्यत्वाभ्युपगमे स्मृत्यादेः प्रमाणस्याप्रामाण्यप्रसङ्गस्तस्यार्थाजन्यत्वात् न च स्मृतिर्न प्रमाणम् अनुमानप्राणभूतत्वात् साध्यसाधनसम्बन्धस्मरणपूर्वकत्वात्तस्य जनकमेव चेद्ग्राह्यं तदा स्वसंवेदनस्य कथं ग्राहकत्वं तस्य हि ग्राह्यं स्वरूपमेव न च तेन तज्जन्यते स्वात्मनि क्रियाविरोधात् तस्मात्स्वसामग्रीप्रभवयोर्घटप्रदीपयोरिवार्थज्ञानयोः प्रकाश्यप्रकाशकभावसम्भवान्न ज्ञाननिमित्तत्वमर्थस्य नन्वर्थाजन्यत्वे ज्ञानस्य कथं प्रतिनियतकर्मव्यवस्था तदुत्पत्तितदाकारताभ्यां हि सोपपद्यते तस्मादनुत्पन्नस्यातदाकारस्य च ज्ञानस्य सर्वार्थान् प्रत्यविशेषात्सर्वग्रहणं प्रसज्यते नैवं तदुत्पत्तिमन्तरेणाप्यावरणक्षयोपशमलक्षणया योग्यतयैव प्रतिनियतार्थप्रकाशकत्वोपपत्तेः तदुत्पत्तावपि च योग्यतावश्यमेष्टव्या अन्यथा तदर्थ-

सांनिध्येऽपि कुतश्चिदेवार्थात् कस्यचिदेव ज्ञानस्य जन्मेति कौतस्कुतोऽयं विभागः तदाकारतात्वर्थाकारसंक्रान्त्या तावदनुपपन्ना अर्थस्य निराकारत्वप्रसङ्गात् ज्ञानस्य साकारत्वप्रसङ्गाच्च अर्थेन च मूर्तेनामूर्तस्य ज्ञानस्य कीदृशं सादृश्यमित्यर्थविशेषग्रहणपरिणाम एव साभ्युपेया ततः।

अर्थेन घटयत्येनां न हि मुक्तार्थरूपताम्।
तस्मात्प्रमेयाधिगतेः प्रमाणं मेयरूपता॥

इति यत्किञ्चिदेतत् अपि च व्यस्ते समस्ते वैते ग्रहणकारणं स्यातां यदि व्यस्ते तदा कपालाद्यक्षणो घटान्त्यक्षणस्य जलचन्द्रो वा नभश्चन्द्रस्य ग्राहकः प्राप्नोति यथासंख्यं तदुत्पत्तेस्तदाकारत्वाच्च अथ समस्ते तर्हि घटोत्तरः क्षणः पूर्वघटक्षणस्य ग्राहकः प्रसजति तयोस्तयोरपि सद्भावात् ज्ञानरूपत्वे सत्येते ग्रहणकारणमिति चेत्तर्हि समानजातीयज्ञानस्य समनन्तरज्ञानग्राहकत्वं प्रसज्येत तयोर्जन्यजनकभावसद्भावात् तन्न योग्यतामन्तरेणान्यद् ग्रहणकारणं पश्याम इति अर्थोत्तरार्द्धं व्याख्यातुमुपक्रम्यते तत्र च बाह्यार्थनिरपेक्षं ज्ञानाद्वैतमेव ये बौद्धविशेषा मन्वते तेषां प्रतिक्षेपस्तन्मतं चेदं ग्राह्यग्राहकादिकलङ्कानङ्कितं निष्प्रपञ्चज्ञानमात्रं परमार्थसत् बाह्यार्थस्तु विचारमेव न क्षमते तथा हि कोऽयं बाह्यार्थः किं परमाणुरूपः स्थूलावयविरूपो वा न तावत्परमाणुरूपः प्रमाणाभा-

वात् प्रमाणं हि प्रत्यक्षमनुमानं वा न तावत्प्रत्यक्षं तत्साधनबद्धकक्षं तद्धि योगिनां स्यादस्मदादीनां वा नाद्यम् अत्यन्तविप्रकृष्टतया श्रद्धामात्रगम्यत्वान्न हि द्वितीयमनुभवबाधितत्वात् न हि वयम् अयं परमाणुरयं परमाणुरिति स्वप्नेऽपि प्रतीमः स्तम्भोऽयं कुम्भोऽयमिति एवमेव नः सदैव संवेदनोदयात् नाप्यनुमानेन तत्सिद्धिरणूनामतीन्द्रियत्वेन तैः सह अविनाभावस्य क्वापि लिङ्गे ग्रहीतुमशक्यत्त्वात् किं चामी नित्या अनित्या वा स्युर्नित्याश्चेत्क्रमेणार्थक्रियाकारिणो युगपद्वा न क्रमेण स्वभावभेदेनानित्यत्वापत्तेर्न युगपदेकक्षण एव कृत्स्नार्थक्रियाकरणात् क्षणान्तरे तदभावादसत्वप्राप्तिः अनित्याश्चेत् क्षणिकाः कालान्तरस्थायिनो वा क्षणिकाश्चेत्सहेतुका निर्हेतुका वा निर्हेतुकाश्चेन्नित्यं सत्त्वमसत्त्वं वा स्यान्निरपेक्षत्त्वादपेक्षते हि कादाचित्कत्त्वं सहेतुकाश्चेत्किं तथा स्थूलं किंचित्कारणं परमाणवो वा न स्थूलं परमाणुरूपस्यैव बाह्यार्थस्याङ्गीकृतत्वात् न हि परमाणवस्ते हि सन्तो ऽसन्तः सदसन्तो वा स्वकार्याणि कुर्युः सन्तश्चेत्किमुत्पत्तिक्षण एव क्षणान्तरे वा नोत्पत्तिक्षणे तदानीमुत्पत्तिमात्रव्यग्रत्वात् तेषाम् अथ “ भूतिर्येषां क्रिया सैव कारणं सैवचोच्यत ” इति वचनात् भवनमेव तेषामपरोत्पत्तौ कारणमिति चेदेवं तर्हि रूपाणवो रसाणूनां ते च तेषामुपादानं स्युरुभयत्र भवनाविशेषात् न च क्षणान्तरे नष्टत्त्वात् अथासन्त-

स्ते तदुत्पादकास्तर्हि एकं स्वसत्ताक्षणमपहाय सदा तदुत्पत्तिप्रसङ्गस्तदसत्त्वस्य सर्वदाऽविशेषात् सदसत्पक्षस्तु "प्रत्येकं यो भवेद्दोषो द्वयोर्भावे कथं न स" इति वचनात् विरोधाघ्रात एव तन्नाणवः क्षणिका नापि कालान्तरस्थायिनः क्षणिकपक्षसदृक्षयोगक्षेमत्वात् किं चामी कियत्कालस्थायिनोऽपि किमर्थक्रियापराङ्मुखास्तत्कारिणो वा आद्ये खपुष्पवदसत्त्वापत्तिः उदग्विकल्पे किमसद्रूपं सद्रूपमुभयरूपं वा ते कार्यं कुर्युः असद्रूपं चेच्छशविषाणादेरपि किं न करणं सद्रूपं चेत्ततोऽपि करणेऽनवस्था तृतीयभेदस्तु प्राग्वद्विरोधदुर्गन्धः तन्नाणुरूपोऽर्थः सर्वथा घटते नापि स्थूलावयविरूपः एकपरमाणवसिद्धौ कथमनेकतत्सिद्धिस्तदभावे च तत्प्रचयरूपः स्थूलावयवी वाङ्मात्रं किं चायमनेकावयवाधार इष्यते ते चावयवा यदि विरोधिनस्तर्हि नैकः स्थूलावयवी विरुद्धधर्माध्यासादविरोधिनश्चेत्प्रतीतिबाध एकस्मिन्नेव स्थूलावयविनि चलाचलरक्तारक्तावृतानावृतादिविरुद्धावयवानामुपलब्धेः अपि चासौ तेषु वर्तमानः कार्त्स्न्येनैकदेशेन वा वर्तते कार्त्स्न्येन वृत्तावेकस्मिन्नेवावयवे परिसमाप्तत्वादनेकावयववृत्तित्वं न स्यात् प्रत्यवयवं कार्त्स्न्येन वृत्तौ चावयविबहुत्वापत्तेः एकदेशेन वृत्तौ च तस्य निरंशत्वाभ्युपगमबाधः सांशत्वे वा तेंऽशास्ततो भिन्ना अभिन्ना वा भिन्नत्वे पुनरप्यनेकांशवृत्तेरेकस्य कार्त्स्न्यैकदेशविकल्पानतिक्रमादनव

स्या अभिन्नत्वे न केचिद्दोषाः स्युरिति नास्ति बाह्यो ऽर्थः कश्चित्किन्तु ज्ञानमेवेदं सर्वं नीलाद्याकारेण प्रतिभाति बाह्यार्थस्य जडत्वेन प्रतिभासायोगात् यथोक्तं "स्वाकारबुद्धिजनका दृश्या नेन्द्रियगोचराः" अलङ्कारकारेणाप्युक्तं ।

यदि संवेद्यते नीलं कथं बाह्यं तदुच्यते ।
न चेत्संवेद्यते नीलं कथं बाह्यं तदुच्यते ॥

यदि बाह्योऽर्थो नास्ति किंविषयस्तर्ह्ययं घटपटादिप्रतिभास इति चेन्ननु निरालम्बन एवायमनादिवितथवासनाप्रवर्तितो निर्विषयत्वादाकाशकेशज्ञानवत्स्वप्नज्ञानवद्वेति अत एवोक्तम् ।

नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥
बाह्यो न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते ।
वासनालुठितं चित्त मर्थाभासं प्रवर्तते ॥

इति तदेतत्सर्वमवद्यं ज्ञानमिति हि क्रियाशब्दस्ततो ज्ञायते ऽनेनेति ज्ञानं ज्ञप्तिर्वा ज्ञानमिति अस्य च कर्मणा भाव्यं निर्विषयाया ज्ञप्तेरघटनात् न चाकाशकेशादौ निर्विषयमपि दृष्टं ज्ञानमिति वाच्यं तस्याप्येकान्तेन निर्विषयत्वाभावान्न हि सर्वथागृहीतसत्यकेशज्ञानस्य तत्प्रतीतिः स्वप्नज्ञानमप्यनुभूतदृष्टाद्यर्थविषयत्वान्न निरालम्बनं तथा च महाभाष्यकारः ।

अणुहूय दिव्वचिंतिय
सु यपय इवि पारदेवयाणूवा।
सुमिणस्स निमित्ताइं
पुन्नं पावं च नाभावो॥

यश्च ज्ञानविषयः स च बाह्योर्थः भ्रान्तिरिय-मिति चेच्चिरं जीव भ्रान्तिर्हि मुख्ये ऽर्थे क्वचिद्दृष्टे सति करणापाटवादिना अन्यत्र विपर्यस्तद्ग्रहणे प्रसिद्धा यथा शुक्तौ रजतभ्रान्तिः अर्थक्रियासमर्थेऽपि वस्तुनि यदि भ्रान्तिरुच्यते तर्हि प्रलीना भ्रान्ता-भ्रान्तव्यवस्था तथा च सत्यमेतद्वचः

आशामोदकतृप्ता ये ये चास्वादितमोदकाः।
रसवीर्यविपाकादि तुल्यं तेषां प्रसज्यते॥

न चामून्यर्थदूषणानि स्याद्वादिनां बाधां विद-धते परमाणुरूपस्य स्थूलावयविरूपस्य चार्थस्याङ्गी-कृतत्वात् यच्च परमाणुपक्षखण्डने ऽभिहितं प्रमाणा-भावादिति तदसत् तत्कार्याणां घटादीनां प्रत्यक्षत्वे तेषामपि कथंचित्प्रत्यक्षत्वं योगिप्रत्यक्षेण च साक्षा-त्प्रत्यक्षत्वमवसेयम् अनुपलब्धिस्तु सौक्ष्म्यात् अनुमा-नादपि तत्सिद्धि र्यथा सन्ति परमाणवः स्थूलावयवि-निष्पत्त्यन्यथानुपपत्तेरित्यन्तर्व्याप्तिः न चाणुभ्यः स्थू-लोत्पाद इत्येकान्तः स्थूलादपि सूत्रपटलादेः स्थूलस्य पटादेः प्रादुर्भावविभावनात् आत्माकाशादेरपुद्गल-त्वकक्षीकाराच्च यत्र पुनरणुभ्यस्तदुत्पत्तिस्तत्र तत्त-

त्कालादिसामग्रीसव्यपेक्षक्रियावशात्प्रादुर्भूतं संयोगातिशयमपेक्ष्ययमवितथैव यदपि किं चायमनेकावयवाधार इत्यादि व्यगादि तत्रापि कथं चिद्विरोध्यनेकावयवाविष्वग्भूतवृत्तिरवयव्यभिधीयते तत्र च यद्विरोध्यनेकावयवाधारतायां विरुद्धधर्माध्यासनमभिहितं तत्कथं चिदुपेयत एव तावदवयवात्मकस्य तस्यापि कथं चिदनेकरूपत्वात् यच्चोपन्यस्तमपिचासौ तेषु वर्तमानः कार्त्स्न्येनैकदेशेन वा वर्त्ततेत्यादि तत्रापि विकल्पद्वयानभ्युपगम एवोत्तरम् अविष्वग्भावेनावयविनोऽवयवेषु वृत्तेः स्वीकारात् किं च यदि बाह्योऽर्थो नास्ति किमिदानीं नियताकारं प्रतीयते नीलमेतदिति विज्ञानाकारोऽयमिति चेन्न ज्ञानाद्बहिर्भूतस्य संवेदनात् ज्ञानाकारत्वेत्वहं नीलमिति प्रतीतिः स्यान्नत्विदं नीलमिति ज्ञानानां प्रत्येकमाकारभेदात्कस्य चिदहमिति प्रतिभासः कस्यचिन्नीलमेतदिति चेन्न नीलाद्याकारवदहमित्याकारस्य व्यवस्थितत्वाभावात् तथा च यदेकेनाहमिति प्रतीयते तदेवापरेण त्वमितिप्रतीयते नीलाद्याकारस्तु व्यवस्थितः सर्वैरप्येकरूपतया ग्रहणात् भक्षितहृत्पूरादिभिस्तु यद्यपि नीलादिकं पीतादितया गृह्यते तथापि तेन न व्यभिचारस्तस्य भ्रान्तत्वात् स्वयं स्वस्य संवेदनेऽहमिति प्रतिभासत इति चेन्ननु किं परस्यापि संवेदनमस्ति कथमन्यथा स्वशब्दस्य प्रयोगः प्रतियोगिशब्दोऽह्ययं परमपेक्ष्यमाण

एव प्रवर्त्तते स्वरूपस्यापि भ्रान्त्या भेदप्रतीतिरिति चेत् हन्त प्रत्यक्षेण प्रतीतो भेदः कथं न वास्तवः भ्रान्तं प्रत्यक्षमिति चेन्ननु कुत एतत् अनुमानेन ज्ञानार्थयोरभेदसिद्धेरिति चे त्किं तदनुमानमिति पृच्छामः यद्येन सह नियमेनोपलभ्यते तत्ततो न भिद्यते यथा सच्चन्द्राद्सच्चन्द्रः नियमेनोपलभ्यते च ज्ञानेन सहार्थ इति व्यापकानुपलब्धिः प्रतिषेध्यस्य ज्ञानार्थयोर्भेदस्य व्यापकः सहोपलम्भानियमस्तस्यानुपलब्धिर्भिन्नयोर्नीलपीतयोर्युगपदुपलम्भनियमाभावात् इत्यनुमानेन तयोरभेदसिद्धिरिति चेन्न संदिग्धानैकान्तिकत्वेनास्यानुमानाभासत्वात् ज्ञानं हि स्वपरसंवेदनं तत् संवेदनतामात्रेणैव नीलं गृह्णाति स्वसंवेदनतामात्रेणैव च नीलबुद्धिं तदेवमनयो र्युगपद्ग्रहणात्सहोपलम्भनियमोऽस्ति अभेदश्च नास्ति इति सहोपलम्भनियमरूपस्य हेतोर्विपक्षाद्व्यावृत्तेः संदिग्धत्वात् संदिग्धानैकान्तिकत्वम् असिद्धश्च सहोपलम्भनियमः नीलमेतदिति बहिर्मुखतयाऽर्थेऽनुभूयमाने तदानीमेवान्तरस्य नीलानुभवस्याननुभवादिति कथं प्रत्यक्षस्यानुमानेन ज्ञानार्थयोरभेदसिद्ध्या भ्रान्तत्वम् अपि च प्रत्यक्षस्याभ्रान्तत्वेनाबाधितविषयत्वादनुमानस्यात्मलाभो लब्धात्मके चानुमाने प्रत्यक्षस्य भ्रान्तत्वमित्यन्योन्याश्रयदोषोऽपि दुर्निवारः अर्थाभावे च नियतदेशाधिकरणप्रतीतिः कुतः न हि तत्र विवक्षितदे-

शे ऽयमारोपयितव्यो नान्यत्रेत्यस्ति नियमे हेतुः वासनानियमात्तदारोपनियम इति चेन्न तस्या अपि तद्देशनियमकारणाभावात् सति ह्यर्थसद्भावे यद्देशोऽर्थ स्तद्देशोऽनुभवस्तद्देशा च तत्पूर्विका वासना बाह्यार्थाभावे तु तस्याः किंकृतो देशनियमः अथास्ति तावादारोपनियमो न च कारणविशेषमन्तरेण कार्यविशेषो घटते बाह्यश्चार्थो नास्ति तेन वासनानामेव वैचित्र्यं तत्र हेतुरिति चेत्तद्वासनावैचित्र्यं बोधाकारादन्यदनन्यद्वा अनन्यच्चे द्बोधाकारस्यैकत्वात्कस्तासां परस्परतो विशेषः अन्यच्चे दर्थे कः प्रद्वेषः येन सर्वलोकप्रतीतिरपन्हूयते तदेवं सिद्धो ज्ञानार्थयोर्भेदः तथा च प्रयोगः विवादाध्यासितं नीलादि ज्ञानादतिरिक्तं विरुद्धधर्माध्यस्तत्वात् विरुद्धधर्माध्यासश्च ज्ञानस्य शरीरान्तः अर्थस्य च बहिः ज्ञानस्यापरकाले ऽर्थस्य च पूर्वकाले हत्तित्वात् ज्ञानस्य आत्मनः सकाशादर्थस्य स्वकारणेभ्य उत्पत्तेः ज्ञानस्य प्रकाशरूपत्वादर्थस्य च जडरूपत्वादिति अतो न ज्ञानाद्वैतेऽभ्युपगम्यमाने बहिरनुभूयमानार्थप्रतीतिः कथमपि संगतिमङ्गति न च दृष्टमपह्नोतुं शक्यम् इति अत एवाह स्तुतिकारः न संविदद्वैतपथेऽर्थसंविदिति सम्यगवैपरीत्येन विद्यतेऽवगम्यते वस्तुस्वरूपमनयेति संवित्स्वसंवेदनपक्षे तु संवेदनं संवित् ज्ञानं तस्या अद्वैतं द्वयोर्भावो द्विता द्वितैव द्वैतं प्रज्ञादित्वात् स्वार्थिकेऽणि न द्वैतमद्वैतं बाह्यार्थप्रतिक्षेपादेकत्वं सं-

विदद्वैतं ज्ञानमेवैकं तात्त्विकं न बाह्योऽर्थ इत्यभ्युपगम इत्यर्थः तस्य पन्थाः मार्गः संविदद्वैतपथस्तस्मिन् ज्ञानाद्वैतवादपक्ष इति यावत्किमित्याह नार्थसंवित् येयं बहिर्मुखतयाऽर्थप्रतीतिः साक्षादनुभूयते सा न घटते इत्युपस्कारः एतच्चानन्तरमेव भावितम् एवंस्थिते सति किमित्याह विलूनशीर्णं सुगतेन्द्रजालमिति सुगतो मायापुत्रस्तस्य सम्बन्धि तेन परिकल्पितं क्षणक्षयादिवस्तुजातम् इन्द्रजालमिवेन्द्रजालमतिव्यामोहविधायकत्वात् सुगतेन्द्रजालं सर्वमिदं विलूनशीर्णं पूर्वं विलूनं पश्चात् शीर्णं विलूनशीर्णं यथा किंचित्तृणस्तम्बादि विलूनमेव शीर्यते विनश्यति एवं तत्कल्पितमिन्द्रजालं तृणप्रायं धारालयुक्तिशस्त्रिकया छिन्नं सद्विशीर्यत इति अथ वा यथा निपुणेन्द्रजालिककल्पितमिन्द्रजालमवास्तवतत्तदद्भुतवस्तूपदर्शनेन तथाविधबुद्धिदुर्विधं जनं विप्रतार्य पश्चादिन्द्रधनुरिव निरवयवं विलूनशीर्णतां कलयति तथा सुगतपरिकल्पितं तत्तत्प्रमाणतत्तत्फलाभेदक्षणक्षयज्ञानार्थहेतुकतत्वज्ञानाद्वैताभ्युपगमादि सर्वं प्रमाणानभिज्ञं लोकं व्यामोहयमानमपि युक्त्या विचार्यमाणं विशरारुतामेव सेवत इत्यत्र च सुगतशब्द उपहासार्थः सौगता हि शोभनं गतं ज्ञानमस्येति सुगत इत्युशन्ति ततश्चाहो तस्य शोभनज्ञानता येनेत्थमयुक्तियुक्तमुक्तमिति काव्यार्थः ॥१६॥

अथ तत्त्वव्यवस्थापकप्रमाणादिचतुष्टयव्यवहारा-

प्रलापिनः शून्यवादिनः सौगतजातीयांस्तत्कक्षीकृतपक्षसाधकस्य प्रमाणस्याङ्गीकारानङ्गीकारलक्षणपक्षद्वयेऽपि तदभिमतार्थासिद्धिप्रदर्शनपूर्वकमुपहसन्नाह ।

**विना प्रमाणं परवन्न शून्यः**
**स्वपक्षसिद्धेः पदमश्नुवीत ।**
**कुप्येत्कृतान्तः स्पृशते प्रमाण-**
**महो सुदृष्टं त्वदसूयिदृष्टम् ॥१७॥**

शून्यः शून्यवादी प्रमाणं प्रत्यक्षादिकं विना अन्तरेण स्वपक्षसिद्धेः स्वाभ्युपगतशून्यवादनिष्पत्तेः पदं प्रतिष्ठां नाश्नुवीत न प्राप्नुयात् किं च परवत् इतरप्रामाणिकवत् वैधर्म्येणायं दृष्टान्तः यथा इतरे प्रामाणिकाः प्रमाणेन साधकतमेन स्वपक्षसिद्धिमश्नुवते एवं नायम् अस्य मते प्रमाणप्रमेयादिव्यवहारस्यापारमार्थिकत्वात् सर्वएव बायमनुमानानुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्मिभावेन "न बहिः सत्वमपेक्षत" इत्यादि वचनात् अप्रमाणकस्य शून्यवादाभ्युपगमः कथमिव प्रेक्षावतामुपादेयो भविष्यति प्रेक्षावत्त्वव्याहतिप्रसङ्गात् अथ चेत्स्वपक्षसंसिद्धये किमपि प्रमाणमयमङ्गीकुरुते तत्रायमुपालम्भः कुप्येदित्यादि प्रमाणं प्रत्यक्षाद्यन्यतमत्स्पृशते आश्रयमा-

णाय प्रकरणादस्मै शून्यवादिने कृतान्तस्तत्सिद्धान्तः कुप्येत्कोपं कुर्यात् सिद्धान्तबाधः स्यादित्यर्थः यथा किल सेवकस्य विरुद्धवृत्त्या कुपितो नृपतिः सर्वस्वमपहरति एवं तत्सिद्धान्तोऽपि शून्यवादविरुद्धं प्रमाणाभावमङ्गीकुर्वाणस्य तस्य सर्वस्वभूतं सम्यग्वादित्वम् अपहरति किं च स्वागमोपदेशेनैव तेन वादिना शून्यवादः प्ररूप्यते इति स्वीकृतमागमस्य प्रामाण्यमिति कुतस्तस्य स्वपक्षसिद्धिः प्रमाणाङ्गीकरणात् किं च प्रमाणं प्रमेयं विना न भवतीति प्रमाणानङ्गीकरणे प्रमेयमपि विशीर्णं ततश्चास्य मूकतैव युक्ता न पुनःशून्यवादोपन्यासाय तुण्डताण्डवडम्बरं शून्यवादस्यापि प्रमेयत्वात् अत्र च स्पृशिधातुं कृतान्तशब्दं प्रयुञ्जानस्य सूरेरयमभिप्रायः यदसौ शून्यवादी दूरे प्रमाणस्य सर्वथाङ्गीकारे यावत्प्रमाणस्पर्शमात्रमपि विधत्ते तस्मै कृतान्तो यमराजः कुप्येत् तत्कोपो हि मरणफलस्ततश्च स्वसिद्धान्तविरुद्धमसौ प्रमाणयन्निग्रहस्थानापन्नत्वान्मृत एवेति एवं सति अहो इत्युपहासप्रशंसार्थं तुभ्यमसूयन्ति गुणेषु दोषानाविष्कुर्वन्तीत्येवं शीलास्त्वदसूयिनस्तन्त्रान्तरीयास्तैर्दृष्टमल्पज्ञानचक्षुषा निरीक्षितम् अहो सुदृष्टं साधुदृष्टं विपरीतलक्षणयोपहासान्न सम्यग्दृष्टमित्यर्थः अत्रासूयधातोस्ताच्छील्यिकणक्प्राप्तावपि बाहुलकाणिन् असूयाऽस्त्येषामित्यसूयिनस्त्वय्यसूयिन इति मत्वर्थीयान्तं वा त्वदसूयुदृष्टमिति पाठेऽपि न किंचिदचारु अ-

सूयुशब्दस्योदन्तस्योदयनाद्यैर्न्यायतात्पर्यपरिशुद्ध्यादौ मत्सरिणि प्रयोगादिति इह शून्यवादिनामयमभिसंधिः प्रमाता प्रमेयं प्रमाणं प्रमितिरिति तत्त्वचतुष्टयं परपरिकल्पितमवस्त्वेव विचारासहत्त्वात्तुरङ्गशृङ्गवत् तत्र प्रमाता तावदात्मा तस्य च प्रमाणग्राह्यत्वाभावादभावस्तथा हि न प्रत्यक्षेण तत्सिद्धिरिन्द्रियगोचरातिक्रान्तत्वात् यत्तु अहंकारप्रत्ययेण तस्य मानसप्रत्यक्षत्वसाधनं तदप्यनैकान्तिकं तस्याहं गौरः श्यामो वेत्यादौ शरीराश्रयतयाप्युपपत्तेः किं च यद्ययमहंकारप्रत्यय आत्मगोचरः स्यात्तदा न कादाचित्कः स्यादात्मनः सदा सन्निहितत्वात्कादाचित्कं हि ज्ञानं कदाचित्कारणपूर्वकं दृष्टं यथा सौदामिनीज्ञानमिति नाप्यनुमानेन अव्यभिचारिलिङ्गाग्रहणात् आगमानां च परस्परविरुद्धार्थवादिनां नास्त्येव प्रामाण्यं तथा हि एकेन कथमपि कश्चिदर्थो व्यवस्थापितो ऽभियुक्ततरेणापरेण स एवान्यथा व्यवस्थाप्यते स्वयमव्यवस्थितप्रामाण्यानां च तेषां च कथमन्यव्यवस्थापने सामर्थ्यमिति नास्ति प्रमाता प्रमेयं च बाह्योऽर्थः स चानन्तरमेव बाह्यार्थप्रतिक्षेपक्षणे निर्लोठितः प्रमाणं च स्वपरावभासिज्ञानं तच्च प्रमेयाभावे कस्य ग्राहकमस्तु निर्विषयत्वात् किं चैतदर्थसमकालं तद्भिन्नकालं वा तद्ग्राहकं कल्पयेत आद्यपक्षे त्रिभुवनवर्तिनोऽपि पदार्थास्तत्रावभासिरन् समकालत्वाविशेषात्

द्वितीये तु निराकारं साकारं वा तत्स्यात् प्रथमे प्रतिनियतपदार्थपरिच्छेदानुपपत्तिः द्वितीये तु किमयमाकारो व्यतिरिक्तोऽव्यतिरिक्तो वा ज्ञानात् अव्यतिरेके ज्ञानमेवायं तथा च निराकारपक्षदोषः व्यतिरेके यद्ययं चिद्रूपः तदानीमाकारोऽपि वेदकः स्यात् तथा चायमपि निराकारः साकारो वा तद्वेदको भवेदित्यावर्त्तनेनानवस्था अथाचिद्रूपः किमज्ञातो ज्ञातो वा तज्ज्ञापकः स्यात्प्राचीने विकल्पे चैत्रस्येव मैत्रस्यापि तज्ज्ञापकोऽसौ स्यात् तदुत्तरे तु निराकारेण साकारेण वा ज्ञानेन तस्यापि ज्ञानं स्यादित्याद्यावृत्तावनवस्थैवेति इत्थं प्रमाणाभावे तत्फलरूपा प्रमितिः कुतस्तनीति सर्वशून्यतैव परं तत्त्वमिति तथा च पठन्ति ।

यथा यथा विचार्यन्ते विशीर्यन्ते तथा तथा ।
यदेतत्स्वयमर्थेभ्यो रोचते तत्र के वयम् ॥

इति पूर्वपक्षः विस्तरतस्तु प्रमाणखण्डनं तत्त्वोपप्लवसिंहादवलोकनीयम् अत्र प्रतिविधीयते ननु यदिदं शून्यवादव्यवस्थापनाय देवानांप्रियेण वचनमुपन्यस्तं तच्छून्यमशून्यं वा शून्यं चेत्सर्वोपाख्याविरहितत्वात् खपुष्पेणेव नानेन किंचित्साध्यते निषिध्यते वा ततश्च निष्प्रतिपक्षा प्रमाणादितत्त्वचतुष्टयीव्यवस्था अशून्यं चेत्प्रलीनस्तपस्वी शून्यवादः भवद्वचनेनैव सर्वशून्यताया व्यभिचारात् तत्रापि निष्कण्टिकैव

सा भगवती तथापि प्रामाणिकसमयपरिपालनार्थं किञ्चित्तत्साधनं दृश्यते तत्र यत्तावदुक्तं प्रमातुः प्रत्यक्षेण न सिद्धिरिन्द्रियगोचरातिक्रान्तत्वात् इति तत्सिद्धसाधनं यत्पुनरहंप्रत्ययेन तस्य मानसप्रत्यक्षत्वमनैकान्तिकमित्युक्तं तदसिद्धम् अहं सुख्यहं दुःखीत्यन्तर्मुखस्य प्रत्ययस्य आत्मालम्बनतयैवोपपत्तेः तथा चाहुः ।

सुखादिचेत्यमानं हि स्वतन्त्रं नानुभूयते ।
मतुबर्थानुवेधात्तु सिद्धं ग्रहणमात्मनः ॥
इदं सुखमिति ज्ञानं दृश्यते न घटादिवत् ।
अहं सुखीति तु ज्ञप्तिरात्मनोऽपि प्रकाशिका ॥

यत्पुनरहं गौरोऽहं श्याम इत्यादिबहिर्मुखः प्रत्ययः स खल्वात्मोपकारकत्वेन लक्षणया शरीरे प्रयुज्यते यथा प्रियभृत्येऽहमिति व्यपदेशः यच्चाहंप्रत्ययस्य कादाचित्कत्वं तत्रेयं वासना आत्मा तावदुपयोगलक्षणः स च साकारानाकारोपयोगयोरन्यतरस्मिन्नियमेनोपयुक्त एव भवति अहंप्रत्ययोऽपि चोपयोगविशेष एव तस्य च कर्मक्षयोपशमवैचित्र्यादिन्द्रियानिन्द्रियालोकविषयादिनिमित्तसव्यपेक्षतया प्रवर्त्तमानस्य कादाचित्कत्वमुपपन्नमेव यथा बीजं सत्यामप्यङ्कुरोपजननशक्तौ पृथिव्युदकादिसहकारिकारणकलापसमवहितमेवाङ्कुरं जनयति नान्यथा न चैतावता तस्याङ्कुरोत्पादने कादाचित्केऽपि तदुत्पाद-

नशक्तिरपि कादाचित्की तस्याः कथं चिन्नित्यत्वादेवमात्मनः सदा सन्निहितत्वेऽप्यहंप्रत्ययस्य कादाचित्कत्वं यदप्युक्तं "तस्याव्यभिचारि लिङ्गं किमपि नोपलभ्यत" इति तदप्यसारं साध्याविनाभाविनोऽनेकस्य लिङ्गस्य तत्रोपलब्धेः तथा हि रूपाद्युपलब्धिः सकर्तृका क्रियात्वात् छिदिक्रियावत् यश्चास्याः कर्त्ता स आत्मा न चात्र चक्षुरादीनां कर्त्तृत्वं तेषां कुठारादिवत् करणत्वेनास्वतन्त्रत्वात् करणत्वं चैषां पौद्गलिकत्वेनाचेतनत्वात् परप्रेर्यत्वात् प्रयोक्तृव्यापारनिरपेक्षप्रवृत्त्यभावात् यदीन्द्रियाणामेव कर्त्तृत्वं स्यात्तदा तेषु विनष्टेषु पूर्वानुभूतार्थस्मृतेर्मया दृष्टं स्पृष्टम् आघ्रातम् आस्वादितं श्रुतमिति प्रत्ययानामेककर्त्तृकत्वप्रतिपत्तेश्च कुतः सम्भवः किं चेन्द्रियाणां स्वस्वविषयनियतत्वेन रूपरसयोः साहचर्यप्रतीतौ न सामर्थ्यम् अस्ति च तथाविधफलादे रूपग्रहणानन्तरं तत्सहचरितरसानुस्मरणं दन्तोदकसंप्लवान्यथानुपपत्तेः तस्मादुभयोर्गवाक्षयोरन्तर्गतः प्रेक्षक इव द्वाभ्यामिन्द्रियाभ्यां रूपरसयोर्द्दर्शी कश्चिदेको ऽनुमीयते तस्मात्करणान्येतानि यश्चैषां व्यापारयिता स आत्मा तथा साधनोपादानपरिवर्जनद्वारेण हिताहितप्राप्तिपरिहारसमर्था चेष्टा प्रयत्नपूर्विका विशिष्टक्रियात्वा द्रथक्रियावत् शरीरं च प्रयत्नवदधिष्ठितं विशिष्टक्रियाश्रयत्वाद्रथवत् यश्चास्याधिष्ठाता स आत्मा सारथिवत् तथात्रैवपक्षे इच्छापूर्वकविकृतवाय्वाश्रयत्वात्

भस्त्रावत् वायुश्च प्राणापानादिर्यश्चास्याधिष्ठाता स आत्मा भस्त्राध्मापयितृवत् तथाऽत्रैवपक्षे इच्छाधीननिमेषोन्मेषवदवयवयोगित्वाद्दारुयन्त्रवत् तथा शरीरस्य वृद्धिच्छतभग्नसंरोहणं च प्रयत्नवत्कृतं वृद्धिच्छतसंरोहणत्वात् गृहवृद्धिच्छतभग्नसंरोहणवत् वृक्षादिगतेन वृद्ध्यादिना व्यभिचार इति चेन्न तेषामपि एकेन्द्रियजन्तुत्वेन सात्मकत्वात् यश्चैषां कर्त्ता स आत्मा गृहपतिवत् वृक्षादीनां च सात्मकत्वमाचाराङ्गादेरवसेयं किं चिद्वक्ष्यते च तथा प्रेर्यं मनः अभिमतविषयसम्बन्धनिमित्तक्रियाश्रयत्वाद्दारकहस्तगतगोलकवत् यश्चास्य प्रेरकः स आत्मा इति तथा आत्मचेतनक्षेत्रज्ञजीवपुरुषादयः पर्याया न निर्विषयाः पर्यायत्वात् घटकुटकलशादिपर्यायवत् व्यतिरेके यच्चभूतादि यश्चैषां विषयः स आत्मा तथा ऽस्त्यात्मा समस्तपर्यायवाच्यत्वात् यो यः साङ्केतिकशुद्धपर्यायवाच्यः स सोऽस्तित्वं न व्यभिचरति यथा घटादि व्यतिरेके खरविषाणनभोऽम्भोरुहादयः तथा सुखादीनि द्रव्याश्रितानि गुणत्वाद्रूपवत् योऽसौ गुणी स आत्मेत्यादिलिङ्गानि तस्मादनुमानतोऽप्यात्मा सिद्धः आगमानां च येषां पूर्वापरविरुद्धार्थत्वं तेषामप्रामाण्यमेव यस्त्वाप्तप्रणीत आगमः स प्रमाणमेव कषच्छेदतापलक्षणोपाधित्रयविशुद्धत्वात् कषादीनां च स्वरूपं पुरस्ताद्वक्ष्यामः न च वाच्यमाप्तः क्षीणसर्वदोषस्तथाविधं चाप्तत्वं कस्यापि नास्तीति यतो रागादयः

कस्य चिदत्यन्तमुच्छिद्यन्ते अस्मदादिषु तदुच्छेदप्रकर्षापकर्षोपलम्भात् सूर्याद्यावरकजलदपटलवत् तथा प्राहुः।

देशतो नाशिनो भावा दृष्टा निखिलनश्वराः।
मेघपङ्क्त्यादयो यद्वदेवं रागादयो मताः॥

इति यस्य च निरवयवतयैते विलीनाः स एवाप्तो भगवान् सर्वज्ञः अथानादित्वाद्रागादीनां कथं प्रक्षय इति चेन्न उपायतस्तद्भावात् अनादेरपि सुवर्णमलस्य चारमृत्पुटपाकादिना विलयोपलम्भात् तद्वदेवानादीनामपि रागादिदोषाणां प्रतिपक्षभूतरत्नत्रयाभ्यासेन विलयोपपत्तेः क्षीणदोषस्य च केवलज्ञानाव्यभिचारात्सर्वज्ञत्वं तत्सिद्धिस्तु ज्ञानतारतम्यं क्वचिद्विश्रान्तं तारतम्यत्वात् आकाशपरिमाणतारतम्यवत् तथा सूक्ष्मान्तरितदूरार्थाः कस्य चित्प्रत्यक्षा अनुमेयत्वात् क्षितिधरकन्धराधिकरणधूमध्वजवत् एवं चन्द्रसूर्योपरागादिसूचकज्योतिर्ज्ञानाविसंवादान्यथाऽनुपपत्तिप्रभृतयोऽपि हेतवो वाच्यास्तदेवमाप्तेन सर्वविदा प्रणीत आगमः प्रमाणमेव तदप्रामाण्यं हि प्रणायकदोषनिबन्धनम्।

रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम्।
यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात्॥

इति वचनात् प्रणेतुश्च निर्दोषत्वमुपपादितमेवेति

सिद्ध आगमादप्यात्मा "रागेआया" इत्यादिवचनात् तदेवं प्रत्यक्षानुमानागमैः सिद्धः प्रमाता प्रमेयं चानन्तरमेव बाह्यार्थसाधने साधितं तत्सिद्धौ च प्रमाणं ज्ञानं प्रमेयाभावे कस्य ग्राहकमस्तु निर्विषयत्वादिति प्रलापमात्रं करणमन्तरेण क्रियासिद्धेरयोगात् लवनादिषु तथादर्शनात् यच्चात्र समकालमित्याद्युक्तं तत्र विकल्पद्वयमपि स्वीक्रियत एव अस्मदादिप्रत्यक्षं हि समकालार्थकलनकुशलं स्मरणमतीतार्थस्य ग्राहकं शब्दानुमाने च त्रैकालिकस्याप्यर्थस्य परिच्छेदके निराकारं चैतद्द्वयमपि न चातिप्रसङ्गः स्वज्ञानावरणवीर्यान्तरायक्षयोपशमविशेषवशादेवास्य नैयत्येन प्रवृत्तिः शेषविकल्पानामस्वीकार एव तिरस्कारः प्रमितिस्तु प्रमाणस्य फलं स्वसंवेदनसिद्धैव न ह्यनुभवेऽप्युपदेशापेक्षा फलं च द्विधानन्तर्यपारम्पर्यभेदात् तत्रानन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्तिः फलं पारम्पर्येण केवलज्ञानस्य तावत् फलमौदासीन्यं शेषप्रमाणानां तु हानोपादानोपेक्षाबुद्धय इति सुव्यवस्थितं प्रमात्रादिचतुष्टयं ततश्च ।

नासन्न सन्न सदसन्न चाप्यनुभयात्मकम् ।
चतुष्कोटिविनिर्मुक्तं तत्त्वमाध्यात्मिका विदुः ॥

इत्युन्मत्तभाषितं किं चेदं प्रमात्रादीनाम् अवास्तवत्वं शून्यवादिना वस्तुवृत्त्या तावदेष्टव्यं तच्चासौ प्रमाणादभिमन्यते ऽप्रमाणाद्वा न तावदप्रमाणात्तस्या-

किंचित्करत्वात् अथ प्रमाणात् तन्न अवास्तवत्वग्राहकं प्रमाणं सांवृतमसांवृतं वा स्यात् यदि सांवृतं कथं तस्मादवास्तवाद्वास्तवस्य शून्यवादस्य सिद्धिप्राप्तः स्तथा च वास्तव एव समस्तोऽपि प्रमाणादिव्यवहारः अथ तद्ग्राहकं प्रमाणं स्वयमसांवृतं तर्हि क्षीणाः प्रमाणादिव्यवहारा वास्तवत्व प्रतिज्ञातेनैव व्यभिचारात्तदेवं पक्षद्वयेऽपि इतो व्याघ्र इतस्तटीतिन्यायेन व्यक्त एव परमार्थतः स्वाभिमतसिद्धिविरोध इति काव्यार्थः ॥ १७ ॥

अधुना क्षणिकवादिन ऐहिकामुष्मिकव्यवहारानुपपन्नार्थसमर्थनमविमृश्यकारिताकारितं दर्शयन्नाह ।

**कृतप्रणाशाकृतकर्मभोग-**
**भवप्रमोक्षस्मृतिभङ्गदोषान् ।**
**उपेक्ष्य साक्षात् क्षणभङ्गमिच्छ-**
**न्नहो महासाहसिकः परस्ते ॥१८॥**

कृतप्रणाशदोषमकृतकर्मभोगदोषं प्रमोक्षभङ्गदोषं स्मृतिभङ्गदोषमित्येतान् साक्षादित्यनुभवसिद्धान् उपेक्ष्यानादृत्य साक्षात्कुर्वन्नपि गजनिमीलिकामवलम्बमानः क्षणभङ्गम् उदयानन्तरविनाशरूपक्षणक्षयितामिच्छन् प्रतिपद्यमानस्ते तव परः प्रतिपक्षो वैनाशिकः सौगत इत्यर्थः अहो महासाहसिकः सह-

सा अविमर्शात्मिकेन बलेन वर्तते साहसिको भाविन-
मनर्थमविभाव्य यः प्रवर्तते स एवमुच्यते महांश्चासौ
साहसिकश्च महासाहसिकोऽत्यन्तमविमृश्य प्रवृत्ति-
कारीति मुकुलितार्थः विवृतार्थस्त्वयं बौद्धा बुद्धिक्ष-
णपरंपरामात्रमेवात्मानमामनन्ति न पुनर्मौक्तिकक-
णनिकरानुस्यूतैकसूत्रवत्तदन्वयिनमेकं तन्मते येन
ज्ञानक्षणेन सदनुष्ठानमसदनुष्ठानं वा कृतं तस्य नि-
रन्वयविनाशान्न तत्फलोपभोगो यस्य च फलोप-
भोगस्तेन तत्कर्म न कृतमिति प्राच्यज्ञानक्षणस्य कृ-
तप्रणाशः स्वकृतकर्मफलानुपभोगात् उत्तरज्ञानक्ष-
णस्य चाकृतकर्मभोगः स्वयमकृतस्य कर्मणः फलोप-
भोगादिति अत्र कर्मशब्दः उभयत्रापि योज्यः तेन कृ-
तकर्मप्रणाश इत्यर्थो दृश्यः बन्धानुलोम्याच्चेत्थमुप-
न्यासः तथा भवभङ्गदोषो भव आर्जवीभावलक्षणः सं-
सारस्तस्य भङ्गो विलोपः स एव दोषः क्षणिकवादे
प्रसज्यते परलोकाभावप्रसङ्ग इत्यर्थः परलोकिनः क-
स्यचिदभावात् परलोको हि पूर्वजन्मकृतकर्मानुसा-
रेण भवति तच्च प्राचीनज्ञानक्षणानां निरन्वयं नाशा-
त्केन नामोपभुज्यतां जन्मान्तरे यच्च मोक्षाकरगुप्तेन
यच्चित्तं तच्चित्तान्तरं प्रतिसंधत्ते यथेदानीन्तनं चित्तं
चित्तं च मरणकालभावीति भवपरंपरासिद्धये प्रमा-
णमुक्तं तद्व्यर्थं चित्तक्षणानां निरवशेषनाशिनां चि-
त्तान्तरप्रतिसंधानायोगात् द्वयोरवस्थितयोर्हि प्रतिसं-
धानमुभयानुगामिना केन चित्क्रियते यस्मानयोः प्र-

तिसंधाता स तेन नाभ्युपगम्यते स ह्यात्माऽन्वयी न च प्रतिसंधत्ते इत्यस्य जनयतीत्यर्थः कार्यहेतुप्रसङ्गात् तेन वादिना ऽस्य हेतोः स्वभावहेतुत्वेनोक्तत्त्वात् स्वभावहेतुश्च तादात्म्ये सति भवति भिन्नकालभाविनोश्च चित्तचित्तान्तरयोः कुतस्तादात्म्यं युगपद्भाविनोश्च प्रतिसन्धेयप्रतिसन्धायकत्वाभावापत्तिर्युगपद्भावित्वेऽविशिष्टेऽपि किमत्र नियामकं यदेकः प्रतिसन्धायकोऽपरश्चप्रतिसन्धेय इति अस्तु वा प्रतिसन्धानस्य जननमर्थः सोऽप्यनुपपन्नस्तुल्यकालत्वे हेतुफलभावस्याभावात् भिन्नकालत्वे च पूर्वचित्तक्षणस्य विनष्टत्त्वात् उत्तरचित्तक्षणः कथमुपादानमन्तरेणोत्पद्यतामिति यत्किञ्चिदेतत् तथा प्रमोक्षभङ्गदोषः प्रकर्षेणापुनर्भावेन कर्मबन्धनान्मुक्तिः प्रमोक्षस्तस्यापि भङ्गः प्राप्नोति तन्मते तावदात्मैव नास्ति कः प्रेत्य सुखीभवनार्थं यतिष्यते ज्ञानक्षणोऽपि संसारी कथमपरज्ञानक्षणसुखीभवनाय घटिष्यते न हि दुःखी देवदत्तो यज्ञदत्तसुखाय चेष्टमानो दृष्टः क्षणस्य तु दुःखं स्वरसनाशित्वात्तेनैव सार्द्धं दध्वंसे सन्तानस्तु न वास्तवः कश्चिद्वास्तवत्वे तु आत्माभ्युपगमप्रसङ्गः अपि च बौद्धा निखिलवासनोच्छेदे विगतविषयाकारोपप्लवविशुद्धज्ञानोत्पादो मोक्ष इत्याहुस्तच्च न घटते कारणाभावादेव तदनुपपत्तेः भावनाप्रचयो हि तस्य कारणमिष्यते स च स्थिरैकाश्रयाभावाद्विशेषानाधायकः प्रतिक्षणमपूर्ववदुपजायमानो निरन्वयविनाशी गगनलङ्घनाभ्यासवद्-

नासादितप्रकर्षो न स्फुटाभिज्ञानजननाय प्रभवतीत्यनुपपत्तिरेव तस्य समलचित्तक्षणानां स्वाभाविक्याः सदृशारम्भणशक्तेरसदृशारम्भं प्रत्यशक्तेश्चाकस्मादनुच्छेदात् किं च समलचित्तक्षणाः पूर्वं स्वरसपरिनिर्वाणाः अयमपूर्वो जातः सन्तानश्चैको न विद्यते बन्धमोक्षौ चैकाधिकरणौ न विषयभेदेन वर्तेते तत्कस्येयं मुक्तिर्य एतदर्थं प्रयतते अयं हि मोक्षशब्दो बन्धनविच्छेदपर्यायः मोक्षश्च तस्यैव घटते यो बद्धः क्षणक्षयवादे त्वन्यः क्षणो बद्धः क्षणान्तरस्य मुक्तिरिति मोक्षाभावः प्राप्नोति तथा स्मृतिभङ्गदोषः तथा हि पूर्वबुद्ध्या ऽनुभूतेऽर्थे नोत्तरबुद्धीनां स्मृतिः सम्भवति ततोऽन्यत्वात्सन्तानान्तरबुद्धिवत् न ह्यन्यदृष्टोऽर्थोऽन्येन स्मर्यते अन्यथा एकेन दृष्टोऽर्थः सर्वैः स्मर्येत स्मरणाभावे च कौतस्कुती प्रत्यभिज्ञाप्रसूतिः तस्याः स्मरणानुभवोभयसंभवत्वात् पदार्थप्रेक्षणा बुद्धप्राक्तनसंस्कारस्य हि प्रमातुः स एवायमित्याकारेणेयमुत्पद्यते अथ स्यादयं दोषो यद्यविशेषेणान्यदृष्टमन्यः स्मरतीत्युच्यते किं त्वन्यत्वेऽपि कार्यकारणभावादेव च स्मृतिर्भिन्नसंतानबुद्धीनां तु कार्यकारणभावो नास्ति तेन संतानान्तराणां स्मृतिर्न भवति न चैकसांतानिकीनामपि बुद्धीनां कार्यकारणभावो नास्ति येन पूर्वबुद्ध्यनुभूतेऽर्थे तदुत्तरबुद्धीनां स्मृतिर्न स्यात् तदप्यनवदातम् एवमपि अन्यत्वस्य तदवस्थत्वात् न हि कार्यकारणभावाभिधानेऽपि तदपगतं क्षणिकत्वेन सर्वासां भिन्नत्वात् न

हि कार्यकारणभावात् स्मृतिरित्यत्रोभयप्रसिद्धोऽस्ति दृष्टान्तः।

अथ।

यस्मिन्नेव हि सन्ताने आहिता कर्मवासना।
फलं तत्रैवसंधत्ते कर्पासे रक्तता यथा॥

इति कर्पासरक्ततादृष्टान्तोऽस्तीति चेत्तदसाधीयः साधनदूषणयोरसंभवात् तथा हि अन्वयाद्यसंभवान्न साधनं न हि कार्यकारणभावो यत्र तत्र स्मृतिःकर्पासे रक्ततावदित्यन्वयः संभवति नापि यत्र तत्स्मृतिरत्र न कार्यकारणभाव इति व्यतिरेकोऽस्ति असिद्धत्वाद्यनुद्भावनाच्च न दूषणं न हि ततोऽन्यत्वादित्यस्य हेतोः कर्पासे रक्ततावदित्यनेन कश्चिद्दोषः प्रतिपाद्यते किं च यद्यन्यत्वेऽपि कार्यकारणभावेन स्मृतेरुत्पत्तिरिष्यते तदा शिष्याचार्यादिबुद्धीनामपि कार्यकारणभावसद्भावेन स्मृत्यादिः स्यात् अथ नायं प्रसङ्गएकसंतानत्वे सतीतिविशेषणादिति चेत्तदप्ययुक्तं भेदाभेदपक्षाभ्यां तस्योपक्षीणत्वात् क्षणपरंपरातस्त्स्याभेदे हि क्षणपरंपरैव सा तथा च संतान इति न किंचिदतिरिक्तमुक्तं स्यात् भेदे त्वपारमार्थिकः पारमार्थिको वा ऽसौ स्यात् अपारमार्थिकत्वेऽस्य तदेवदूषणमकिंचित्करत्वात् पारमार्थिकत्वे स्थिरो वा स्यात् क्षणिको वा क्षणिकत्वे संताननिर्विशेष एवायमिति किमनेन स्तेनभीतस्य स्तेनान्तरशरणस्वीकरणानुकर-

णिना स्थिरस्येदात्मैव संज्ञाभेद तिरोहितः प्रतिपन्न इ-ति न स्मृतिर्घटते क्षणक्षयवादिनां तदभावे चानुमानस्यानुत्थानमित्युक्तं प्रागेव अपि च स्मृतेरभावे निहितप्रत्युन्मार्गेण प्रत्यर्पणादिव्यवहारा विशीर्येरन् ।

इत्येकनवते: कल्पे शक्त्या मे पुरुषो हतः ।
तेन कर्मविपाकेन पादे विद्धोऽस्मि भिक्षवः ॥

इति वचनस्य च का गतिः एवमुत्पत्तिरुत्पादयति स्थितिः स्थापयति जरा जर्जरयति विनाशो नाशयति इति चतुःक्षणिकं वस्तु प्रतिजानाना अपि प्रतिक्षेप्याः क्षणचतुष्कानन्तरमपि निहितप्रत्युन्मार्गणादिव्यवहाराणां दर्शनात् तदेवमनेकदोषापातेऽपि यः क्षणभङ्गमभिप्रैति तस्य महत् साहसमिति काव्यार्थः ॥ १८ ॥

अथ तथागताः क्षणक्षयपक्षे सर्वव्यवहारानुपपत्तिं परैः सद्भाविताभाकर्ण्येत्थं प्रतिपादयिष्यन्ति यत्सर्वपदार्थानां क्षणिकत्वेऽपि वासनाबललब्धजन्मना ऐक्याध्यवसायेन ऐहिकामुष्मिकव्यवहारप्रवृत्तेः कृतप्रणाशादिदोषा निरवकाशा एवेति तदाकूतं परिहर्तुकामस्तत्कल्पितवासनायाः क्षणपरंपरातो भेदाभेदानुभयलक्षणे पक्षत्रयेऽपि अघटमानत्वं दर्शयन् स्वाभिप्रेतभेदाभेदस्याद्वादमकामानपि तानङ्गीकारयितुमाह ।

**सा वासना सा क्षणसन्ततिश्च**

**नाभेदभेदानुभयैर्घटेते।**
**ततस्तटादर्शिशकुन्तपोत-**
**न्यायात्त्वदुक्तानि परे श्रयन्तु ॥१६॥**

सा शाक्यपरिकल्पिता त्रुटितमुक्तावलीकल्पानां परस्परविशकलितानां क्षणानामन्योन्यानुस्यूतप्रत्ययजनिका एकतन्तुस्थानीया सन्तानापरपर्याया वासना वासनेति पूर्वज्ञानजनितामुत्तरज्ञाने शक्तिमाहुः सा च क्षणसन्ततिस्तद्दर्शनप्रसिद्धा प्रदीपकलिकावन्नवनवोत्पद्यमाना ऽपरापरसदृशक्षणपरंपरा एते द्वे अपि अभेदभेदानुभयैर्न घटेते न तावदभेदेन तादात्म्येन ते घटेते तयोर्हि अभेदे वासना वा स्यात् क्षणपरंपरा वा न द्वयं यद्धि यस्मादभिन्नं न ततः पृथगुपलभ्यते यथा घटात् घटस्वरूपं केवलायां वासनायामन्वयिस्वीकारः वास्याभावे च किं तया वासनीयमस्तु इति तस्या अपि न स्वरूपमवतिष्ठते क्षणपरंपरामात्राङ्गीकरणे च प्राग्व एव दोषाः न च भेदेन ते युज्येते सा हि भिन्ना वासना क्षणिका स्यादक्षणिका वा क्षणिका चेत्तर्हि क्षणेभ्यस्तस्याः पृथक्कल्पनं व्यर्थम् अक्षणिका चेदन्वयिपदार्थाभ्युपगमेनागमबाधस्तथा च पदार्थान्तराणां क्षणिकत्वकल्पनाप्रयासो व्यसनमात्रम् अनुभयपक्षेणापि न घटेते स हि कदाचिदेवं ब्रूयात् नाहं वासनायाः क्षणश्रेणितो ऽभेदं

प्रतिपद्येन च भेदं किं त्वनुभयमिति तदप्यनुचितं भेदाभेदयोर्विधिनिषेधरूपयोरेकतरप्रतिषेधेऽन्यतरस्यावश्यं विधिभावादन्यतरपक्षाभ्युपगमस्तत्र च प्रागुक्त एव दोषः अथ वा ऽनुभयरूपत्वे ऽवस्तुत्वप्रसङ्गो भेदाभेदलक्षणपक्षद्वयव्यतिरिक्तस्य मार्गान्तरस्यानस्तित्वादनार्हतानां हि वस्तुना भिन्नेन वा भाव्यमभिन्नेन वा तदुभयातीतस्य बन्ध्यास्तनन्धयप्रायत्वात् एवं विकल्पत्रयेऽपि क्षणपरंपरावासनयोरनुपपत्तौ पारिशेष्याद्भेदाभेदपक्ष एव कक्षीकरणीयः न च "प्रत्येकं यो भवेद्दोषो द्वयोर्भावे कथं न स" इति वचनादत्रापि दोषतादवस्थ्यमिति वाच्यं कुक्कुटसर्पनरसिंहादिवज्जात्यन्तरत्वादनेकान्तपक्षस्य नन्वार्हतानां वासनाक्षणपरंपरयोरङ्गीकार एव नास्ति तत्कथं तदाश्रयभेदाभेदचिन्ता चरितार्था इति चेन्नैवं स्याद्वादवादिनामपि हि प्रतिक्षणं नवनवपर्यायपरंपरोत्पत्तिरभिमतैव तथा च क्षणिकत्वम् अतीतानागतवर्तमानपर्यायपरंपरानुसन्धायकं चान्वयि द्रव्यं तच्च वासनेतिसंज्ञान्तरभागपि अभिमतमेव न खलु नामभेदाद्भेदः कोऽपि कोविदानां सा च प्रतिक्षणोद्भविष्णुपर्यायपरंपरान्वयिद्रव्यात्कथं चिद्भिन्ना कथं चिदभिन्ना तथा तदपि तस्याः स्याद्भिन्नं स्यादभिन्नमिति पृथक्प्रत्ययव्यपदेशविषयत्वाद्भेदो द्रव्यस्यैव च तथा तथा परिणमनादभेदः एतच्च सकलादेशव्याख्याने पुरस्तात्प्रपञ्चयिष्यामः अपि च

बौद्धमते वासनापि तावन्नघटते इति निर्विषया तत्र भेदादिविकल्पचिन्ता तल्लक्षणां हि पूर्वक्षणेनोत्तरक्षणस्य वासना न चास्थिराणां भिन्नकालतयाऽन्योन्यासंबद्धानां च तेषां वास्यवासकभावो युज्यते स्थिरस्य संबद्धस्य च वस्त्रादेर्मृगमदादिना वास्यत्वं दृष्टमिति अथ पूर्वचित्तसहजाच्चेतनाविशेषात्पूर्वशक्तिविशिष्टं चित्तमुत्पद्यते सोऽस्य शक्तिविशिष्टचित्तोत्पादे वासना तथा हि पूर्वचित्तं रूपादिविषयं प्रवृत्तिविज्ञानं यत्तत्षड्विधं पञ्च रूपादिविज्ञानान्यविकल्पकानि षष्ठं च विकल्पविज्ञानं तेन सह जातः समानकालश्चेतनाविशेषो ऽहंकारास्पदमालयविज्ञानं तस्मात्पूर्वशक्तिविशिष्टचित्तोत्पादो वासनेति तदपि न अस्थिरत्वाद्वासकेनासम्बन्धाच्च यश्चासौ चेतनाविशेषः पूर्वचित्तसहभावी स न वर्तमाने चेतस्युपकारं करोति वर्तमानस्याशक्याधापनेयोपनेयत्वेनाकिंकार्यत्वात् तद्धि यथा भूतं जायते तथा भूतं विनश्यति इति नाप्यनागते उपकारं करोति तेनसहासंबद्धत्वात् असंबद्धं च न भावयती युक्तं तस्मात् सौगतमते वासनापि न घटते तत्र च स्तुतिकारेणाभ्युपेत्यापि तामन्वयिद्रव्यस्थापनाय भेदादिचर्चाविरचितेति भावनीयम् अथोत्तरार्धव्याख्या तत इति पक्षत्रयेऽपि दोषसद्भावात्त्वदुक्तानि भवद्वचनानि भेदाभेदस्याद्वादसंवादपूतानि परे कुतीर्थ्याः प्रकरणान्नायातनयाः श्रयन्तु आद्रियन्ताम् अत्रोपमानमाह

तटादर्शीत्यादि तटं न पश्यतीति तटादर्शी यः शकुन्तपोतः पक्षिशावकस्तस्य न्याय उदाहरणं तस्माद्यथा किल कथमप्यपारपारावारान्तःपतितः काकादिशकुनिशावको बहिर्निर्जिगमिषया प्रवहणकूपस्तम्भादेस्तटप्राप्तये मुग्धतयोड्डीनः समंताज्जलैकार्णवमेवावलोकयंस्तटमदृष्ट्वैव निर्वेदाद्व्यावृत्त्य तदेव कूपस्तम्भादिस्थानमाश्रयते गत्यन्तराभावात् एवं तेऽपि कुतीर्थ्याः प्रागुक्तपक्षत्रये ऽपि वस्तुसिद्धिमनासादयन्तस्त्वदुक्तमेव चतुर्थं भेदाभेदपक्षमनिच्छयापि कक्षीकुर्वाणाः त्वच्छासनमेव प्रतिपद्यन्तां नहि स्वस्यबलविकलतामाकलय्य बलीयसः प्रभोः शरणाश्रयणं दोषपोषाय नीतिशालिनां त्वदुक्तानीति बहुवचनं सर्वेषामपि तन्त्रान्तरीयाणां पदे पदेऽनेकान्तवादप्रतिपत्तिरेव यथाऽवस्थितपदार्थप्रतिपादनौपयिका नान्यदिति ज्ञापनार्थम् अनन्तधर्मात्मकस्य वस्तुनः सर्वनयात्मकेन स्याद्वादेन विना यथावद् ग्रहीतुमशक्यत्वात् इतरथाऽन्धगजन्यायेन पल्लवग्राहिताप्रसङ्गात् अयन्तीति वर्तमानान्तं केचित्पठन्ति तत्राप्ययदोषः अत्र च समुद्रस्थानीयः संसारः पोतसमानं त्वच्छासनं कूपस्तम्भसन्निभः स्याद्वादः पक्षिपोतोपमा वादिनस्ते च स्वाभिमतपक्षस्वरूपेणोड्डयनेन मुक्तिलक्षणतटप्राप्तये कृतप्रयत्ना अपि तस्मादिष्टार्थसिद्धिमपश्यन्तो व्यावृत्य स्याद्वादरूपकूपस्तम्भालंकृततावकीनशासनप्रवहणोपसर्पणमेव यदि शरणीकुर्वते तदा तेषां भवार्ण-

वाद्वहिर्निष्क्रमणमनोरथः सफलतां कलयति नापर-थेति काव्यार्थः अथ वा शकुन्तपोतयोन्यायः स इत्यपि व्याख्यानं स्वधिया भावनीयम् अत्र पोतशब्देन प्रवहणमुच्यते ॥ १९ ॥

एवं क्रियावादिनां प्रावादुकानां कतिपयकुग्राहनिग्रहं विधाय सांप्रतमक्रियावादिलौकायतिकानां मतं सर्वाधमत्वादन्त उपन्यसन् तन्मतमूलस्य प्रत्यक्षप्रमाणस्यानुमानादिप्रमाणान्तरानङ्गीकारेऽकिञ्चित्करत्वप्रदर्शनेन तेषां प्रज्ञायाः प्रमादमादर्शयति ।

**विनानुमानेन पराभिसन्धि-**
**मसंविदानस्य तु नास्तिकस्य ।**
**न सांप्रतं वक्तुमपि क्व चेष्टा**
**क्व दृष्टमात्रं च हहा प्रमादः ॥२०॥**

प्रत्यक्षमेवैकं प्रमाणमिति मन्यते चार्वाकस्तत्र संनह्यते अनु पश्चाल्लिङ्गलिङ्गिसम्बन्धग्रहणस्मरणानन्तरं मीयते परिच्छिद्यते देशकालस्वभावविप्रकृष्टोऽर्थोऽनेन ज्ञानविशेषेणेत्यनुमानं प्रस्तावात्स्वार्थानुमानं तेनानुमानेन लैङ्गिकप्रमाणेन विना पराभिसन्धिं पराभिप्रायम् असंविदानस्य सम्यगजानानस्य तुशब्दः पूर्वत्रादिभ्यो भेदद्योतनार्थः पूर्वेषां वादिनामास्तिकतया विप्रतिपत्तिस्थानेषु चोदः कृतो नास्तिकस्य तु वक्तुमपि नौचिती कुत एव तेन सह चोद इति तु-

शब्दार्थः नास्ति परलोकः पुण्यं पापमिति वा मति-
रस्य "नास्तिकास्तिकदैष्टिकमि" ति निपातनान्नास्तिक-
स्तस्य नास्तिकस्य लौकायितकस्य वक्तुमपि न सांप्रतं
वचनमप्युच्चारयितुं नोचितं ततस्तूष्णींभाव एवास्य
श्रेयान् दूरे प्रामाणिकपरिषदि प्रविश्य प्रमाणोपन्या-
सगोष्ठी वचनं हि परप्रत्यायनाय प्रतिपाद्यते परेण
चाप्रतिपिपित्सितमर्थं प्रतिपादयन्नासौ सतामवधेयव-
चनो भवति उन्मत्तवत् ननु कथमिव तूष्णीकतैवास्य
श्रेयसी यावता चेष्टाविशेषादिना प्रतिपाद्यस्याभि
प्रायमनुमाय सुकरमेवानेन वचनोच्चारणमित्याश-
ङ्क्याह क्व चेष्टा क्व दृष्टमात्रं चेति क्वेति बृहदन्तरे चेष्टा-
इङ्गितं पराभिप्रायरूपस्यानुमेयस्य लिङ्गं क्व च दृष्ट-
मात्रं दर्शनं दृष्टं भावे क्तः दृष्टमेव दृष्टमात्रं प्रत्यक्ष-
मात्रं तस्य लिङ्गनिरपेक्षप्रवृत्तित्वादत एव दूरमन्तर-
मेतयोः न हि प्रत्यक्षेणातीन्द्रियाः परचेतोवृत्तयः परि-
ज्ञातुं शक्यास्तस्यैन्द्रियकत्वात् मुखप्रसादादिचेष्टया तु
लिङ्गभूतया पराभिप्रायस्य निश्चयेऽनुमानप्रमाणमनि-
च्छतोऽपि तस्य बलादापतितं तथा हि मद्वचनश्रव-
णाभिप्रायवानयं पुरुषस्तादृगमुखप्रसादादिचेष्टाऽन्य-
थाऽनुपपत्तेरिति अतश्च हहा प्रमादः हहा इति खेदे
अहो तस्य प्रमादः प्रमत्तता यदनुभूयमानमप्यनुमानं
प्रत्यक्षमात्राङ्गीकारेणापन्हुते अत्र च संपूर्वस्य वेत्ते-
रकर्मकत्व एवात्मनेपदम् अत्र तु कर्मास्ति तत्कथम-
त्रानश् अत्रोच्यते ऽत्र संवेदितुं शक्तः संविदान इ-

ति कार्यं "वयःशक्तिशील" इति शक्तौ शानवि-
धानात् ततश्चायमर्थोऽनुमानेन विना पराभिसंहितं
सम्यग्वेदितुमशक्तश्चेति एवं परबुद्धिज्ञानान्यथाऽनुपप-
त्याऽयमनुमानं हठादङ्गीकारितस्तथा प्रकारान्तरे-
णाप्ययमङ्गीकारयितव्यस्तथा हि चार्वाकः काश्चि-
त् ज्ञानव्यक्तीः संवादित्वेनाव्यभिचारिणीरुपलभ्या-
न्याश्च विसंवादित्वेन व्यभिचारिणीः पुनः का-
लान्तरे तादृशीतराणां ज्ञानव्यक्तीनामवश्यप्रमा-
णेतरते व्यवस्थापयेत् न च सन्निहितार्थबलेनो-
त्पद्यमानं पूर्वापरपरामर्शशून्यं प्रत्यक्षं पूर्वापरका-
लभाविनीनां ज्ञानव्यक्तीनां प्रामाण्याप्रामाण्यव्य-
वस्थापकं निमित्तमुपलक्षयितुं क्षमते न चायं स्वप्र-
तीतिगोचराणामपि ज्ञानव्यक्तीनां परं प्रति प्रामाण्य-
मप्रामाण्यं वा व्यवस्थापयितुं प्रभवति तस्माद्यथा-
दृष्टज्ञानव्यक्तिसाधर्म्यद्वारेणेदानीन्तनज्ञानव्यक्तीनां
प्रामाण्याप्रामाण्यव्यवस्थापकं परप्रतिपादकं च प्र-
माणान्तरमनुमानरूपमुपासीत परलोकादिनिषेध-
श्च न प्रत्यक्षमात्रेण शक्यः कर्तुं संनिहितमात्रविषय-
त्वात् तस्य परलोकादिकं चाप्रतिषिध्य नायं सुख-
मास्ते प्रमाणान्तरं च नेच्छतीति डिम्भहेवाकः किं
च प्रत्यक्षस्याप्यर्थाव्यभिचारादेव प्रामाण्यं कथमित-
रथा स्नानपानावगाहनाद्यर्थक्रियाऽसमर्थे मरुमरीचि-
कानिचयचुम्बिनि जलज्ञाने न प्रामाण्यं तच्चार्थप्रति-
बद्धलिङ्गशब्दद्वारा समुन्मज्जतोरनुमानागमयोरप्यर्था

व्यभिचारादेव किं नेष्यते व्यभिचारिणोरप्यनयोर्दर्शनादप्रामाण्यमिति चेत् प्रत्यक्षस्यापि तिमिरादिदोषान्निशीथिनीनाथयुगलावलम्बिनोऽप्रमाणस्य दर्शनात् सर्वत्राप्रामाण्यप्रसङ्गः प्रत्यक्षाभासं तदिति चेदितरत्रापि तुल्यमेतदन्यत्र पक्षपातात् एवं च प्रत्यक्षमात्रेण वस्तुव्यवस्थाऽनुपपत्तेस्तन्मूला जीवपुण्यापुण्यपरलोकनिषेधादिवादा अप्रमाणमेव एवं नास्तिकाभिमतो भूतचिद्वादोऽपि निराकार्यः तथा च द्रव्यालंकारकारः उपयोगवर्णने न चायं भूतधर्म्मः सत्त्वकठिनत्वादिवन्मद्याङ्गेषु भ्रम्यादिमदशक्तिवद्वा प्रत्येकमनुपलम्भात् अनभिव्यक्ताचात्मसिद्धिः कायाकारपरिणतेभ्यस्तेभ्यः स उत्पद्यत इति चेत्कायपरिणामोऽपि तन्मात्रभावी न कादाचित्कः अन्यस्यात्मैव स्यात् अहेतुत्वेन देशादिनियमः मृतादपि च स्यात् शोणितादयुपाधिः सुप्तादावप्यस्ति न च सतस्तस्योत्पत्तिः भूयो भूयः प्रसङ्गात् अलब्धात्मनश्च प्रसिद्धमर्थक्रियाकारित्वं विरुध्यते असतः सकलशक्तिविकलस्य कथमुत्पत्तौ कर्तृत्वमन्यस्यापि प्रसङ्गात् तन्न भूतकार्यमुपयोगः कुतस्तर्हि सुप्तोत्थितस्य तदुदयोऽसंवेदनेन चैतन्यस्याभावात् न जाग्रदवस्थाऽनुभूतस्य स्मरणात् असंवेदनं तु निद्रोपघातात् कथं तर्हि कायविकृतौ चैतन्यविकृति नैकान्ता श्वित्रादिना कश्मलवपुषोऽपि बुद्धिशुद्धेः अविकारे च भावनाविशेषतः प्रीत्यादिभेददर्शनात् शोकादिना बुद्धिविकृतौ कायविकारादर्शनाच्च परिणामिना

विना च न कार्योत्पत्तिः न च भूतान्येव तथा परिण-मन्ते विजातीयत्त्वात् काठिन्यादेरनुपलम्भात् अण-व एव चेन्द्रियग्राह्यत्वरूपां स्थूलतां प्रतिपद्यन्ते त-ज्ज्ञात्यादि चोपलभ्यते तन्न भूतानां धर्म्मः फलं वा उपयोगः तथा भवांश्च यदाक्षिपति तदस्य लक्षणं स चात्मा स्वसंविदितः भूतानां तथाभावे बहिर्मुखं स्याद्-गौरोऽहम् इत्यादि तु नान्तर्मुखं बाह्यकरणजन्यत्त्वात् अनभ्युपगतानुमानप्रमाणस्य चात्मनि निषेधोऽपि दु-र्लभः।

धर्मः फलं च भूतानामुपयोगो भवेद्यदि।
प्रत्येकमुपलम्भः स्यादुत्पादो वा विलक्षणात्॥

इति काव्यार्थः॥ २०॥

एवमुक्तयुक्तिभिरेकान्तवादप्रतिक्षेपमाख्याय सां-प्रतमनाद्यविद्यावासनाप्रवासितसन्मतयः प्रत्यक्षो-पलक्ष्यमाणमपि अनेकान्तवादं येऽवमन्यन्ते तेषामु-न्मत्ततामाविर्भावयन्नाह।

**प्रतिक्षणोत्पादविनाशयोगि-**
**स्थिरैकमध्यक्षमपीक्षमाणः।**
**जिन त्वदाज्ञामवमन्यते यः**
**स वातकी नाथ पिशाचकी वा॥२१॥**

प्रतिक्षणं प्रतिसमयम् उत्पादेनोत्तराकारस्वी-काररूपेण विनाशेन च पूर्वाकारपरिहारलक्षणेन यु-

ज्यत इत्येवंशीलं प्रतिक्षणोत्पादविनाशयोगि किं तत् स्थिरैकं कर्मतापन्नं स्थिरमुत्पादविनाशयोरनुयायित्वात् त्रिकालवर्ति यदेकं द्रव्यं स्थिरैकम् एकशब्दोऽत्र साधारणवाची उत्पादे विनाशे च तत्साधारणमन्वयिद्रव्यत्वात् यथा चैत्रमैत्रयोरेका जननी साधारणीत्यर्थः इत्थमेव हि तयोरेकाधिकरणतापर्यायाणां कथं चिदनेकत्वेऽपि तस्य कथंचिदेकत्वात् एवं त्रयात्मकं वस्तु अध्यक्षमपीक्षमाणः प्रत्यक्षमवलोकयन्नपि हे जिन रागादिजैत्रत्वात् त्वदाज्ञामा सामस्त्येनानन्तधर्मविशिष्टतया ज्ञायन्ते ऽवबुध्यन्ते जीवादयः पदार्था यया सा आज्ञा आगमः शासनं तवाज्ञा त्वदाज्ञा तां त्वदाज्ञां भवत्प्रणीतस्याद्वादमुद्रां यः कश्चिदविवेकी अवमन्यतेऽवजानाति जात्यपेक्षमेकवचनमवज्ञया वा स पुरुषपशुर्वातकी पिशाचकी वा वातो रोगविशेषोऽस्तीति वातकी वातकीव वातकी वातूल इत्यर्थः एवं पिशाचकीव पिशाचकी भूताविष्ट इत्यर्थः अत्र वाशब्दः समुच्चयार्थः उपमानार्थो वा स पुरुषापसदो वातकिपिशाचकिभ्यामधिरोहति तुलामित्यर्थः "वातातीसारपिशाचात्कश्चान्त" इत्यनेन मत्वर्थीयः कश्चान्तः एवं पिशाचकीत्यपि यथा किल वातेन पिशाचेन वाऽऽक्रान्तवपुर्वस्तुतत्त्वं साक्षात्कुर्वन्नपि तदावेशवशादन्यथा प्रतिपद्यते एवमयमपि एकान्तवादापस्मारपरवश इति अत्र च जिनेति साभिप्रायं रागादिजेतृत्वाद्धि जिनस्ततश्च यः किल विगलितदोषकालुष्यतया-

ऽत्रधेयवचनस्यापि तत्रभवतः शासनमवमन्यते तस्य कथं नोन्मत्ततेति भावः नाथ हे स्वामिन् अलब्धस्य सम्यग्दर्शनादे र्लम्भकतया लब्धस्य च तस्यैव निरतिचारपरिपालनोपदेशदायितया च योगक्षेमकरत्वोपपत्तेर्नाथस्तस्यामन्त्रणं वस्तुतत्त्वं च उत्पादव्ययध्रौव्यात्मकं तथा हि सर्वं वस्तु द्रव्यात्मना नोत्पद्यते विपद्यते वा परिस्फुटमन्वयदर्शनात् लूनपुनर्जातनखादिष्वन्वयदर्शनेन व्यभिचार इति न वाच्यम् प्रमाणेन बाध्यमानस्यान्वयस्यापरिस्फुटत्वात् न च प्रस्तुतोऽन्वयः प्रमाणविरुद्धः स सप्रत्यभिज्ञानसिद्धत्वात् सर्वव्यक्तिषु नियतं क्षणेऽक्षणे अन्यत्वमथ वचनविशेषः "सत्योश्चित्यपचित्योराकृतिजातिव्यवस्थानात्" इति वचनात्ततो द्रव्यात्मना स्थितिरेव सर्वस्य वस्तुनः पर्यायात्मना तु सर्वं वस्तूत्पद्यते विपद्यते च अस्खलितपर्यायानुभवसद्भावात् न चैवं शुक्ले शङ्खे पीतादिपर्यायानुभवेन व्यभिचारस्तस्य स्खलद्रूपत्वात् न खलु सोऽस्खलद्रूपो येन पूर्वाकारविनाशाऽजहद्वृत्तोत्तराकारोत्पादाविनाभावी भवेत् न च जीवादौ वस्तुनि हर्षामर्षौदासीन्यादिपर्यायपरंपरानुभवः स्खलद्रूपः कस्य चिद्बाधकस्याभावात् ननूत्पादादयः परस्परं भिद्यन्ते न वा यदि भिद्यन्ते कथमेकं वस्तु त्र्यात्मकं न भिद्यते चेत्तथापि कथमेकं त्र्यात्मकं तथा च ।

यद्युत्पादादयो भिन्नाः कथमेकं त्रयात्मकम् ।

अथोत्पादादयोऽभिन्नाः कथमेकं त्रयात्मकम् ॥

इति चेत्तदयुक्तं कथं चिद्भिन्नलक्षणत्वेन तेषां कथं चिद्भेदाभ्युपगमात् तथा ह्युत्पादविनाशध्रौव्याणि स्याद्भिन्नानि भिन्नलक्षणत्वाद्रूपादिवदिति न च भिन्नलक्षणत्वमसिद्धमसत आत्मलाभः सतः सत्तावियोगो द्रव्यरूपतयानुवर्त्तनं च खलूत्पादादीनां परस्परमसंकीर्णानि लक्षणानि सकललोकसाक्षिकाण्येव न चामी भिन्नलक्षणा अपि परस्परानपेक्षाः खपुष्पवदसत्त्वापत्तेः तथा ह्युत्पादः केवलो नास्ति स्थितिविगमरहितत्वात् कूर्मरोमवत् तथा विनाशः केवलो नास्ति स्थित्युत्पत्तिरहितत्वात् तद्वत् एवं स्थितिः केवला नास्ति विनाशोत्पादशून्यत्वात्तद्वदेवेत्यन्योन्यापेक्षाणामुत्पादादीनां वस्तुनि सत्त्वं प्रतिपत्तव्यं तथा चोक्तम् ।

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥
पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः ।
अगोरसव्रतो नोभे तस्माद्वस्तु त्रयात्मकम् ॥

इति काव्यार्थः ॥ २१ ॥

अथान्ययोगव्यवच्छेदस्य प्रस्तुत्वात् आस्तां तावत्साक्षाद्भवान् भवदीयप्रवचनावयवा अपि परतीर्थितिरस्कारबद्धकक्षा इत्याशयवान् स्तुतिकारः स्याद्वादव्यवस्थापनाय प्रयोगमुपन्यस्यन् स्तुतिमाह ।

**अनन्तधर्मात्मकमेव तत्त्व-**
**मतोऽन्यथा सत्त्वमसूपपादम्।**
**इति प्रमाणान्यपि ते कुवादि-**
**कुरङ्गसंत्रासनसिंहनादाः ॥ २१ ॥**

तत्त्वं परमार्थभूतं वस्तु जीवाजीवलक्षणम् अनन्तधर्मात्मकमेव अनन्तास्त्रिकालविषयत्वादपरिमिता ये धर्माः सहभाविनः क्रमभाविनश्च पर्यायास्त एवात्मा स्वरूपं यस्य तदनन्तधर्मात्मकम् एवकारः प्रकारान्तरव्यवच्छेदार्थः अत एवाह अतोऽन्यथेत्यादि अतोऽन्यथा उक्तप्रकारवैपरीत्येन सत्त्वं वस्तुत्वमसूपपादं सुखेनोपपाद्यते घटनाकोटिसंटङ्कमारोप्यते इति सूपपादं न तथा सूपपादं दुर्घटमित्यर्थः अनेन साधनं दर्शितं तथा हि तत्त्वमिति धर्मि अनन्तधर्मात्मकं साध्यो धर्मः सत्त्वान्यथानुपपत्तेरिति हेतुरन्यथानुपपत्त्येकलक्षणत्वाद्धेतोः अन्तर्व्याप्त्यैव साध्यस्य सिद्धत्वाद् दृष्टान्तादिभि र्न प्रयोजनं यदनन्तधर्मात्मकं न भवति तत्सदपि न भवति यथा वियदिन्दीवरमिति केवलव्यतिरेकी हेतुः साधर्म्यदृष्टान्तानां पक्षकुक्षिनिक्षिप्तत्वेनान्वयायोगात् अनन्तधर्मात्मकत्वं चात्मनि तावत्साकारानाकारोपयोगिता कर्तृत्वं भोक्तृत्वं प्रदेशाष्टकनिश्चलता अमूर्त्तत्वमसंख्यातप्रदेशात्मकता जीवत्वमित्यादयः सहभाविनो धर्माः हर्ष-

विषादशोकसुखदुःखदेवनरनारकतिर्यक्त्वादयस्तु क्रमभाविनो धर्माः सन्ति कायादिष्वप्यसंख्येयप्रदेशात्मकत्वं गत्याद्युपग्रहकारित्वं मत्यादिज्ञानविषयत्वं तत्तदवच्छेदकावच्छेद्यत्वमवस्थितत्वमरूपित्वमेकद्रव्यत्वं निष्क्रियत्वमित्यादयः घटे पुनरामत्वं पाकजरूपादिमत्वं पृथुबुध्नोदरत्वं कम्बुग्रीवत्वं जलादिधारणाहरणादिसामर्थ्यं मत्यादिज्ञेयत्वं नवत्वं पुराणत्वमित्यादयः एवं सर्वपदार्थेष्वपि नानानयमताभिज्ञेन शब्दानर्थांश्च पर्यायान् प्रतीत्य वाच्यम् अत्र चात्मशब्देनानन्तेष्वपि धर्मेष्वनुवर्तिरूपमन्वयि द्रव्यं ध्वनितं ततश्चोत्पादव्ययध्रौव्ययुक्तं सदिति व्यवस्थितम् एवं तावदर्थेषु शब्देष्वपि उदात्तानुदात्तस्वरितविवृतसंवृतघोषवदघोषाल्पप्राणमहाप्राणतादयस्तत्तदर्थप्रत्यायनशक्त्यादयश्चावसेयाः असिद्धविरुद्धानैकान्तिकत्वादिकण्टकोद्धारः स्वयमभ्यूह्यः इत्येवमुल्लेखशेषराणि ते तव प्रमाणान्यपि न्यायोपपन्नसाधनवाक्यान्यपि आस्तां तावत्साक्षात्कृतपर्यायनिकायो भवान् यावदेतान्यपि कुवादिकुरङ्गसन्त्रासनसिंहनादाः कुवादिनः कुत्सितवादिन एकांशग्राहकनयानुयायिनोऽन्यतीर्थिकास्त एव संसारवनगहनवसनव्यसनितया कुरङ्गा मृगास्तेषां सम्यक्त्रासने सिंहनादा इव सिंहनादा यथा सिंहस्य नादमात्रमप्याकर्ण्य कुरङ्गास्त्रासमासूत्रयन्ति तथा भवत्प्रणीतैवंप्रकारप्रमाणवचनान्यपि श्रुत्वा कुवादिनस्त्रासमश्नुवते प्रतिवचनप्र-

द्दानकातरतां बिभ्रतीति यावदेकैकं त्वद्रूपत्तं प्रमाणामन्ययोगव्यवच्छेदकमित्यर्थः अत्र प्रमाणानीति बहुवचनम् एवं जातीयानां प्रमाणानां भगवच्छासन आनन्त्यज्ञापनार्थम् एकैकस्य सूत्रस्य सर्वोदधिसलिलसर्वसरिद्वालुकानन्तगुणार्थत्वात् तेषां च सर्वेषामपि सर्वविन्मूलतया प्रमाणत्वादथ वा इतिवचनान्ताागणस्य संसूचका भवन्तीति न्यायादितिशब्देन प्रमाणबाहुल्यसूचनात्पूर्वोर्द्धे एकस्मिन्नपि प्रमाणे उपन्यस्ते उचितमेव बहुवचनमिति काव्यार्थः॥ २२॥

अनन्तरमनन्तधर्मात्मकत्वं वस्तुनि साध्यं मुकुलितमुक्तं तदेवसप्तभङ्गीप्ररूपणद्वारेण प्रपञ्चयन् भगवतो निरतिशयं वचनातिशयं स्तुवन्नाह।

**अपर्ययं वस्तु समस्यमान-**
**मद्रव्यमेतच्च विविच्यमानम्।**
**आदेशभेदोदितसप्तभङ्ग-**
**मदीदृशस्त्वं बुधरूपवेद्यम्॥२२॥**

समस्यमानं संक्षेपेणोच्यमानं वस्त्वपर्ययम विवक्षितपर्यायं वसन्ति गुणाः पर्याया अस्मिन्निति वस्तु धर्माधर्माकाशपुद्गलकालजीवलक्षणं द्रव्यषट्कम्। अयमभिप्रायः यदेकमेव वस्तु आत्मघटादिकं चेतनाचेतनं सतामपि पर्यायाणामविवक्षया द्रव्यरूपमेव व-

तुमिष्यते तदा संक्षेपेणाभ्यन्तरीकृतसकलपर्यायनिकायत्वलक्षणेनाभिधीयमानत्वात् अपर्ययमित्युपदिश्यते केवलद्रव्यरूपमेवेत्यर्थः यथाऽऽत्माऽयं घटोऽयमित्यादिपर्यायाणां द्रव्यानतिरेकात् अत एव द्रव्यास्तिकनयाः शुद्धसंग्रहादयो द्रव्यमात्रमेवेच्छन्ति पर्यायाणां तदविष्वग्भूतत्वात् पर्यवः पर्ययः पर्याय इत्यनर्थान्तरम् अद्रव्यमित्यादि चः पुनरर्थे स च पूर्वस्माद्विशेषद्योतने भिन्नक्रमश्च विविच्यमानं चेति विवेकेन पृथग्रूपतयोच्यमानं पुनरेतद्वस्तु अद्रव्यमेव अविवक्षितान्वयिद्रव्यं केवलपर्यायरूपमित्यर्थः यदाह्यात्मा ज्ञानदर्शनादीन् पर्यायानधिकृत्य प्रतिपर्यायं विचार्यते तदा पर्याया एव प्रतिभासन्ते न पुनरात्माख्यं किमपि द्रव्यम् एवं घटोऽपि कुण्डलोष्ठपृथुबुध्नोदरपूर्वापरादिभागाद्यवयवापेक्षया विविच्यमानः पर्याय एव न पुनर्घटाख्यं तदतिरिक्तं वस्तु अत एव पर्यायास्तिकनयानुपातिनः पठन्ति ।

भागा एव हि भासन्ते संनिविष्टास्तथा तथा ।
तद्वान्नैव पुनः कश्चिन्निर्भागः संप्रतीयते ॥

इति ततश्च द्रव्यपर्यायोभयात्मकत्वेऽपि वस्तुनो द्रव्यनयार्पणया पर्यायनयानर्पणया च द्रव्यरूपता पर्यायनयार्पणया द्रव्यनयानर्पणया च पर्यायरूपता उभयनयार्पणया च तदुभयरूपता अत एवाह वाचकमुख्यः "अर्पितानर्पितसिद्धेरि" ति एवंविधं द्रव्यपर्यायात्मकं वस्तु त्वमेवादीदृशस्त्वमेव दर्शितवान्

नान्य इति काक्वावधारणावगतिः ननु अन्याभिधानप्रत्ययविषयाश्च पर्यायास्तत्कथमेकमेव वस्तूभयात्मकमित्याशङ्कां विशेषणद्वारेण परिहरति आदेशभेदेत्यादि आदेशभेदेन सकलादेशविकलादेशलक्षणेन आदेशद्वयेन उदिताः प्रतिपादिताः सप्तसंख्याः भङ्गा वचनप्रकारा यस्मिन् वस्तुनि तत्तथा ननु यदि भगवता त्रिभुवनबन्धुना निर्विशेषतया सर्वेभ्य एवंविधं वस्तुतत्वमुपदर्शितं तर्हि किमर्थं तीर्थान्तरीयास्तत्र विप्रतिपद्यन्ते इत्याह बुधरूपवेद्यमिति बुध्यन्ते यथावस्थितं वस्तुतत्वं सारेतरविषयविभागविचारणया इति बुधा उत्कृष्टा बुधा बुधरूपा नैसर्गिकाधिगमिकान्यतरसम्यग्दर्शनविशदीकृतज्ञानशालिनः प्राणिनस्तैरेव विदितुं शक्यं वेद्यं परिवेद्यं न पुनः स्वस्वशास्त्रतत्त्वाभ्यासपरिपाकशाणानिशातबुद्धिभिरप्यन्यैस्तेषामनादिमिथ्यादर्शनवासनादूषितमतितया यथावस्थितवस्तुतत्वानवबोधेन बुधरूपत्वाभावात् तथा चागमः।

सदसदविसेसणाउ भवहेउजहच्छिउवलंभाउ।
णाणफलाभावाउ मिच्छद्दिट्ठिस्स अन्नाणं ॥१॥

अत एव तत्परिगृहीतं द्वादशाङ्गमपि मिथ्याश्रुतमामनन्ति तेषामुपपत्तिनिरपेक्षं यदृच्छया वस्तुतत्त्वोपलम्भनं संरम्भात् सम्यग्दृष्टिपरिगृहीतं तु मिथ्याश्रुतमपि सम्यक्श्रुततया परिणमते सम्यग्दृशां सर्ववि-

दुपदेशानुसारिप्रवृत्तितया मिथ्याश्रुतोक्तस्याप्यर्थस्य यथावस्थितविधिनिषेधविषयतयोन्नयनात् तथा हि किल वेदे अजैर्यष्टव्यम् इत्यादिवाक्येषु मिथ्यादृशो ऽजशब्दं पशुवाचकतया व्याचक्षते सम्यग्दृशस्तु जन्मापाययोग्यं त्रिवार्षिकं यवव्रीह्यादि पञ्चवार्षिकं तिलमसूरादि सप्तवार्षिकं कङ्गुसर्षपादि धान्यपर्यायतया पर्यवसाययन्ति अत एव च भगवता श्रीवर्द्धमानस्वामिना विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्यसंज्ञास्तीत्यादिका ऋचः श्रीमदिन्द्रभूत्यादीनां द्रव्यगणधरदेवानां जीवादिनिषेधकतया प्रतिभासमाना अपि तद्व्यवस्थापकतया व्याख्यातास्तथा स्मार्ता अपि ।

न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥

इति श्लोकं पठन्ति अस्य च यथाश्रुतार्थव्याख्याने ऽसंबद्धप्रलाप एव यस्मिन् हि अनुष्ठीयमाने दोषो नास्त्येव तस्मान्निवृत्तिः कथमिव महाफला भविष्यति इज्याध्ययनदानादेरपि निवृत्तिप्रसङ्गात् तस्मादन्यदैदंपर्यमस्य श्लोकस्य तथा हि न मांसभक्षणे कृते ऽदोषो ऽपि तु दोष एवं मद्यमैथुनयोरपि कथं नादोष इत्याह यतः प्रवृत्तिरेषा भूतानां प्रवर्त्तन्ते उत्पद्यन्ते ऽस्यामिति प्रवृत्तिरुत्पत्तिस्थानं भूतानां जीवानां तत्तज्जीवसंसक्तिहेतुरित्यर्थः प्रसिद्धं च मांसमद्यमैथु-

नानां जीवसंसक्तिमूलकारणत्वमागमे

आमासु पपक्कासु पविपञ्चमाणासु मंसपेसीसु ।
आयंतिय मुववाउ भणिउ उनिगोयजीवाणं ॥१॥
मज्जे महुंमि मंसंमि नवणीयंमि वउंच्छए ।
उप्पज्जंति अणंता तव्वणातत्थजंतुणो ॥२॥
मेहुणसन्नारूढो नवलारक्खहणेइसुहुमजीवाणं ।
केवलिणापन्नतासद्दहियव्वासयाकालं ॥३॥

तथा हि

इच्छीजोणीएसं भवंति वेइंदियाउजेजीवा ॥
इक्कोवदोवतिन्निवलरक्खपुहुतंचउक्कोसं ॥ ४ ॥
पुरिसेण सह गयाए तेसिं जीवाणहोइउद्दवणं ।
वेणुगदिट्ठंतेणं तत्तायसिलागनाराणं ॥ ५ ॥

संसक्तायां योनौ द्वीन्द्रिया एते शुक्रशोणितसंभवास्तु गर्भजपञ्चेन्द्रिया इमे

पंचिंदियामणुस्सा रागनरभुत्तनारिगब्भंमि ।
उक्कोसंनवलरक्खाजायंतीरागहेलाए ॥६॥
नवलरकाणं मज्झे जायइइक्कस्स दुन्हयसम्मती ।
सेसापुणएमेव यविलयंवच्चंतितच्छेवा ॥ ७ ॥

तदेवं जीवोपमर्दहेतुत्वान्न मांसभक्षणादिकमदुष्टमिति प्रयोगः अथ वा भूतानां पिशाचप्रायाणामेषा प्रवृत्तिस्त एवात्र मांसभक्षणादौ प्रवर्त्तन्ते न पुन र्विवेकिन इति भावः तदेवं मांसभक्षणादेर्दुष्टतां स्पष्टीकृत्य यदुपदेष्टव्यं तदाह निवृत्तिस्तु महाफला

तुरेवकारार्थः तुः स्यादेवधारणे इति वचनात् ततश्चैतेभ्यो मांसभक्षणादिभ्यो निवृत्तिरेव फला स्वर्गापवर्गफलप्रदा न पुनः प्रवृत्तिरपीत्यर्थः अत एव स्थानान्तरे पठितम् ।

वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोस्तुल्यं भवेत्फलम् ॥ १ ॥
एकरात्रोषितस्यापि या गतिर्ब्रह्मचारिणः ।
न सा क्रतुसहस्रेण प्राप्तुं शक्या युधिष्ठिर ॥ १ ॥

मद्यपाने तु कृतं सूत्रानुवादैस्तस्य सर्वविगर्हितत्वात्तानेवंप्रकारानर्थान् कथमिव बुधाभासास्तीर्थिका वेदितुमर्हन्तीति कृतं प्रसङ्गेन अथ कोऽसौ सप्तभङ्गाः कश्चाशमादेशभेद इत्युच्यते एकत्र जीवादौ वस्तुनि एकैकसत्वादिधर्मविषयप्रश्नवशादविरोधेन प्रत्यक्षादिबाधापरिहारेण पृथग्भूतयोः समुदितयोश्च विधिनिषेधयोः पर्यालोचनया कृत्वा स्याच्छब्दलाञ्छितो वक्ष्यमाणैः सप्तभिः प्रकारैर्वचनविन्यासः सप्तभङ्गीति गीयते तद्यथा स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्गः स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयः स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेधकल्पनया तृतीयः स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया चतुर्थः स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चमः स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधक-

ल्पनया युगपद्विधिनिषेधकल्पनया च षष्ठः स्याद-स्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो वि-धिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च स-प्तमः तत्र स्यात्कथंचित्स्वद्रव्यक्षेत्रकालभावरूपेणास्त्ये-व सर्वं कुम्भादि न पुनः परद्रव्यक्षेत्रकालभावरूपेण तथा हि कुम्भो द्रव्यतः पार्थिवत्वेनास्ति नाबादिरूप-त्वेन क्षेत्रतः पाटलिपुत्रकत्वेन न कान्यकुब्जादित्वेन कालतः शिशिरत्वेन न वासन्तिकादित्वेन भावतः श्यामत्वेन न रक्तादित्वेन अन्यथेतररूपापत्त्या स्वरू-पहानिप्रसङ्ग इति अवधारणं चात्र भङ्गेऽनभिमतार्थ-व्यावृत्त्यर्थमुपात्तम् इतरथाऽनभिमततुल्यतैवास्य प्र-सज्येत प्रतिनियतस्वार्थानभिधानात्तदुक्तम्।

वाक्येऽवधारणं तावदनिष्टार्थनिवृत्तये।
कर्तव्यमन्यथाऽनुक्तसमत्वात्तस्य कुत्र चित्॥

तथाप्यस्त्येव कुम्भ इत्येतावन्मात्रोपादाने कु-म्भस्य स्तम्भाद्यस्तित्वेनापि सर्वप्रकारेणास्तित्वप्राप्तेः प्रतिनियतस्वरूपानुपपत्तिः स्यात् तत्प्रतिपत्तये स्या-दिति शब्दः प्रयुज्यते स्यात्कथंचित्स्वद्रव्यादिभिरेवा-यमस्ति न परद्रव्यादिभिरपीत्यर्थः यत्रापि चासौ न प्रयुज्यते तत्रापि व्यवच्छेदफलैवकारवत् बुद्धिमद्भिः प्रतीयत एव यदुक्तम्।

सोऽप्रयुक्तोऽपि वा तज्ज्ञैः सर्वत्रार्थात्प्रतीयते।
यथैवकारो ऽयोगादिव्यवच्छेदप्रयोजनः॥

इति प्रथमो भङ्गः स्यात्कथंचिन्नास्त्येव कुम्भादिः स्वद्रव्यादिभिरपि वस्तुनोऽसत्वानिष्टौ हि द्रव्यादिभिरिव परप्रतिनियतस्वरूपाभावात् वस्तुप्रतिनियतिर्न स्यात् न चास्तित्वैकान्तवादिभिरत्र नास्तित्वमसिद्धमिति वक्तव्यं कथं चित्तस्य वस्तुनि युक्तिसिद्धत्वात्साधनवत् न हि क्वचिदनित्यत्वादौ साध्ये सत्वादिसाधनस्यास्तित्वं विपक्षे नास्तित्वमन्तरेणोपपन्नं तस्य साधनत्वाभावप्रसङ्गात् तस्माद्वस्तुनोऽस्तित्वं नास्तित्वेनाविनाभूतं नास्तित्वं च तेनेति विवक्षावशाच्चानयोः प्रधानोपसर्जनभावः एवमुत्तरभङ्गेष्वपि ज्ञेय "मर्पितानर्पितसिद्धे"रिति वाचकवचनात् इति द्वितीयः तृतीयः स्पष्ट एव द्वाभ्यामस्तित्वनास्तित्वधर्माभ्यां युगपत्प्रधानतयाऽर्पिताभ्यामेकस्य वस्तुनोऽभिधित्सायां तादृशस्य शब्दस्यासम्भवादवक्तव्यं जीवादिवस्तु तथा हि सदसत्त्वगुणद्वयं युगपदेकत्र सदित्यनेन वक्तुमशक्यं तस्यासत्त्वप्रतिपादनासमर्थत्वात् तथाऽसदित्यनेनापि तस्य सत्त्वप्रत्यायनसामर्थ्याभावात् न च पुष्पदन्तादिवत्साङ्केतिकमेकं पदं तद्वक्तुं समर्थं तस्यापि क्रमेणार्थद्वयप्रत्यायने सामर्थ्योपपत्तेः शतृशानयोः संकेतितसच्छब्दवत् अत एव द्वन्द्वकर्मधारयवृत्त्योर्वाक्यस्य वचनाद्वाचकत्वमिति सकलवाचकरहितत्वादवक्तव्यं वस्तु युगपत्सत्त्वासत्त्वाभ्यां प्रधानभावार्पिताभ्यामाक्रान्तं व्यवतिष्ठते न च सर्वथाऽवक्तव्यमवक्तव्यशब्देनाप्यनभिधेयत्वप्रसङ्गादिति चतुर्थः शेषास्त्रयः

सुगमाभिप्रायाः न च वाच्यम् एकत्र वस्तुनि विधीयमाननिषिध्यमानाऽनन्तधर्माभ्युपगमेनानन्तभङ्गीप्रसङ्गादसङ्गतैव सप्तभङ्गीति विधिनिषेधप्रकारापेक्षया प्रतिपर्यायं वस्तुन्यनन्तानामपि सप्तभङ्गीनामेव सम्भवात् यथा हि सदसत्त्वाभ्यामेवं सामान्यविशेषाभ्यामपि सप्तभङ्ग्येव स्यात् तथा हि स्यात्सामान्यं स्याद्विशेषः स्यादुभयं स्यादवक्तव्यं स्यात्सामान्यावक्तव्यं स्याद्विशेषावक्तव्यं स्यात्सामान्यविशेषावक्तव्यमिति न चात्रविधिनिषेधप्रकारौ न स्त इति वाच्यं सामान्यस्य विधिरूपत्वाद्विशेषस्य च व्यावृत्तिरूपतया निषेधात्मकत्वात् अथ वा प्रतिपक्षशब्दत्वाद्यदा सामान्यस्य प्राधान्यं तदा तस्य विधिरूपता विशेषस्य च निषेधरूपता यदा विशेषस्य पुरस्कारस्तदा तस्य विधिरूपता इतरस्य च निषेधरूपता एवं सर्वत्र योज्यम् अतः सुष्ठूक्तम् अनन्ता अपि सप्त भङ्गा एव सम्भवेयुरिति प्रतिपर्यायं प्रतिपाद्यपर्यनुयोगानां सप्तानामेव सम्भवात्तेषामपि सप्तविधतज्जिज्ञासानियमात् तस्या अपि सप्तविधत्वं सप्तधैव तत्सन्देहसमुत्पादात् तस्यापि सप्तविधत्वनियमः स्वगोचरवस्तुधर्माणां सप्तविधत्वस्यैवोपपत्तेरिति इयं सप्तभङ्गी प्रतिभङ्गं सकलादेशस्वभावा विकलादेशस्वभावा च तत्र सकलादेशः प्रमाणवाक्यं तल्लक्षणं चेदं प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपा-

दुक्तं वचः सकलादेशः अस्यार्थः कालादिभिरष्टभिः कृत्वा यदभेदवृत्तेर्धर्मधर्मिणोरपृथक्भावस्य प्राधान्यं तस्मात्कालादिभि भिन्नात्मनामपि धर्मधर्मिणामभेदा-ध्यारोपाद्वा समकालमभिधायकं वाक्यं सकलादेश स्तद्विपरीतस्तु विकलादेशो नयवाक्यमित्यर्थः अयमाशयः यौगपद्येनाशेषधर्मात्मकं वस्तु कालादिभिरभेदप्रधानवृत्त्याऽभेदोपचारेण वा प्रतिपादयति सकलादेशः तस्य प्रमाणाधीनत्त्वात् विकलादेशस्तु क्रमेण भेदोपचाराद्भेदप्राधान्याद्वा तदभिधत्ते तस्य नयात्मकत्वात्कः पुनः क्रमः किं वा यौगपद्यं यदाऽस्तित्त्वादिधर्माणां कालादिभिर्भेदविवक्षा तदैकशब्दस्यानेकार्थप्रत्यायने शक्त्यभावात्क्रमः यदा तु तेषामेव धर्माणां कालादिभिरभेदेन वृतमात्मरूपमुच्यते तदैकेनापि शब्देनैकधर्मप्रत्यायनमुखेन तदात्मकतामापन्नस्यानेकाशेषधर्मरूपस्य वस्तुनः प्रतिपादनसम्भवाद्यौगपद्यं के पुनः कालादयः कालः १ आत्मरूपम् २ अर्थः ३ संबन्धः ४ उपकारः ५ गुणिदेशः ६ संसर्गः ७ शब्दः ८ इति तत्र स्याज्जीवादिवस्त्वस्त्येवेत्यत्र यत्कालमस्तित्वं तत्कालाशेषानन्तधर्मा वस्तुन्येकत्रेति तेषां कालेनाभेदवृत्तिः १ यदेव चास्तित्वस्य तद्गुणत्वमात्मरूपं तदेवान्यानन्तगुणानामपीति आत्मरूपेणाभेदवृत्तिः २ य एव चाधारोऽर्थो द्रव्याख्यो ऽस्तित्वस्य स एवान्यपर्यायाणामित्यर्थेनाभेदवृत्तिः ३ य एव चाविष्वग्भावः कथं चित्तादात्म्यलक्षणः सम्बन्धोऽस्ति-

त्वस्य स एव शेषविशेषाणामिति सम्बन्धेनाभेदवृत्तिः ४ य एवचोपकारोऽस्तित्वेन स्वानुरक्तत्वकरणं स एवशेषैरपिगुणैरित्युपकारेणाभेदवृत्तिः ५ य एव गुणिनः संबन्धी देशः केवलञ्चणोऽस्तित्वस्य स एवान्यगुणानामिति गुणिदेशेनाभेदवृत्तिः ६ य एव चैकवस्त्वात्मनाऽस्तित्वस्य संसर्गः स एव शेषधर्माणामिति संसर्गेणाभेदवृत्तिः अविष्वग्भावे ऽभेदः प्रधानं भेदो गौणः संसर्गे तु भेदः प्रधानमभेदो गौण इति विशेषः ७ य एव चास्तीति शब्दो ऽस्तित्त्वधर्मात्मकस्य वस्तुनो वाचकः स एव शेषानन्तधर्मात्मकस्यापीति शब्देनाभेदवृत्तिः ८ पर्यायार्थिकनयगुणभावे द्रव्यार्थिकनयप्राधान्यादुपपद्यते द्रव्यार्थिकगुणभावेन पर्यायार्थिकप्राधान्ये तु न गुणानामभेदवृत्तिः सम्भवति समकालमेकत्र नानागुणानामसम्भवात् सम्भवे वा तदाश्रयस्य तावद्धा भेदप्रसङ्गात् १ नानागुणानां सम्बन्धिन आत्मरूपस्य च भिन्नत्वात् आत्मरूपाभेदे तेषां भेदस्य विरोधात् २ स्वाश्रयस्यार्थस्यापि नानात्वादन्यथा नानागुणाश्रयत्त्वस्य विरोधात् ३ सम्बन्धस्य च सम्बन्धिभेदेन भेददर्शनान्नानासम्बन्धिभिरेकत्रैकसम्बन्धाघटनात् ४ तैः क्रियमाणस्योपकारस्य च प्रतिनियतस्वरूपस्यानेकत्त्वात् अनेकैरुपकारिभिः क्रियमाणस्योपकारस्य विरोधात् ५ गुणिदेशस्य प्रतिगुणं भेदात्तदभेदे भिन्नार्थगुणानामपि गुणिदेशाभेदप्रसङ्गात् ६ संसर्गस्य च प्रतिसंसर्गिभेदात्तदभे-

दे संसर्गिभेदविरोधात् ७ शब्दस्य प्रतिविषयं नानात्वात्सर्वगुणानामेकशब्दवाच्यतायां सर्वार्थानामेकशब्दवाच्यतापत्तेः शब्दान्तरवैफल्यापत्तेः ८ तत्त्वतोऽस्तित्वादीनाम् एकत्र वस्तुन्येवमभेदवृत्तेरसम्भवे कालादिभिर्भिन्नात्मनाम् अभेदोपचारः क्रियते तदेताभ्याम् अभेदवृत्त्यभेदोपचाराभ्यां कृत्वा प्रमाणप्रतिपन्नाऽनन्तधर्मात्मकस्य वस्तुनः समसमयं यदभिधायकं वाक्यं स सकलादेशः प्रमाणवाक्यापरपर्यायः नयविषयीकृतस्य वस्तुधर्मस्य भेदवृत्तिप्राधान्याद् भेदोपचाराद्वा क्रमेण यदभिधायकं वाक्यं स विकलादेशो नयवाक्यापरपर्याय इति स्थितं ततः साधूक्तमादेशभेदोदितसप्तभङ्गमिति काव्यार्थः ॥ २३ ॥

अनन्तरं भगवद्दर्शितस्यानेकात्मनो वस्तुनो बुधरूपवेद्यत्वमुक्तम् अनेकान्तात्मकत्वं च सप्तभङ्गीप्ररूपणेन सुखोन्नेयं स्यादिति सापि निरूपिता तस्यां च विरुद्धधर्माध्यासितं वस्तु पश्यन्त एकान्तवादिनो बुधरूपा विरोधमुद्भावयन्ति तेषां प्रमाणमार्गाच्च्यवनमाह ।

उपाधिभेदोपहितं विरुद्धं
नार्थेष्वसत्त्वं सदवाच्यते च ।
इत्यप्रबुद्ध्यैव विरोधभीता
जडास्तदेकान्तहताः पतन्ति ॥ २४ ॥

अर्थेषु पदार्थेषु चेतनाचेतनेष्वसत्वं न विरुद्धम् अस्तित्वेन सह विरोधं नानुभवतीत्यर्थः न केवलमसत्त्वं न विरोधावरुद्धं किं तु सदवाच्यते सच्चावाच्यं च सदवाच्ये तयोर्भावो सदवाच्यते अस्तित्वावक्तव्यत्वे इत्यर्थः ते अपि न विरुद्धे तथाहि अस्तित्वं नास्तित्वेन सह न विरुध्यते अवक्तव्यत्वमपि विधिनिषेधात्मकमन्योन्यं न विरुध्यते अथ च अवक्तव्यत्वं वक्तव्यत्वेन सार्कं न विरोधमुद्वहति अनेन च नास्तित्वास्तित्वावक्तव्यत्वलक्षणभङ्गत्रयेण सकलसप्तभङ्ग्या निर्विरोधता उपलक्षिता अमीषां त्रयाणां मुख्यत्वाच्छेषभङ्गानां च संयोगजत्वेनामीष्वेवान्तर्भावादिति नन्वेते धर्माः परस्परं विरुद्धाः तत्कथमेकत्र वस्तुन्येषां समावेशः संभवति इति विशेषणद्वारेण हेतुमाह उपाधिभेदोपहितमिति उपाधयोऽवच्छेदका अंशप्रकारास्तेषां भेदो नानात्त्वं तेनोपहितमर्पितम् असत्वस्य विशेषणमेतत् उपाधिभेदोपहितं सदर्थेष्वसत्त्वं न विरुद्धं सदवाच्यतयोश्च वचनभेदं कृत्वा योजनीयम् उपाधिभेदोपहिते सती सदवाच्यते अपि न विरुद्धे अयमभिप्रायः परस्परपरिहारेण ये वर्तेते तयोः शीतोष्णवत्सहानवस्थानलक्षणो विरोधो न चात्रैवं सत्त्वासत्त्वयोरितरेतरमविष्वग्भावेन वर्त्तनात् न हि घटादौ सत्त्वमसत्त्वं परिहृत्य वर्तते पररूपेणापि सत्त्वप्रसङ्गात् तथा च तद्व्यतिरिक्तार्थान्तराणां नैरर्थक्यं तेनैव त्रिभुवनसाध्यार्थक्रियाणां सिद्धेर्न चासत्त्वं

सत्त्वं परिहृत्य वर्तते स्वरूपेणाप्यसत्त्वप्राप्तेस्तथा च निरूपाख्यत्वात्सर्वशून्यतेति तदा हि विरोधः स्याद्यद्येकोपाधिकं सत्त्वमसत्त्वं च स्यात् न चैवं यतो न हि येनैवांशेन सत्त्वं तेनैवासत्त्वमपि किं त्वन्योपाधिकं सत्त्वमन्योपाधिकं पुनरसत्त्वं स्वरूपेण हि सत्त्वं पररूपेण चासत्त्वं दृष्टं हि एकस्मिन्नेव चित्रपटावयविनि अन्योपाधिकं तु नीलत्वमन्योपाधिकाश्चेतरे वर्णा नीलत्वं हि नीलीरागाद्युपाधिकं वर्णान्तराणि च तत्तद्रञ्जनद्रव्योपाधिकानि एवं मेचकरत्नेऽपि तत्तद्वर्णपुद्गलोपाधिकं वैचित्र्यमवसेयं न चैभिर्दृष्टान्तैः सत्त्वासत्त्वयोर्भिन्नदेशत्वप्राप्तिश्चित्रपटाद्यवयविन एकत्वात्तत्रापि भिन्नदेशत्वासिद्धेः कथंचित्पक्षस्तु दृष्टान्ते दार्ष्टान्तिके च स्याद्वादिनां न दुर्लभः एवमप्यपरितोषश्चेदायुष्मतस्तर्ह्येकस्यैव पुंसस्तत्तदुपाधिभेदात्पितृत्वपुत्रत्वमातुलत्वभागिनेयत्वपितृव्यत्वभ्रातृव्यत्वादिधर्माणां परस्परविरुद्धानामपि प्रसिद्धिदर्शनात् किं वाच्यम् एवमवक्तव्यत्वादयोऽपि वाच्याः इत्युक्तप्रकारेण उपाधिभेदेन वास्तवं विरोधाभावमप्रबुद्ध्यैवाज्ञात्वैव एवकारोऽवधारणे स च तेषां सम्यग्ज्ञानस्याभाव एव न पुनर्लेशतोऽपि भाव इति व्यनक्ति ततस्ते विरोधभीताः सत्त्वासत्त्वादिधर्माणां बहिर्मुखशेमुष्यासंभावितो यो विरोधः सहानवस्थानादिस्तस्माद्भीतास्त्रस्तमानसा अत एव जडास्तात्त्विकभयहेतोरभावेऽपि तथाविधपशुवद्भीतत्वान्मूर्खाः परवादिनस्तदेकान्त-

हतास्तेषां सत्त्वादिधर्माणां य एकान्त इतरधर्म-
निषेधनेन स्वाभिप्रेतधर्मव्यवस्थापननिश्चयस्तेन हता
इव हताः पतन्ति स्खलन्ति पतिताश्च सन्तस्तेऽन्या-
यमार्गाक्रमणेनासमर्था न्यायमार्गाध्वनीनानां च
सर्वेषामप्याक्रमणीयतां यान्तीति भावः यद्वा प्रत-
न्तीति प्रमाणमार्गतश्च्यवन्ते लोके हि सन्मार्गच्युतः
पतित इति परिभाष्यते अथ वा यथा वज्रादिप्र-
हारेण हतः पतितो मूर्छामतुच्छामासाद्य निरुद्धवा-
क्प्रसरो भवति एवं तेऽपि वादिनः स्वाभिमतैकान्त-
वादेन युक्तिसरणिमननुसरन्तो वज्राशनिप्रायेण नि-
हताः सन्तः स्याद्वादिनां पुरतोऽकिंचित्करा वाङ्मा-
त्रमपि नोच्चारयितुमीशत इति अत्र च विरोधस्योपल-
क्षणत्वाद्वैयधिकरण्यमनवस्था संकरो व्यतिकरः संशयो
प्रतिपत्तिर्विषयव्यवस्थाहानिरित्येतेऽपि परोद्भाविता
दोषा अभ्यूह्यास्तथाहि सामान्यविशेषात्मकं वस्त्वित्यु-
पन्यस्ते परे उपालब्धारो भवन्ति यथा सामान्यवि-
शेषयोर्विधिप्रतिषेधरूपयोरेकत्राभिन्ने वस्तुन्यसंभवा-
च्छीतोष्णवदिति विरोधः न हि यदेव विधेरधिकर-
णं तदेव प्रतिषेधस्याधिकरणं भवितुमर्हति द्वाभ्यां वा
स्वभावाभ्याम् एकेनैव चेत्तत्र पूर्ववद्विरोधः द्वाभ्यां वा
स्वभावाभ्यां सामान्यविशेषाख्यं स्वभावद्वयमधिकरो-
ति तदाऽनवस्था तावपि स्वभावान्तराभ्यां तावपि
स्वभावान्तराभ्यामिति येनात्मना सामान्यस्याधिक-
रणं तेन सामान्यस्य विशेषस्य च येनच विशेषस्या-

धिकरणं तेन विशेषस्य सामान्यस्य चेति संकरदोषः येन स्वभावेन सामान्यं तेन विशेषो येन विशेषस्तेन सामान्यमिति व्यतिकरः ततश्च वस्तुनोऽसाधारणाकारेण निश्चेतुमशक्तेः संशयः ततश्चाप्रतिपत्तिः ततश्च प्रमाणविषयव्यवस्थाहानिरिति एते च दोषाः स्याद्वादस्य जात्यन्तरत्वान्निरवकाशा एवातःस्याद्वादमर्मवेदिभिरुद्धरणीयास्तत्तदुपपत्तिभिरिति स्वतन्त्रयोर्निरपेक्षयोरेव सामान्यविशेषयोर्विधिरूपयोस्तेषामवकाशात् अथ वा विरोधशब्दोऽत्र दोषवाची यथा विरुद्धमाचरतीति दुष्टमित्यर्थः ततश्च विरोधिभ्यः विरोधवैयधिकरण्यादिदोषेभ्यो भीता इति व्याख्येयम् एवं च सामान्यशब्देन सर्वा अपि दोषव्यक्तयः संगृहीता भवन्तीति काव्यार्थः ॥ २३ ॥

अथानेकान्तवादस्य सर्वद्रव्यपर्यायव्यापित्वेऽपि मूलभेदापेक्षया चातुर्विध्याभिधानद्वारेण भगवतस्तत्त्वामृतरसास्वादसौहित्यमुपवर्णयन्नाह ।

स्यान्नाशि नित्यं सदृशं विरूपं
वाच्यं न वाच्यं सदसत्तदेव ।
विपश्चितां नाथ निपीततत्त्व-
सुधोद्गतोद्गारपरंपरेयम् ॥२५॥

स्यादित्यव्ययमनेकान्तद्योतकम् अष्टास्वपि पदेषु

योज्यं तदेवाधिकृतमेवैकं वस्तु स्यात्कथं चिन्नाशि न-शनशीलमनित्यमित्यर्थः स्यान्नित्यमविनाशधर्म्मीत्यर्थः एतावता नित्यानित्यलक्षणमेकं विधानं तथा स्यात्स-दृशम् अनुवृत्तिहेतुसामान्यरूपं स्याद्विरूपं विविधरूपं विसदृशपरिणामात्मकं व्यावृत्तिहेतुविशेषरूपमित्यर्थः अनेन सामान्यविशेषरूपो द्वितीयः प्रकारः तथा स्याद्वाच्यं वक्तव्यं स्यान्न वाच्यमवक्तव्यमित्यर्थः अत्र च समासेऽवाच्यमिति युक्तं तथाप्यवाच्यपदं योन्यादौ रूढमित्यसभ्यतापरिहारार्थं न वाच्यमित्यसमस्तं च-कार स्तुतिकारः एतेन अभिलाप्यानभिलाप्यस्वरूप-स्तृतीयो भेदः तथा स्यात्सद् विद्यमानं अस्तिरूपमि-त्यर्थः स्यादसत्तद्विलक्षणमित्यनेन सदाख्या चतुर्थी वि-धा हे विपश्चितां नाथ संख्यावतां मुख्य इयमनन्त-रोक्तनिपीततत्त्वसुधोद्गतोद्गारपरम्परा तवेति प्रक-रणात्सामर्थ्याद्वा गम्यते तत्त्वं यथावस्थितवस्तुस्वरूप-परिच्छेदस्तदेव जरामरणापहारित्वाद्विबुधोपभोग्य-त्वान्मिथ्यात्वविषोर्म्मिनिराकरिष्णुत्वादान्तराह्लाद-कारित्वाच्च पीयूषं तत्त्वसुधा नितरामनन्यतया पी-ता आस्वादिता या तत्त्वसुधा तस्या उद्गता प्रा-दुर्भूता तत्कारणिका या उद्गारपरम्परा उद्गारश्रे-णिरित्यर्थः यथा हि कश्चिदाकण्ठं पीयूषरसमापीय तदनुविधायिनीमुद्गारपरम्परां मुञ्चति तथा भगवा-नपि जरामरणापहारितत्त्वामृतं स्वैरमास्वाद्य तद्र-सानुविधायिनीं प्रस्तुतानेकान्तवादभेदचतुष्टयीलक्षणा-

मुद्गारपरम्परां देशनामुखेनोद्गीर्णवानित्याशयः अथ वा यैरेकान्तवादिभिर्मिथ्यात्वगरलभोजनमात्रमपि भक्षितं तेषां तत्तद्वचनयुक्ता उद्गारप्रकाराः प्राक्प्रदर्शिता यैस्तु पचेलिमप्राचीनपुण्यप्राग्भारानुगृहीतैर्जगद्गुरुवदनेन्दुनिःस्यन्दितवचनामृतं मनोहृत्य पीतं तेषां विपश्चितां यथार्थवादविदुषां हे नाथ इयं पूर्वदलदर्शितोल्लेखशेखरा उद्गारपरम्परेति व्याख्येयम् एते चत्वारोऽपि वादास्तेषु स्थानेषु प्रागेव चर्चितास्तथा हि आदीपमाव्योमेति वृत्ते नित्यानित्यवादः अनेकमेकात्मकमिति काव्ये सामान्यविशेषवादः सप्तभङ्ग्यामभिलाप्यानभिलाप्यवादः सदसद्वादश्च इति न भूयः प्रयास इति काव्यार्थः ॥ २५ ॥

इदानीं नित्यानित्यपक्षयोः परस्परदूषणप्रकाशनबद्धलक्षणतया वैरायमाणयोरितरेतरोदीरितविविधहेतुहेतिसंनिपातसंजातविनिपातयोरयत्नसिद्धप्रतिपक्षप्रतिक्षेपस्य भगवच्छासनसाम्राज्यस्य सर्वोत्कर्षमाह ।

य एव दोषाः किल नित्यवादे
विनाशवादेऽपि समास्त एव ।
परस्परध्वंसिषु कण्टकेषु
जयत्यधृष्यं जिनशासनं ते ॥२६॥

किलेति निश्चये य एव नित्यवादे नित्यैकान्त-

वादे दोषाः अनित्यैकान्तवादिभिः प्रसञ्जिताः क्रमयौगपद्याभ्याम् अर्थक्रियानुपपत्त्यादयस्त एव विनाशवादेऽपि क्षणिकैकान्तवादेऽपि समास्तुल्या नित्यैकान्तवादिभिः प्रसज्यमाना अन्यूनाधिकास्तथा हि नित्यवादी प्रमाणयति सर्वं नित्यं सत्त्वात् क्षणिके सदसत्कालयोरर्थक्रियाविरोधात्तल्लक्षणं सत्त्वं नावस्थां बध्नातीति ततो निवर्तमानमनन्यशरणतया नित्यत्वेऽवतिष्ठते तथा हि क्षणिकोऽर्थः सन्वा कार्यं कुर्यादसन्वा गत्यन्तराभावात् न तावदाद्यः पक्षः समसमयवर्त्तिनि व्यापारयोगात् सकलभावानां परस्परं कार्यकारणभावप्राप्त्याऽतिप्रसङ्गाच्च नापि द्वितीयः पक्षः क्षोदं क्षमते असतः कार्यकरणशक्तिविकलत्वादन्यथा शशविषाणादयोऽपि कार्यकारणयोगात्स्युरन् विशेषाभावादिति अनित्यवादी नित्यत्ववादिनं प्रति पुनरेवं प्रमाणयति सर्वं क्षणिकं सत्त्वादक्षणिके क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् अर्थक्रियाकारित्वस्य च भावलक्षणत्वात् ततोऽर्थक्रियाव्यावर्तमाना स्वक्रोडीकृतां सत्तां व्यावर्त्तयेदिति क्षणिकसिद्धिः न हि नित्योऽर्थोऽर्थक्रियां क्रमेण प्रवर्तयितुमुत्सहते पूर्वार्थक्रियाकरणस्वभावोपमर्दद्वारेणोत्तरक्रियायाः क्रमेण प्रवृत्तेरन्यथा पूर्वक्रियाकरणाविरामप्रसङ्गात् तत्स्वभावप्रच्यवे च नित्यता प्रयाति अतादवस्थ्यस्यानित्यतालक्षणत्वात् अथ नित्योऽपि क्रमवर्त्तिनं सहकारिकारणमर्थमुदीक्षमाणस्तावदासीत पश्चात्तमासाद्य क्र-

मेण कार्यं कुर्यादिति चेन्न सहकारिकारणस्य नित्येऽकिंचित्करत्वात् अकिञ्चित्करस्यापि प्रतीक्षणेऽनवस्थाप्रसङ्गात् नापि यौगपद्येन नित्योऽर्थोऽर्थक्रियां कुरुते अध्यक्षविरोधात् न ह्येककालं सकलाः क्रियाः प्रारभमाणः कश्चिदुपलभ्यते करोतु वा तथाप्याद्यक्षण एव सकलक्रियापरिसमाप्तेर्द्वितीयादिक्षणेष्वकुर्वाणस्यानित्यता बलादाढौकते करणाकरणयोरेकस्मिन्विरोधात् इति तदेवमेकान्तद्वयेऽपि ये हेतवस्ते युक्तिसाम्याद्विरुद्धं न व्यभिचरन्तीत्यविचारितरमणीयतया मुग्धजनसाध्यं चोत्पादयन्तीति विरुद्धा व्यभिचारिणोऽनैकान्तिका इति अत्र च नित्यानित्यैकान्तपक्षप्रतिक्षेप एवोक्तः उपलक्षणत्वाच्च सामान्यविशेषाद्येकान्तवादा अपि मिथस्तुल्यदोषतया विरोधाव्यभिचारिण एव हेतूनुपस्पृशन्तीति परिभावनीयम् अथोत्तरार्द्धं व्याख्यायते परस्परेत्यादि एवं च कण्टकेषु क्षुद्रशत्रुषु एकान्तवादिषु परस्परध्वंसिषु सत्सु परस्परस्मात् ध्वंसन्ते विनाशमुपयान्तीत्येवं शीलाः सुन्दोपसुन्दवदिति परस्परध्वंसिनस्तेषु हे जिन ते तव शासनं स्याद्वादप्ररूपणानिपुणं द्वादशाङ्गीरूपं प्रवचनं पराभिभावुकानां कण्टकानां स्वयमुच्छिन्नत्वेनैवाभावादधृष्यम् अपराभवनीयं "शक्तार्हे कृत्याश्चे"ति कृत्यविधानाद्धर्षितुमशक्यं धर्षितुमनर्हं वा जयति सर्वोत्कर्षेण वर्तते यथा कश्चिन्महाराजः पीवरपुण्यपरीपाकः परस्परं विगृह्य स्वयमेव क्षयमुपेयिवत्सु द्विषत्सु अय-

तसिद्धनिष्कण्टकत्वं समृद्धं राज्यमुपभुञ्जानः सर्वोत्-कृष्टो भवत्येवं त्वच्छासनमपीति काव्यार्थः ॥ २६ ॥

अनन्तरकाव्ये नित्यानित्याद्येकान्तवाददोष-सामान्यमभिहितमिदानीं कतिपयतत्तद्विशेषान्नाम-ग्राहं दर्शयंस्तत्प्ररूपकाणामसद्भूतोद्भावकतयोद्धततथा-विधरिपुजनजनितोपद्रवमिव परित्रातुर्धरित्रीपतेस्त्रि-जगत्पतेः पुरतो भुवनत्रयं प्रत्युपकारकारितामा-विष्करोति ।

**नैकान्तवादे सुखदुःखभोगौ**
**न पुण्यपापे न च बन्धमोक्षौ ।**
**दुर्नीतिवादव्यसनासिनैवं**
**परैर्विलुप्तं जगदप्यशेषम् ॥२७॥**

एकान्तवादे नित्यानित्यैकान्तपक्षाभ्युपगमे न सु-खदुःखभोगौ घटेते न च पुण्यपापे घटेते न च बन्धमो-क्षौ घटेते पुनःपुनर्नञः प्रयोगोऽत्यन्ताघटमानताद्-र्शनार्थः तथा ह्येकान्तनित्ये आत्मनि तावत् सुखदुःख-भोगौ नोपपद्येते नित्यस्य हि लक्षणं अप्रच्युतानुत्प-न्नस्थिरैकरूपत्वं ततो यदात्मा सुखमनुभूय स्वकार-णकलापसामग्रीवशात् दुःखमुपभुङ्क्ते तदा स्वभाव-भेदादनित्यत्वापत्त्या स्थिरैकरूपताहानिप्रसङ्गः एवं दुःखमनुभूय सुखमुपभुञ्जानस्यापि वक्तव्यम् अथाव-स्थाभेदादयं व्यवहारो न चावस्थासु भिद्यमानास्वपि

तद्वतो भेदाः सर्पस्येव कुण्डलार्जवाद्यवस्थास्विति चेन्न-नु तास्ततो व्यतिरिक्ता अव्यतिरिक्ता वा व्यतिरेके तास्तस्येति संबन्धाभावोऽतिप्रसङ्गात् अव्यतिरेके तु तद्वानेवेति तदवस्थितैव स्थिरैकरूपताहानिः कथं च तदेकान्तैकरूपत्वेऽवस्थाभेदोऽपि भवेदिति किं च सुखदुःखभोगौ पुण्यपापनिर्वर्त्त्यौ तन्निर्वर्तनं चार्थक्रिया सा च कूटस्थनित्यस्य क्रमेणाक्रमेण वा नोपपद्यत इत्युक्तप्रायमत एवोक्तं न पुण्यपापे इति पुण्यं दानादिक्रियोपार्जनीयं शुभं कर्म पापं हिंसादिक्रियासाध्यमशुभं कर्म ते अपि न घटेते प्रागुक्तनीतेः तथा न बन्धमोक्षौ बन्धः कर्मपुद्गलैः सह प्रतिप्रदेशमात्मनो वन्ह्ययःपिण्डवदन्योन्यसंश्लेषः मोक्षः कृत्स्नकर्मक्षयस्तावप्येकान्तनित्ये न स्यातां बन्धो हि संयोगविशेषः स चाप्राप्तानां प्राप्तिरितिलक्षणः प्राक्कालभाविनी अप्राप्तिरन्यावस्था उत्तरकालभाविनी प्राप्तिरन्या तदनयोरप्यवस्थाभेददोषो दुस्तरः कथं चैकरूपत्वे सति तस्याकस्मिको बन्धनसंयोगः बन्धनसंयोगाच्च प्राक्किं नायं मुक्तोऽभवत् किं च तेन बन्धनेनासौ विकृतिमनुभवति न वा अनुभवति चेच्चर्मादिवदनित्यः नानुभवति चेन्निर्विकारत्वे सता वा तेन गगनस्येव न कोऽप्यस्य विशेष इति बन्धवैफल्यान्नित्यं मुक्त एव स्यात्ततश्च विशीर्णा जगति बन्धमोक्षव्यवस्था तथा च पठन्ति ।

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम् ।

चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्फलः ।

बन्धानुपपत्तौ मोक्षस्याप्यनुपपत्तिः बन्धनविच्छेदपर्यायत्वान्मुक्तिशब्दस्येति एवमनित्यैकान्तवादेऽपि सुखदुःखाद्यनुपपत्तिरनित्यं हि अत्यन्तोच्छेदधर्मकं तथाभूते चात्मनि पुण्योपादानक्रियाकारिणो निरन्वयं विनष्टत्वात् कस्य नाम तत्फलभूतसुखानुभवः एवं पापोपादानक्रियाकारिणोऽपि निरवयवनाशे कस्य दुःखसंवेदनमस्तु एवं चान्यः क्रियाकारी अन्यश्च तत्फलभोक्तेत्यसमञ्जसमापद्यते ।

अथ यस्मिन्नेव हि सन्ताने आहिता कर्मवासना ।
फलं तत्रैव सन्धत्ते कर्पासे रक्तता यथा ॥

इति वचनान्नासमञ्जसमित्यपि वाङ्मात्रं सन्तानवासनयोरवास्तवत्वेन प्रागेव निर्लोठितत्वात् तथा पुण्यपापे अपि न घटेते तयोर्हि अर्थक्रिया सुखदुःखोपभोगस्तदनुपपत्तिश्चानन्तरमेवोक्ता ततोऽर्थक्रियाकारित्वाभावात्तयोरप्यघटमानत्वं किं चानित्यः क्षणमात्रस्थायी तस्मिंश्च क्षणे उत्पत्तिमात्रव्यग्रत्वात्तस्य कुतः पुण्यपापोपादानक्रियार्जनं द्वितीयादिक्षणेषु चावस्थातुमेव न लभते पुण्यपापोपादानक्रियाऽभावे च पुण्यपापे कुतो निर्मूलत्वात्तदसत्त्वे च कुतस्तनः सुखदुःखभोगः आस्तां वा कथं चिदेतत् तथाहि पूर्वक्षणसदृशेनोत्तरक्षणेन भवितव्यम् उपादानानुरूपत्वादुपादेयस्य ततः पूर्वक्षणाद्दुःखितादुत्तरक्षणः कथं सुखित उत्पद्यते कथं च सुखितात्ततः स दुःखितः

स्याद्विसदृशभागतापत्तेरेवं पुण्यपापादावपि तस्माद्य-त्किंचिदेतत् एवं बन्धमोक्षयोरप्यसम्भवो लोकेऽपि हि य एव बद्धः स एव मुच्यते निरन्वयनाशाभ्युपगमे च एकाधिकरणत्वाभावात्सन्तानस्य चावस्तुत्वात्-कुतस्तयोः सम्भावनामात्रमपीति परिणामिनि चा-त्मनि स्वीक्रियमाणे सर्वं निर्बाधमुपपद्यते परिणामो-ऽवस्थान्तरगमनं न च सर्वथाह्यवस्थानं न च सर्वथा विनाशः "परिणामस्तद्विदामिष्ट" इति वचनात् पत-ञ्जलिटीकाकारोऽप्याह अवस्थितस्य द्रव्यस्य पूर्वधर्मनि-वृत्तौ धर्मान्तरोत्पत्तिः परिणाम इति एवं सामान्य-विशेषसदसदभिलाप्यानभिलाप्य एकान्तवादेष्वपि सु-खदुःखाद्यभावः स्वयमभियुक्तैरभ्यूह्यः अथोत्तरार्द्धव्या-ख्या एवमनुपपद्यमानेऽपि सुखदुःखभोगादिव्यवहारे परतीर्थिकैरथ च परमार्हतः शत्रुभिः परशब्दो हि श-त्रुपर्यायोऽप्यस्ति दुर्नीतिवादव्यसनासिना नीयते एक-देशविशिष्टोऽर्थः प्रतीतिविषयमाभिरिति नीतयो न-या दुष्टा नीतयो दुर्नीतयो दुर्नयास्तेषां वदनं परेभ्यः प्रतिपादनं दुर्नीतिवादस्तत्र यद्व्यसनमत्यासक्तिरौ-चित्यनिरपेक्षा प्रवृत्तिरिति यावत् दुर्नीतिवादव्यसनं तदेव सद्बोधशरीरोच्छेदनशक्तियुक्तत्वादसिरिवासिः कृपाणो दुर्नीतिवादव्यसनासिस्तेन दुर्नीतिवादव्यस-नासिना करणभूतेन दुर्नयप्ररूपणाहेवाकखड्गेन एव मित्यनुभवसिद्धं प्रकारमाह अपिशब्दस्य भिन्नक्रम-त्वादशेषमपि जगन्निखिलमपि त्रैलोक्यगतजन्तुजातं

विलुप्तं सम्यग्ज्ञानादिभावप्राणव्यपरोपणेन व्यापादितं तत्त्वायस्वेत्याशयः सम्यग्ज्ञानादयो हि भावप्राणाः प्रावचनिकैर्गीयन्ते अत एव सिद्धेष्वपि जीवव्यपदेशोऽन्यथा हि जीवधातुः प्राणधारणार्थेऽभिधीयते तेषां च दशविधप्राणधारणाभावादजीवत्वप्राप्तिः सा च विरुद्धा तस्मात्संसारिणो दशविधद्रव्यप्राणधारणाज्जीवाः सिद्धाश्च ज्ञानादिभावप्राणधारणादिति सिद्धं दुर्नयस्वरूपं चोत्तरकाव्ये व्याख्यास्याम इति काव्यार्थः ॥ २७ ॥

सांप्रतं दुर्नयनयप्रमाणप्ररूपणद्वारेण "प्रमाणनयैरधिगम" इति वचनात् जीवाजीवादितत्त्वाधिगमनिबन्धनानां प्रमाणनयानां प्रतिपादयितुः स्वामिनः स्याद्वादविरोधिदुर्नयमार्गनिराकरिष्णुमनन्यसामान्यवचनातिशयं स्तुवन्नाह ।

**सदेव सत्स्यात्सदिति त्रिधाऽर्थो**
**मीयेत दुर्नीतिनयप्रमाणैः ।**
**यथार्थदर्शी तु नयप्रमाण-**
**पथेन दुर्नीतिपथं त्वमास्थः ॥२८॥**

अर्य्यते परिच्छिद्यत इत्यर्थः पदार्थस्त्रिधा त्रिभिः प्रकारैर्मीयेत परिच्छिद्येत विधौ सप्तमी कैस्त्रिभिः प्रकारैरित्याह दुर्नीतिनयप्रमाणैः नीयते परिच्छिद्यते एकदेशविशिष्टोऽर्थ आभिरिति नीतयो नया

दुष्टा नीतयो दुर्नीतयो दुर्नया इत्यर्थः नया नैगमाद्याः प्रमीयते परिच्छिद्यते ऽर्थोऽनेकान्तविशिष्टोऽनेनेति प्रमाणं स्याद्वादात्मकं प्रत्यक्षपरोक्षलक्षणं दुर्नीतयश्च नयाश्च प्रमाणे च दुर्नीतिनयप्रमाणानि तैः केनोल्लेखेन मीयेतेत्याह सदेव सत्स्यात्सदिति अव्यक्तत्वान्नपुंसकत्वं यथा किं तस्य गर्भे जातमिति सदेवेति दुर्नयः सदिति नयः स्यात्सदिति प्रमाणं तथा हि दुर्नयस्तावत्सदेवेति ब्रवीति अस्त्येव घट इति अयं वस्तुन्येकान्तास्तित्वमेवाभ्युपगच्छन्नितरधर्माणां तिरस्कारेण स्वाभिप्रेतमेव धर्मं व्यवस्थापयति दुर्नयत्वं चास्य मिथ्यारूपत्वात् मिथ्यारूपत्वं च तत्र धर्मान्तराणां सतामपि निह्नवात् तथा सदित्युल्लेखवान्नयः स ह्यस्ति घट इति घटे स्वाभिमतमस्तित्वधर्मं प्रसाधयन् शेषधर्मेषु गजनिमीलिकामालम्बते न चास्य दुर्नयत्वं धर्मान्तरातिरस्कारात् न च प्रमाणत्वं स्याच्छब्देनालाञ्छितत्वात् स्यात्सदिति स्यात्कथं चित्सद्वस्तु इति प्रमाणं प्रमाणत्वं चास्य दृष्टे इष्टाबाधितत्वाद्विपक्षे बाधकसद्भावाच्च सर्वं हि वस्तु स्वरूपेण सत्पररूपेण चासदित्यसकृदुक्तं सदिति दिङ्मात्रदर्शनार्थमनया दिशा असत्त्वनित्यत्वानित्यत्ववक्तव्यत्वावक्तव्यत्वसामान्यविशेषादावपि बोद्धव्यम् इत्थं वस्तुस्वरूपमाख्याय स्तुतिमाह यथार्थदर्शीत्यादि दुर्नीतिपथं दुर्नयमार्गं तु शब्दस्य अवधारणार्थस्य भिन्नक्रमत्त्वात्त्वमेव आस्थस्त्वमेव निराकृतवान् न तीर्थान्तरदैवतानि केन

कृत्वा नयप्रमाणपथेन नयप्रमाणे उक्तस्वरूपे तयोर्मार्गेण प्रचारेण यतस्त्वं यथार्थदर्शी यथार्थोऽस्ति तथैव पश्यतीत्येवंशीलो यथार्थदर्शी विमलकेवलज्योतिषा यथावस्थितवस्तुदर्शी तीर्थान्तरशास्तारस्तु रागादिदोषकलङ्कितत्वेन तथाविधज्ञानाभावान्न यथार्थदर्शिनस्ततः कथं नाम दुर्नयपथमथने प्रगल्भन्ते ते तपस्विनः न हि स्वयमनयप्रवृत्तः परेषामनयं निषेद्धुमुद्धुरतां धत्ते इदमुक्तं भवति यथा कश्चित्सन्मार्गवेदी परोपकारदुर्ललितः पुरुषश्चौर इवावटकण्टकाद्याकीर्णं मार्गं परित्यज्य पथिकानां गुणदोषोभयविकलं दोषास्पृष्टगुणयुक्तं च मार्गमुपदर्शयति एवं जगन्नाथोऽपि दुर्नयतिरस्करणेन भव्येभ्यो नयप्रमाणमार्गं प्ररूपयतीति आस्थ इत्यस्यतेरद्यतन्यां “ शास्त्यस्तिवक्तिख्यातेरङि”त्यङि“श्वयत्यसवचपत श्वास्थवोचपप्तमि”ति अस्थादेशे स्वरादेस्तास्विति वृद्धौ रूपं मुख्यवृत्त्या च प्रमाणस्यैव प्रामाण्यं यच्चात्र नयानां प्रमाणतुल्यकक्षताख्यापनं तत्तेषामनुयोगद्वारभूततया प्रज्ञापनाङ्गत्वज्ञापनार्थं चत्वारि हि प्रवचनानुयोगमहानगरस्य द्वाराणि उपक्रमो निक्षेपो ऽनुगमो नयश्चेति एतेषां च स्वरूपमावश्यकभाष्यादिभिर्निरूपणीयम् इह तु नोच्यते ग्रन्थगौरवभयात् अत्र चैकत्र समासान्तः पथिन्शब्दः अन्यत्र चाव्युत्पन्नः पथशब्दोऽदन्त इति पथशब्दस्य द्विःप्रयोगो न दुष्यति अथ दुर्नयनयप्रमाणस्वरूपं किञ्चिन्निरूप्यते तत्रापि प्र-

थमं नयस्वरूपं तदनधिगमे दुर्नयस्वरूपस्य दुष्परिज्ञानत्वादत्र चाचार्येण प्रथमं दुर्नयनिर्देशो यथोत्तरं प्राधान्यावबोधनार्थः कृतः तत्र प्रमाणप्रतिपन्नार्थैकदेशपरामर्शी नयः अनन्तधर्माध्यासितं वस्तु स्वाभिप्रेतैकधर्मविशिष्टं नयति संवेदनकोटिमारोहयतीति नयः प्रमाणप्रवृत्तेरुत्तरकालभावी परामर्श इत्यर्थः नचाश्चानन्तानन्तधर्मत्वाद्वस्तुनस्तदेकधर्मपर्यवसितानां वक्तुरभिप्रायाणां च नयत्वात् तथा च वृद्धाः "जावइ थाव पणपहा तावइयाचे वहुन्ति नयवाया" इति। तथापि चिरन्तनाचार्यैः सर्वसंग्राहिसप्ताभिप्रायपरिकल्पनाद्वारेण सप्तनयाः प्रतिपादितास्तद्यथा नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवंभूता इति कथमेषां सर्वसंग्राहकत्वमिति चेदुच्यते अभिप्रायस्तावदर्थद्वारेण शब्दद्वारेण वा प्रवर्त्तते गत्यन्तराभावात् तत्र ये केचनार्थनिरूपणप्रवणाः प्रमात्रभिप्रायास्ते सर्वेऽप्याद्ये नयचतुष्टयेऽन्तर्भवन्ति ये च शब्दविचारचतुरास्ते शब्दादिनयत्रय इति तत्र नैगमः सत्तालक्षणं महासामान्यमवान्तरसामान्यानि च द्रव्यत्वगुणत्वकर्मत्वादीनि तथान्त्यान्विशेषान्सकलासाधारणरूपलक्षणानवान्तरविशेषांश्चापेक्षया पररूपव्यावर्त्तनक्षमान् सामान्यादत्यन्तविनिर्लुठितस्वरूपानभिप्रैति इदं च स्वतन्त्रसामान्यविशेषवादे क्षुण्णमिति न पृथक्प्रयत्नः प्रवचनप्रसिद्धनिलयनप्रस्थदृष्टान्तद्वयगम्यश्चायं संग्रहस्तु अशेषविशेषतिरोधानद्वारेण सामा-

न्यरूपतया विश्वमुपादत्ते एतच्च सामान्यैकान्तवादे प्राक्प्रपञ्चितं व्यवहारस्त्वेवमाह यथा लोकग्राह्यमेव वस्त्वस्तु किमनया अदृष्टाव्यवह्रियमाणवस्तुपरिकल्पनकष्टपिष्टिकया यदेव च लोकव्यवहारपथमवतरति तस्यैवानुग्राहकं प्रमाणमुपलभ्यते नेतरस्य न हि सामान्यमनादिनिधनमेकं संग्रहाभिमतं प्रमाणभूमिस्तथानुभवाभावात् सर्वस्य सर्वदर्शित्वप्रसङ्गाच्च नापि विशेषाः परमाणुलक्षणाः क्षणक्षयिणः प्रमाणगोचरास्तथाप्रवृत्तेरभावात् तस्मादिदमेव निखिललोकाबाधितं प्रमाणप्रसिद्धं कियत्कालभावि स्थूलतामाबिभ्राणमुदकाद्याहरणाद्यर्थक्रियानिर्वर्तनक्षमं वस्तुरूपं पारमार्थिकं पूर्वोत्तरकालभावि तत्पर्यायपर्यालोचना पुनरज्यायसी तत्र प्रमाणप्रसराभावात् प्रमाणमन्तरेण विचारस्य कर्तुमशक्यत्वात् अवस्तुत्वाच्च तेषां किं तद्गोचरपर्यालोचनेन तथा हि पूर्वोत्तरकालभाविनो द्रव्यविवर्त्ताः क्षणक्षयिपरमाणुलक्षणा वा विशेषा न कथं चन लोकव्यवहारमुपरचयन्ति तन्न ते वस्तुरूपाः लोकव्यवहारोपयोगिनामेव वस्तुत्वादत एव पन्थाः गच्छति कुण्डिका स्रवति गिरिर्दह्यते मञ्चाः क्रोशन्तीत्यादिव्यवहाराणां प्रामाण्यं तथा च वाचक मुख्यः "लौकिकसम उपचारप्रायो विस्तृतार्थो व्यवहार"इति ऋजुसूत्रः पुनरिदं मन्यते वर्तमानक्षणविवर्त्त्येव वस्तुरूपं नातीतमनागतं च अतीतस्य विनष्टत्वादनागतस्यालब्धात्मलाभत्वात्खरविषाण-

द्भ्योऽविशिष्यमाणतया सकलशक्तिविरहरूपत्वा-न्नार्थक्रियानिर्वर्तनक्षमत्वं तदभावाच्च न वस्तुत्वं यदेवार्थक्रियाकारि तदेव परमार्थसदिति वचनात् वर्तमानक्षणालिङ्गितं पुनर्वस्तुरूपं समस्तार्थक्रियासु व्याप्रियत इति तदेव पारमार्थिकं तदपि च निरंश-मभ्युपगन्तव्यम् अंशव्याप्तेर्युक्तिरिक्तत्वात् एकस्यानेक-स्वभावतामन्तरेणानेकस्वावयवव्यापनायोगात् अनेकस्व-भावतैवास्त्विति चेन्न विरोधव्याघ्राघ्रातत्वात् तथा हि यद्येकः स्वभावः कथमनेकोऽनेकश्चेत्कथमेक एकानेकयोः परस्परपरिहारेणावस्थानात्तस्मात्स्वरू-पनिमग्नाः परमाणव एव परस्परोपसर्पणद्वारेण कथं-चिन्निचयरूपतामापन्ना निखिलकार्येषु व्यापारभाज इति त एव स्वलक्षणं न स्थूलतां धारयत् पारमार्थि-कमिति एवमस्याभिप्रायेण यदेव स्वकीयं तदेव वस्तु न परकीयम् अनुपयोगित्वादितिशब्दस्तु रूढितो याव-न्तो ध्वनयः कस्मिंश्चिदर्थे प्रवर्तन्ते यथेन्द्रशक्रपुरन्द-रादयः सुरपतौ तेषां सर्वेषामप्येकमर्थमभिप्रैति किल प्रतीतिवशाद्यथाशब्दाव्यतिरेकोऽर्थस्य प्रति-पाद्यते तथैव तस्यैकत्वं वा प्रतिपादनीयं न चेन्द्र-शक्रपुरन्दरादयः पर्यायशब्दा विभिन्नार्थवाचितया कदाचन प्रतीयन्ते तेभ्यः सर्वदैकाकारपरामर्शोत्प-त्तेरस्खलितवृत्तितया तथैव व्यवहारदर्शनात् तस्मा-देक एव पर्यायशब्दानामर्थ इति शब्द्यते आहूयतेऽ-नेनाभिप्रायेणार्थ इति निरुक्तादेकार्थप्रतिपादना-

भिप्रायेणैव पर्यायध्वनीनां प्रयोगात् यथा चायं पर्यायशब्दानामेकमर्थमभिप्रैति तथा तटस्तटी तट-मिति विरुद्धलिङ्गलक्षणधर्माभिसंबन्धाद्वस्तुनो भेदं चाभिधत्ते न हि विरुद्धधर्मकृतं भेदमनुभवतो वस्तुनो विरुद्धधर्मायोगो युक्तः एवं संख्याकालकारकपुरु-षादिभेदादपि भेदोऽभ्युपगन्तव्यः तत्र संख्या एक-त्वादिः कालोऽतीतादिः कारकं कर्त्रादिः पुरुषः प्रथमपुरुषादिः समभिरूढस्तु पर्यायशब्दानां प्रवि-भक्तमेवार्थमभिमन्यते तद्यथा इन्दनादिन्द्रः परमै-श्वर्यमिन्द्रशब्दवाच्यं परमार्थतस्तद्वत्यर्थे अतद्वति पु-नरुपचारतो न वा कश्चित् तद्वान् सर्वशब्दानां पर-स्परविभक्तार्थप्रतिपादिततया आश्रयाश्रयिभावेन प्रवृ-त्त्यसिद्धेः एवं शकनाच्छक्रः पूर्दारणात्पुरन्दर इत्यादि-भिन्नार्थत्वं सर्वशब्दानां दर्शयति प्रमाणयति च शब्दा अपि भिन्नार्थाः प्रविभक्तव्युत्पत्तिनिमित्तकत्वादिह ये ये प्रविभक्तव्युत्पत्तिनिमित्तकास्ते ते भिन्नार्थाः यथेन्द्रपशुपुरुषशब्दा विभिन्नव्युत्पत्तिनिमित्तकाश्च पर्यायशब्दा अपि अतो भिन्नार्था इति एवं-भूतः पुनरेवं भाषते यस्मिन्नर्थे शब्दो व्युत्पाद्यते स व्युत्पत्तिनिमित्तमर्थो यदैव प्रवर्तते तदैव तं शब्दं प्रव-र्तमानमभिप्रैति न सामान्येन यथोदकाहरणवेलायां योषिदादिमस्तकारूढो विशिष्टचेष्टावानेव घटोऽभि-धीयते न शेषो घटशब्दव्युत्पत्तिनिमित्तशून्यत्वात् प-टादिवदिति अतीतां भाविनीं वा चेष्टामङ्गीकृत्य सा-

मान्येनैवोच्यत इति चेन्न तयोर्विनष्टानुत्पन्नतया शशविषाणकल्पत्वात् तथापि तद्द्वारेण शब्दप्रवर्तने सर्वत्र प्रवर्तयितव्यो विशेषाभावात् किं च यद्यतीतवत्स्र्यच्चेष्टापेक्षया घटशब्दोऽचेष्टावत्यपि प्रयुज्येत कपालम्हृत्पिण्डादावपि तत्प्रवर्तनं दुर्निवारं स्याद्विशेषाभावात् तस्माद्यत्र क्षणे व्युत्पत्तिनिमित्तमविकलमस्ति तस्मिन्नेव सोऽर्थस्तच्छब्दवाच्य इति अत्र संग्रहश्लोकाः ।

अन्यदेव हि सामान्यमभिन्नं ज्ञानकारणं ।
विशेषोऽप्यन्य एवेति मन्यते नैगमो नयः ॥१॥
सद्रूपतानतिक्रान्तस्वस्वभावमिदं जगत् ।
सत्तारूपतया सर्वं संगृह्णन् संग्रहो मतः ॥ २ ॥
व्यवहारस्तु तामेव प्रतिवस्तुव्यवस्थिताम् ।
तथैव दृश्यमानत्वाद्व्यापारयति देहिनः ॥ ३ ॥
तत्रर्जुसूत्रनीतिः स्यान्छुद्धपर्यायसंश्रिता ।
नश्वरस्यैव भावस्य भावात्स्थितिवियोगतः ॥४॥
विरोधलिङ्गसंख्यादिभेदाद्भिन्नस्वभावताम् ।
तस्यैव मन्यमानोऽयं शब्दः प्रत्यवतिष्ठते ॥ ५ ॥
तथाविधस्य तस्यापि वस्तुनः क्षणवर्त्तिनः ।
ब्रूते समभिरूढस्तु संज्ञाभेदेन भिन्नताम् ॥ ६ ॥
एकस्यापि ध्वनेर्वाच्यं सदा तन्नोपपद्यते ।
क्रियाभेदेन भिन्नत्वादेवंभूतोऽभिमन्यते ॥ ७ ॥

अत एव च परामर्शा अभिप्रेतधर्मावधारणात्मकतया शेषधर्मतिरस्कारेण प्रवर्तमाना दुर्नयसंज्ञामश्नुवते तद्बलप्रभावितसत्ताका हि खल्वेते प-

रप्रवादास्तथा हि नैगमनयदर्शनानुसारिणौ नैयायिकवैशेषिकौ संग्रहाभिप्रायप्रवृत्ताः सर्वेऽप्यद्वैतवादाः सांख्यदर्शनं च व्यवहारनयानुपाति प्रायश्चार्वाकदर्शनम् ऋजुसूत्राकूतप्रवृत्तबुद्धयस्ताथागताः शब्दादिनयावलम्बिनो वैयाकरणादयः उक्तं च सोदाहरणं नयदुर्नयस्वरूपं श्रीदेवसूरिपादैः तथा च तद्ग्रन्थः "नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः स प्रतिपत्तुरभिप्रायविशेषो नय" इति स्वाभिप्रेतादंशादितरांशापलापी पुनर्नयाभासः स व्याससमासाभ्यां द्विप्रकारः व्यासतोऽनेकविकल्पः समासतस्तु द्विभेदो द्रव्यार्थिकः पर्यायार्थिकश्च आद्यो नैगमसंग्रहव्यवहारभेदात् त्रेधा धर्मयोर्धर्मिणोर्धर्मधर्मिणोश्च प्रधानोपसर्जनभावेन यद्विवक्षणं स नैकगमो नैगमः सच्चैतन्यमात्मनीति धर्मयोर्वस्तुपर्यायवद्द्रव्यमिति धर्मिणोः क्षणमेकं सुखी विषयासक्तजीव इति धर्मधर्मिणो धर्मद्वयादीनामैकान्तिकपार्थक्याभिसंधिर्नैगमाभासः यथात्मनि सत्त्वचैतन्ये परस्परमत्यन्तपृथग्भूते सामान्यमात्रग्राही परामर्शः संग्रहः अयमुभयविकल्पः परोऽपरश्च अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परः संग्रहः विश्वमेकं सदविशेषादिति यथा सत्ताद्वैतं स्वीकुर्वाणः सकलविशेषान्निराचक्षाणस्तदाभासः यथा सत्तैव तत्त्वं ततः पृथग्भूतानां विशेषाणामदर्शनात् द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामव-

लम्बमानः पुनरपसंग्रहः धर्माधर्माकाशकालपुद्गलद्रव्याणामैक्यं द्रव्यत्त्वाभेदादित्यादिर्यथा तद्द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान्निह्नुवानस्तदाभासः यथा द्रव्यत्वमेव तत्त्वं ततोऽर्थान्तरभूतानां द्रव्याणामनुपलब्धेः संग्रहेण गोचरीकृतानामर्थानां विधिपूर्वमवहरणं येनाभिसन्धिना क्रियते स व्यवहारः यथा यत्सत्तद्द्रव्यं पर्यायो वेत्यादिः यः पुनरपारमार्थिकं द्रव्यपर्यायप्रविभागमभिप्रैति स व्यवहाराभासः यथा चार्वाकदर्शनं पर्यायार्थिकस्चतुर्द्धा ऋजुसूत्रः शब्दः समभिरूढ एवंभूतश्च ऋजुवर्तमानक्षणस्थायिपर्यायमात्रप्राधान्यतः सूत्रयन्नभिप्रायः ऋजुसूत्रः यथा सुखविवर्तः संप्रत्यस्तीत्यादिः सर्वथा द्रव्यापलापी पुनस्तदाभास यथा बभूव भवति भविष्यति सुमेरुरित्यादिः तद्भेदेन तस्य तमेव समर्थयमानो यथा तथागतमतं कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः तदाभासः यथा बभूव भवति भविष्यति सुमेरुरित्यादयो भिन्नकालाः शब्दा भिन्नकालमेवाभिदधति भिन्नकालशब्दत्वात्ताद्दक्सिद्धान्यशब्दवदित्यादिः पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन्समभिरूढः इन्दनादिन्द्रः शकनाच्छक्रः पूर्दारणात् पुरन्दर इत्यादिषु यथा पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणस्तदाभासः यथेन्द्रः शक्रः पुरन्दर इत्यादयः शब्दा भिन्नाभिधेया एव भिन्नशब्दत्वात्करिकुरङ्गशब्दवदित्यादिः शब्दानां स्वप्रवृत्तिनिमि-

त्तभूतक्रियाविष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्नेवंभूतः यथेन्दनमनुभवन्निन्द्रः शकनक्रियापरिणतः शक्रः पूर्दारणप्रवृत्तः पुरन्दर इत्युच्यते क्रियानाविष्टं वस्तु शब्दो वाच्यतया प्रतिक्षिपंस्तु तदाभासः यथा विशिष्टचेष्टाशून्यं घटाख्यं वस्तु नैव घटशब्दवाच्यं घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात्पटवदित्यादिः एतेषु चत्वारः प्रथमेऽर्थनिरूपणप्रवणत्वादर्थनयाः शेषास्तु त्रयः शब्दवाच्यार्थगोचरतया शब्दनयाः पूर्वः-पूर्वो नयः प्रचुरगोचरः परः परस्तु परिमितविषयः सन्मात्रगोचरात्संग्रहान्नैगमो भावाभावभूमिकत्वाद् भूमविषयः सद्विशेषप्रकाशकाद् व्यवहारतः संग्रहः समस्तसत्समूहोपदर्शकत्वाद्बहुविषयः वर्तमानविषयादृजुसूत्राद्व्यवहारस्त्रिकालविषयावलम्बित्वादनल्पार्थः कालादिभेदेन भिन्नार्थोपदर्शिनः शब्दादृजुसूत्रस्तद्विपरीतवेदकत्वान्महार्थः प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढाच्छब्दस्तद्विपर्ययानुयायित्वात्प्रभूतविषयः प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवंभूतात्समभिरूढस्तदन्यथास्थापकत्वान्महागोचरः नयवाक्यमपि स्वविषये वर्तमानं विधिप्रतिषेधाभ्यां सप्तभङ्गीमनुव्रजतीति विशेषार्थिनां नयानां नामान्वर्थविशेषलक्षणाक्षेपपरिहारादिचर्चस्तु भाष्यमहोदधिगन्धहस्तिटीकान्यायावतारादिग्रन्थेभ्यो निरीक्षणीयः प्रमाणं तु सम्यगर्थनिर्णयलक्षणं सर्वनयात्मकं स्याच्छब्दलाञ्छितानां नयानामेव

प्रमाणव्यपदेशभाक्त्वात् तथा च श्रीविमलनाथस्तवे समन्तभद्रः ।

नयास्तव स्यात्पदलाञ्छना इमे
रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो
भवन्तमार्याः प्रणता हितैषिणः ॥

इति तच्च द्विविधं प्रत्यक्षं परोक्षं तत्र प्रत्यक्षं द्विधा सांव्यवहारिकं पारमार्थिकं च सांव्यवहारिकं द्विविधमिन्द्रियानिन्द्रियनिमित्तभेदात्तद्द्वितयमवग्रहेहावायधारणाभेदादेकैकशश्चतुर्विकल्पम् अवग्रहादीनां स्वरूपं सुप्रतीतत्वान्न प्रतन्यते पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षं तद्द्विविधं क्षायोपशमिकं क्षायिकं च आद्यम् अवधिमनःपर्यायभेदाद् द्विधा क्षायिकं तु केवलज्ञानमिति परोक्षं च स्मृतिप्रत्यभिज्ञानोहाऽनुमानागमभेदात्पञ्चप्रकारं तत्र संस्कारप्रबोधसम्भूतमनुभूतार्थविषयं तदित्याकारं वेदनं स्मृतिः तत्तीर्थकरबिम्बमिति यथा अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादिगोचरं संकलनात्मकं ज्ञानं प्रत्यभिज्ञानं यथा तज्जातीय एवायं गोपिण्डो गोसदृशो गवयः स एवायं जिनदत्त इत्यादिः उपलम्भानुपलम्भसम्भवं त्रिकालीकलितसाध्यसाधनसम्बन्धाद्यालम्बनमिदमस्मिन् सत्येव भवतीत्याद्याकारं संवेदनमूहस्तर्कापरपर्यायः यथा यावान् कश्चिद्धूमः स सर्वो वह्नौ सत्येव भवतीति तस्मिन्नसत्यसौ न भवत्येवेति वा अनुमानं द्विधा

स्वार्थं परार्थं च तत्रान्यथानुपपत्त्येकलक्षणहेतुग्रहण संबन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थं पक्षहेतुवचनात्मकं परार्थमनुमानमुपचारात् आप्तवचनादाविर्भूतमर्थसंवेदनमागमः उपचारादाप्तवचनं चेति स्मृत्यादीनां च विशेषस्वरूपं स्याद्वादरत्नाकरात् साक्षेपपरिहारं ज्ञेयमिति प्रमाणान्तराणां पुनरर्थापत्त्युपमानसम्भवप्रातिभैतिह्यादीनामत्रैवान्तर्भावः सन्निकर्षादीनां तु जडत्वादेव न प्रामाण्यमिति तदेवंविधेन नयप्रमाणोपन्यासेन दुर्नयमार्गस्त्वया खिलीकृत इति काव्यार्थः ॥२८॥

इदानीं सप्तद्वीपसमुद्रमात्रो लोक इति वावदूकलोकानां तन्मात्रलोके परिमितानामेव सत्त्वानां सम्भवात् परिमितात्मवादिनां दोषदर्शनमुखेन भगवत्प्रणीतं जीवानन्त्यवादं निर्दोषतयाऽभिष्टुवन्नाह।

**मुक्तोऽपि वाऽभ्येतु भवं भवो वा**
**भवस्थशून्योऽस्तु मितात्मवादे।**
**षड्जीवकायं त्वमनन्तसंख्य-**
**माख्यस्तथा नाथ यथा न दोषः॥२९॥**

मितात्मवादे संख्यातानामात्मनामभ्युपगमे दूषणद्वयमुपतिष्ठते तत्क्रमेण दर्शयति मुक्तोऽपि वाऽभ्येतु भवमिति मुक्तो निर्वृतिप्राप्तः सोऽपि वा ऽपिविस्मये वा शब्द उत्तरदोषापेक्षया समुच्चयार्थः यथा

देवो वा दानवो वेति भवमभ्येतु संसारमभ्यागच्छतु इत्येको दोषप्रसङ्गः भवो वा भवस्थशून्योऽस्तु भवः संसारः स वा भवस्थशून्यः संसारिजीवैर्विरहितो ऽस्तु भवतु इति द्वितीयो दोषप्रसङ्गः इदमत्राकूतं यदि परिमिता एवात्मानो मन्यन्ते तदा तत्त्वज्ञानाभ्यासप्रकर्षादिक्रमेणापवर्गं गच्छत्सु तेषु संभाव्यते खलु कश्चित्कालो यत्र तेषां निर्वृतिकालस्यानादिनिधनत्त्वादात्मनां च परिमितत्वात् संसारस्य रिक्तता भवन्ती केन वार्यतां समुन्नीयते हि प्रतिनियतसलिलपटलपरिपूरिते सरसि पवनतपनातपनजनोदञ्चनादिना कालान्तरे रिक्तता न चायमर्थः प्रामाणिकस्य कस्यचित्प्रसिद्धः संसारस्य स्वरूपहानिप्रसङ्गात् तत्स्वरूपं ह्येतदेव कर्मवशवर्त्तिनः प्राणिनः संसरन्ति समसार्षुः संसरिष्यन्ति चेति सर्वेषां च निर्वृतत्वे संसारस्य वा रिक्तत्वं हठादभ्युपगन्तव्यं मुक्तैर्वा पुनर्भव आगन्तव्यं न च क्षीणकर्मणां भवाधिकारः।

दग्धे बीजे यथा ऽत्यन्तं प्रादुर्भवति नाङ्कुरः।
कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः ॥१॥

इति वचनात् आह च पतञ्जलिः "सति मूले तद्विपाको जात्यायुर्भोगा" इति एतट्टीका "च सत्सु क्लेशेषु कर्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलः यथा तुषावनद्धाः शालितण्डुला अदग्धबीजभावाः प्ररोहणसमर्था भवन्ति नापनीततुषा दग्धबीजभावा तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति

नापनीतक्लेशो न दग्धबीजभावो वेति" स च विपाक-स्त्रिविधो जातिरायुर्भोग इति अक्षपादोऽप्याह "न प्रवृत्तिः प्रतिसंधानाय हीनक्लेशस्ये" ति एवं विभङ्गज्ञानिशिवराजर्षिमतानुसारिणो दूषयित्वोत्तरार्द्धेन भगवदुपज्ञमपरिमितात्मवादं निर्दोषतया स्तौति षड्जीवेत्यादि त्वं तु हे नाथ अनन्तसंख्यम् अनन्ताख्यसंख्याविशेषयुक्तः षड्जीवकायम् अजीवन् जीवन्ति जीविष्यन्ति चेति जीवा इन्द्रियादिज्ञाना-दिद्रव्यभावप्राणधारणयुक्तास्तेषां "संघे चानूर्ध्वे" इति चिनोतेर्घञि आदेश्च कत्वे कायः समूहो जीवकायः पृथिव्यादिषण्णां जीवकायानां समाहारः षड्जीव-कायं पात्रादिदर्शनान्नपुंसकत्वम् अथवा षण्णां जीवा-नां कायः प्रत्येकं संघातः षड्जीवकायस्तं षड्जीव-कायं पृथिव्यप्तेजोवायुवनस्पतित्रसलक्षणषड्जीवनि-कायं तथा तेन प्रकारेण आख्यः मर्यादया प्ररूपि-तवान् यथा येन प्रकारेण न दोषो दूषणमिति जात्यपेक्षमेकवचनं प्रागुक्तदोषद्वयजातीया अन्येऽपि दोषा यथा न प्रादुःष्यन्ति तथा त्वं जीवानन्त्यमुपदि-ष्टवानित्यर्थः आख्य इति आङ्पूर्वस्य ख्यातेरङि सिद्धिः त्वमित्येकवचनं चेदं ज्ञापयति यज्जगद्गुरोरेवैकस्येदृक्प्ररूपणसामर्थ्यं न तीर्थान्तरशास्तृणामिति पृथि-व्यादीनां पुनर्जीवत्वमित्थं साधनीयं यथा सात्मिका विद्रुमशिलादिरूपा पृथिवी छेदे समानधातूत्थानाद्द दर्भाङ्कुरवत् भौममम्भोऽपि सात्मकं क्षतभूसजाती-

यस्य स्वभावस्य सम्भवात् शालूरवत् अन्तरिक्षमपि सात्मकम् अभ्रादिविकारे स्वतःसम्भूय पातात् मत्स्यादिवत् तेजोऽपि सात्मकम् आहारोपादानेन वृद्ध्यादिविकारोपलम्भात् पुरुषाङ्गवत् वायुरपि सात्मकः अपरप्रेरितत्वे तिर्यग्गतिमत्वाद्गोवत् वनस्पतिरपि सात्मकः छेदादिभिर्म्लान्यादिदर्शनात् पुरुषाङ्गवत् केषांचित् स्वाङ्गोपाङ्गोपश्लेषादिविकाराच्च अपकर्षतश्चैतन्याद्वा सर्वेषां सात्मकत्वसिद्धिराप्तवचनाच्च त्रसेषु च कृमिपिपीलिकाभ्रमरमनुष्यादिषु न केषांचित्सात्मकत्वे विगानमिति यथा च भगवदुपज्ञे जीवानन्त्ये न दोषस्तथा दिग्मात्रं भाव्यते भगवन्मते हि षण्णां जीवनिकायानामेतदल्पबहुत्वं सर्वस्तोकास्त्रसकायिनस्तेभ्योऽसंख्यातगुणास्तेजःकायिकास्तेभ्यो विशेषाधिका पृथिवीकायिकास्तेभ्यो विशेषाधिका अप्कायिकास्तेभ्यो विशेषाधिका वायुकायिकास्तेभ्योऽनन्तगुणा वनस्पतिकायिकास्ते च व्यावहारिका अव्यावहारिकाश्च ।

गोलाय असंगिज्जा असंखनिग्गोयगोलउभणिउ ।
इक्किक्कंमि निगोए अणन्तजीवासुणेयव्व ॥ १ ॥
सिज्झन्तिजन्तियाखलु इहसंववहारजीवरासिउ ।
इंति अणाइवणस्सइ रासीउततियातंमि ॥ २ ॥

इति वचनात् यावन्तश्च यतो गच्छन्ति मुक्तिं जीवास्तावन्तोऽनादिनिगोदवनस्पतिराशेस्तत्रागच्छन्ति न च तावता तस्य काचित्परिहाणिर्नि-

गोदजीवानन्त्यस्याक्षयत्वात् निगोदस्वरूपं च सम-यसागरादवगन्तव्यम् अनाद्यनन्तेऽपि काले ये केचिन्निर्वृता निर्वान्ति निर्वास्यन्ति च ते निगोदानामनन्तभागेऽपि न वर्त्तन्ते नावर्त्तिषत न वर्त्स्यन्ति ततश्च कथं मुक्तानां भवागमनप्रसङ्गः कथं संसारस्य रिक्तताप्रसक्तिरिति अभिप्रेतं चैतदन्ययूथ्यानामपि यथा चोक्तं वार्त्तिककारेण।

अत एव विशुद्धात्सु मुच्यमानेषु सन्ततम्।
ब्रह्माण्डलोकजीवानामनन्तत्वादशून्यता ॥१॥
अन्त्यन्यूनातिरिक्तत्वै र्युज्यते परिमाणवत्।
वस्तुन्यपरिमेये तु नूनं तेषामसम्भवः ॥ २ ॥
इति काव्यार्थः ॥ २८ ॥

अधुना परदर्शनानां परस्परविरुद्धार्थसमर्थकतया मत्सरित्वं प्रकाशयन् सर्वज्ञोपज्ञसिद्धान्तस्यान्योन्यानुगतसर्वनयमयतया मात्सर्याभावमाविर्भावयति।

**अन्योन्यपक्षप्रतिपक्षभावात्**
**यथा परे मत्सरिणः प्रवादाः।**
**नयानशेषानविशेषमिच्छन्**
**न पक्षपाती समयस्तथा ते ॥३०॥**

प्रकर्षेणोद्यते प्रतिपाद्यते स्वाभ्युपगतोऽर्थो यैरिति प्रवादाः यथा येन प्रकारेण परे भवच्छासनादन्ये प्रवादा दर्शनानि मत्सरिणः अतिशायने मत्वर्थीयविधानात्सातिशयासहनताशालिनः क्रोधकषा-

यकलुषितान्तःकरणाः सन्तः पक्षपातिनः इतरपक्षतिरस्कारेण स्वकक्षीकृतपक्षव्यवस्थापनप्रवणा वर्त्तन्ते कस्माद्धेतोर्मत्सरिण इत्याह अन्योन्यपक्षप्रतिपक्षभावात् पक्ष्यते व्यक्तीक्रियते साध्यधर्मवैशिष्ट्येन हेत्वादिभिरिति पक्षः कक्षीकृतधर्मप्रतिष्ठापनाय साधनोपन्यासस्तस्य प्रतिकूलः पक्षः प्रतिपक्षः पक्षस्य प्रतिपक्षो विरोधी पक्षस्तस्य भावः पक्षप्रतिपक्षभावः अन्योन्यं परस्परं यः पक्षप्रतिपक्षत्वम् अन्योन्यपक्षप्रतिपक्षभावस्तस्मात् तथा हि य एव मीमांसकानां नित्यः शब्द इति पक्षः स एव च सौगतानां प्रतिपक्षस्तन्मते शब्दस्यानित्यत्त्वात् य एव सौगतानाम् अनित्यः शब्द इति पक्षः स एव मीमांसकानां प्रतिपक्ष एवं सर्वप्रयोगेषु योज्यं तथा तेन प्रकारेण ते तव सम्यक् एति गच्छति शब्दोऽर्थमनेनेति "पुन्नाम्नि घे" समयः संकेतो यद्वा सम्यगवैपरीत्येनेयन्ते ज्ञायन्ते जीवाजीवादयोऽर्था अनेनेति समयः सिद्धान्तोऽथ वा सम्यगयन्ते गच्छन्ति जीवादयः पदार्थाः स्वस्मिन् रूपे प्रतिष्ठां प्राप्नुवन्ति अस्मिन्निति समय आगमः न पक्षपाती नैकपक्षानुरागी पक्षपातित्वस्य कारणं मत्सरित्वं परप्रवादेषूक्तं त्वत्समयस्य च मत्सरित्वाभावा न्न पक्षपातित्वं पक्षपातित्वं हि मत्सरित्वेन व्याप्तं व्यापकं च निवर्त्तमानं व्याप्यमपि निवर्तयतीति मत्सरित्वे निवर्तमाने पक्षपातित्त्वमपि निवर्त्तत

इति वाच्यवाचकभावलक्षणे सम्बन्धे षष्ठी सूत्रापेक्षया गणधरकर्तृकत्वेऽपि समयस्यार्थापेक्षया भगवत्कर्तृकत्वाद्वाच्यवाचकभावो न विरुध्यते "अत्थं भासइ अरहा सुत्तं गंथन्ति गणहरा णिउणं" ति वचनात् अथ वा उत्पादव्ययध्रौव्यप्रपञ्चः समयस्तेषां च भगवता साक्षान्मातृकापदरूपतयाभिधानात् तथा चार्षम् "उप्पन्ने वा विगमे वा धुवेति वा" इत्यदोषः मत्सरित्वाभावमेव विशेषणद्वारेण समर्थयति नयानशेषानविशेषमिच्छन् इति अशेषान् समस्तान् नयान् नैगमादीन् अविशेषं निर्विशेषं यथा भवत्येवमिच्छन्नाकाङ्क्षन् नयात्मकत्वादनेकान्तवादस्य यथा विशकलितानां मुक्तामणीनामेकसूत्रानुस्यूतानां हारव्यपदेश एवं पृथगभिसन्धीनां नयानां स्याद्वादलक्षणैकसूत्रप्रोतानां श्रुताख्यप्रमाणव्यपदेश इति ननु प्रत्येकं नयानां विरुद्धत्वे कथं समुदितानां निर्विरोधिता उच्यते यथा हि समीचीनं मध्यस्थं न्यायनिर्णेतारमासाद्य परस्परं विवदमाना अपि वादिनो विवादाद्विरमन्ति एवं नया अन्योन्यं वैरायमाणा अपि सार्वज्ञं शासनमुपेत्य स्याच्छब्दप्रयोगोपशमितविप्रतिपत्तयः सन्तः परस्परमत्यन्तसुहृद्भूयावतिष्ठन्ते एवं च सर्वनयात्मकत्वे भगवत्समयस्य सर्वदर्शनमयत्वमविरुद्धमेव नयरूपत्वाद्दर्शनानां न च वाच्यं तर्हि भगवत्समयस्तेषु कथं नोपलभ्यत इति समुद्रस्य सर्वसरिन्मयत्वे-

ऽपि विभक्तासु तास्वनुपलम्भात् तथा च वक्तृवचनयो-रैक्यमध्यवस्य श्रीसिद्धसेनदिवाकरपादाः ।

उदधाविव सर्वसिन्धवः
समुदीर्णास्त्वयि नाथ दृष्टयः ।
न च तासु भवान्प्रदृश्यते
प्रविभक्तासु सरित्स्विवोदधिः ॥१॥

अन्ये त्वेवमाचक्षते यथा अन्योन्यपक्षप्रतिपक्षभावात्परे प्रवादा मत्सरिणस्तथा तव समयः सर्वनयान्मध्यस्थतयाऽङ्गीकुर्वाणो न मत्सरी यतः कथंभूतः पक्षपाती पक्षमेकपक्षाभिनिवेशं पातयति तिरस्करोतीति पक्षपाती अत्र च व्याख्याने न मत्सरीति विधेयपदं पूर्वस्मिंश्च पक्षपातीति विशेषः अत्र च क्लिष्टाक्लिष्टव्याख्यानविवेको विवेकिभिः स्वयं कार्य इति काव्यार्थः ॥३०॥

इत्थंकारं कतिपयपदार्थविवेचनद्वारेण स्वामिनो यथार्थवादाख्यं गुणमभिष्टुत्य समग्रवचनातिशयव्यावर्णने स्वस्यासामर्थ्यं दृष्टान्तपूर्वकमुपदर्शयन् औद्धत्यपरिहाराय भङ्ग्यन्तरतिरोहितस्वाभिधानं प्रकाशयन्निगमनमाह ।

**वाग्वैभवं ते निखिलं विवेक्तु-**
**माशास्महे चेन्महनीयमुख्य ।**
**लङ्घेम जङ्घालतया समुद्रं**
**वहेम चन्द्रद्युतिपानतृष्णाम् ॥३१॥**

विभव एव वैभवं प्रज्ञादित्वात्स्वार्थेऽण् विभोर्भावः कर्म चेति वा वैभवं वाचां वैभवं वाग्वैभवं वचनसंपत्प्रकर्षं विभोर्भाव इति पक्षे तु सर्वनयव्यापकत्वं विभुशब्दस्य व्यापकपर्यायतया रूढत्वात् ते तव संबन्धिनं निखिलं कृत्स्नं विवेक्तुं विचारयितुं चेद्यदि वयमाशास्महे इच्छामो हे महनीयमुख्य महनीयाः पूज्याः पञ्चपरमेष्ठिनस्तेषु मुख्यः प्रधानभूतः आद्यत्वात्तस्य सम्बोधनं ननु सिद्धेभ्यो हीनगुणत्वादर्हतां कथं वागतिशयशालिनामपि तेषां मुख्यत्वं न च हीनगुणत्वमसिद्धं प्रव्रज्यावसरे सिद्धेभ्यस्तेषां नमस्कारकरणश्रवणात् "काउण नमक्कारं सिद्धाणमभिग्गहन्तु सो गिराहे" इति श्रुतकेवलिवचनात् मैवम् अर्हदुपदेशेनैव सिद्धानामपि परिज्ञानात् तथा चार्षम् "अरहन्तु वएसेणं सिद्धानज्जंति तेण अरिहाई" इति ततः सिद्धं भगवत एव मुख्यत्वं यदि तव वाग्वैभवं निखिलं विवेक्तुमाशास्महे ततः किमित्याह लङ्घेमेत्यादि तदा इत्यध्याहार्यं तदा जङ्घालतया जाङ्घिकतया वेगवत्तया समुद्रं लङ्घेम किल समुद्रमिवातिक्रामामस्तथा वहेम धारयेम चन्द्रद्युतीनां चन्द्रमरीचीनां पानं चन्द्रद्युतिपानं तत्र तृष्णा तर्षोऽभिलाष इति यावत् चन्द्रद्युतिपानतृष्णा उभयत्रापि सम्भावने सप्तमी यथा कश्चिच्चरणचङ्क्रमणवेगवत्तया यानपात्राद्यन्तरेणापि समुद्रं लङ्घितुमीहते यथा कश्चिच्चन्द्रमरीचीरमृतमयीः

श्रुत्वा चुलुकादिना पातुमिच्छति न चैतद्द्वयमपि शक्यसाधनं तथा न्यक्षेण भवदीयवाग्वैभववर्णनाकाङ्क्षाऽपि अशक्यारम्भप्रवृत्तितुल्या आस्तां तावत्तावकीनवचनविभवानां सामास्त्येन विवेचनविधानं तद्विषयाकाङ्क्षापि महत्साहसमिति भावार्थः अथ वा लघु शोषणे इति धातोर्लङ्घेम शोषयेम समुद्रं जङ्घालतया ध्रुति सहसाऽतिक्रमणार्थलङ्घेस्तु प्रयोगे दुर्लभं परस्मैपदम् अनित्यं वा आत्मनेपदमिति अत्र चौद्धत्यपरिहारेऽधिकृतेऽपि यदाशास्महे इत्यात्मनि बहुवचनमाचार्यः प्रयुक्तवांस्तदिति सूचयति यद्विद्यन्ते जगति मत्सदृशा मन्दमेधसो भूयांसः स्तोतार इति बहुवचनमात्रेण न खल्वहंकारविकारस्तोतरि प्रभौ शङ्कनीयः प्रत्युत निरभिमानताप्रासादोपरिपताकारोप एवावधारणीय इति काव्यार्थः । एष्वेकत्रिंशतिवृत्तेषूपजातिच्छन्दः॥ ३१॥

एवं विप्रतारकैः परतीर्थिकैर्व्यामोहमये तमसि निमज्जितस्य जगतोऽभ्युद्धरणेऽव्यभिचारिवचनतासाध्येनान्ययोगव्यवच्छेदेन भगवत एव सामर्थ्यं दर्शयन् तदुपास्तिविन्यस्तमानसानां पुरुषाणामौचितीचतुरतां प्रतिपादयति ।

इदं तत्त्वातत्त्वव्यति-
करकरालेऽन्धतमसे
जगन्मायाकारैरिव
हतपरैर्हा विनिहितम् ।

तदुद्धर्त्तुं शक्तो नियत-
मविसंवादिवचन-
स्त्वमेवातस्त्रातस्त्वयि
कृतसपर्याः कृतधियः ॥ ३२ ॥

इदं प्रत्यक्षोपलभ्यमानं जगद्विश्वमुपचाराज् जगद्वर्ती जनो हतपरैर्हता अधमा ये परे तीर्थान्तरीया हतपरे तैर्मायाकारैरिवेन्द्रजालिकैरिव शांबरीयप्रयोगनिपुणैरिवेति यावत् अन्धतमसे निविडान्धकारे हा इति खेदे विनिहितं विशेषेण निहितं स्थापितं पातितमित्यर्थः अन्धं करोतीत्यन्धयति अन्धयतीत्यन्धं तच्च तत्तमश्चेत्यन्धतमसं "समवान्धतमस" इत्यप्रत्ययस्तस्मिन्नन्धतमसे कथंभूतेऽन्धतमस इति द्रव्यान्धकारव्यवच्छेदार्थमाह तत्वातत्वव्यतिकरकराले तत्वं चातत्वं च तत्वातत्वे तयोर्व्यतिकरो व्यतिकीर्णता स्वभावविनिमयस्तत्वातत्वव्यतिकरस्तेनकराले भयंकरे यत्रान्धतमसे तत्वेऽतत्वाभिनिवेशोऽतत्वे च तत्वाभिनिवेश इत्येवं रूपो व्यतिकरः संजायत इत्यर्थः अनेन च विशेषणेन परमार्थतो मिथ्यात्वं मोहनीयमेवान्धतमसं तस्यैवेदृक्षलक्षणत्वात् तथा च ग्रन्थान्तरे प्रस्तुतस्तुतिकारपादः

अदेवे देवबुद्धिर्या गुरुधीरगुरौ च या ।
अधर्मे धर्मबुद्धिश्च मिथ्यात्वं तद्विपर्ययात् ॥

ततोऽयमर्थो यथा किलैन्द्रजालिकास्तथाविधसुशिक्षितपरव्यामोहनकलाप्रपञ्चास्तथाविधमौषधीमन्त्रहस्तलाघवादिप्रायं किंचित्प्रयुज्य परिषज्जनं मायामये तमसि मज्जयन्ति तथा परतीर्थिकैरपि तादृक्प्रकारदुरधीतकुतर्कयुक्तीरुपदर्श्य जगदिदं व्यामोहमहान्धकारे निक्षिप्तमिति तज्जगदुद्धर्तुं मोहमहान्धकारोपप्लवात्कष्टुं नियतं निश्चितं त्वमेव नान्यः शक्तः समर्थः किमर्थमित्थमेकस्यैव भगवतः सामर्थ्यमुपवर्ण्यते इति विशेषणद्वारेण कारणमाह अविसंवादिवचनः कषच्छेदतापलक्षणपरीक्षात्रयविशुद्धत्वेन फलप्राप्तौ न विसंवदतीत्येवं शीलमविसंवादि तथाविधं वचनमुपदेशो यस्यासावविसंवादिवचनो ऽव्यभिचारिवागित्यर्थः यथा च पारमेश्वरी वाग्न विसंवादमासादयति तथा तत्र तत्र स्याद्वादसाधने दर्शितं कषादिस्वरूपं चेत्थमाचक्षते प्रावचनिकाः

पाणवहाईयाणं यावट्ठाणाणजोनुपडिसेहो ।
झाणज्झयणाईणं जोअविहीरासधम्मकसो ॥
वज्झाणुट्ठाणेणं जेण न वाहिज्जरातयंनियमा ।
संभवइयपरिशुद्धं सो पुणधम्मंमिच्छेउत्ति ॥
जीवाइभाववाउ वंधाइपसाहगोइहंतावो ।
राएहिं परिसुद्धो धम्मो धंमतणमुवेइ ॥

तीर्थान्तरीयाप्ता हि न प्रकृतपरीक्षात्रयविशुद्धा वादिन इति ते महामोहान्धतमसे एव जगत्पातयितुं समर्था न पुनस्तदुद्धर्तुम् अतः कारणात्कुतःकारणात्कुम-

तध्वान्तार्णवान्तःपतितभुवनाभ्युद्धारणासाधारणसामर्थ्यलक्षणात् हे नाथ त्रिभुवनपरित्राणप्रवीण काक्वाऽवधारणस्य गम्यमानत्वात्त्वय्येव विषये न देवान्तरे कृतधियः करोतिरत्र परिकर्मणि वर्त्तते यथा हस्तौ कुरु पादौ कुरु इति कृता परिकर्मिता तत्त्वोपदेशपेशलतत्त्वच्छास्त्राभ्यासप्रकर्षेण संस्कृता धीर्बुद्धिर्येषां ते कृतधियस्त्विद्विधाः पुरुषाः कृतसपर्याः प्रादिकं विनाप्यादिकर्मणो गम्यमानत्वात् कृता कर्तुमारब्धा सपर्या सेवाविधि र्यैस्ते कृतसपर्याः आराध्यान्तरपरित्यागेन त्वय्येव सेवाहेवाकितां परिशीलयन्तीति शिखरिणीच्छन्दोऽलंकृतकाव्यार्थः ॥ ३२ ॥

समाप्ता चेयमन्ययोगव्यवच्छेदद्वात्रिंशिकास्तवनटीका ॥

येषामुज्ज्वलहेतुहेतिरुचिरः प्रामाणिकाधूस्पृशां
हेमाचार्यसमुद्भवस्तवनभूरर्थः समर्थः सखा ।
तेषां दुर्नयदस्युसंभवभयास्पृष्टात्मनां संभव
त्यायासेन विना जिनागमपुरप्राप्तिः शिवश्रीप्रदा ॥ १ ॥
चातुर्विद्यमहोदधे भगवतः श्रीहेमसूरे र्गिरां
गम्भीरार्थविलोकने यदभवद्दृष्टिः प्रकृष्टा मम ।
द्राघीयःसमयादराग्रहपराभूतप्रभूतावम
तन्नूनंगुरुपादरेणुकणिकासिद्धाञ्जनस्योर्जितम् ॥ २ ॥
अन्यान्यशास्त्रतरुसंगतचित्तहारि
पुष्पोपमेयकतिचिन्निचितप्रमेयैः ।
दृष्ट्वा ममान्तिमजिनस्तुतिवृत्तिमेनां

मालामिवामलहृदो हृदये वहन्तु ॥ ३ ॥
प्रमाणसिद्धान्तविरुद्धमत्र
यत्किंचिदुक्तं मतिमान्द्यदोषात् ।
मात्सर्यमुत्सार्य तदार्यचित्ताः
प्रसादमाधाय विशोधयन्तु ॥ ४ ॥
उर्व्यामेष सुधाभुजां गुरुरिति त्रैलोक्यविस्तारिणी
यत्रेयं प्रतिभाभरादनुमिति निर्दम्भमुज्जृम्भते ।
किं चामी विबुधाः सुधीतिवचनोद्गारं यदीयं मुदा
शंसन्तः प्रथयन्ति तामतितमां संवादमेदस्विनीम् ॥ ५ ॥
नागेन्द्र गच्छ गोविन्दवक्षोऽलंकारकौस्तुभाः ।
ते विश्ववन्द्या नन्द्यासुरुदयप्रभसूरयः ॥ ६ ॥
श्रीमल्लिषेणसूरिभिरकारि तत्पदगगनदिनमणिभिः ।
वृत्तिरियं मनुरविमितशाकाब्दे दीपमहसि शनौ ॥ ७ ॥
श्रीजिनप्रभसूरीणां साहाय्योद्भिन्नसौरभा ।
श्रुतावुत्तंसतु सतां वृत्तिः स्याद्वादमञ्जरी ॥ ८ ॥
बिभ्राणे कलिनिर्जयाज्जिनतुलां श्रीहेमचन्द्रप्रभौ
तद्द्व्यस्तुतिवृत्तिनिर्मितिमिषाद्भक्तिर्मयाविस्तृता ।
निर्णेतुं गुणदूषणे निजगिरां तान्नार्थये सज्जनान्
तस्यास्तत्त्वमकृत्तमा बहुमतिः सास्त्वेव सम्यग्यतः ॥ ९ ॥

## इति श्रीस्याद्वादमञ्जरी समाप्ता ॥

चौखम्बा-संस्कृत-ग्रन्थमाला।

( ग्रन्थसंख्या ९ )

# स्याद्वादमञ्जरी।

विद्वद्वर मल्लिषेणप्रणीता

जैनदर्शननिरूपणपरा

आर्हतधुरन्धरश्रीसिद्धहेमचन्द्रनिर्मि-
तवीतरागस्तुतिव्याख्यानरूपा।

वृन्दावनाभिजनेन मध्वसंप्रदायाचार्य्येण श्री १०८ भगव-
त्कृष्णचैतन्यचरणोपदिष्टैकवीथीपथिकेन वाराणसे-
यसम्राट्संस्कृतपाठालयाचार्य्यपरीक्षाशालिना
श्रीदामोदर लाल गोस्वामिना परिशोधिता।

काश्याम्

विद्याविलास यन्त्रालये प्रकाशिता।

सन् १९०० ईस्वी।

वैक्रमसंवत् १९५७।

शुभम्।

॥ श्रीः ॥

# भूमिका ।

निखिलरसामृतमूर्त्तिं र्मंदुकररुचिरकलितारकाश्रेणिः ।
कलितश्यामाललितो राधाप्रेयान् विधु र्जयति ॥

हंहो सर्वदर्शनरसपीयूषवशंवदसुमनसः सुमनसः !

अवधार्यतां धार्य्यतामर्हन्तो मुहुरार्हते विचारसरणिप्रकरणार्हतया जैनजीवजीवनजीवातुदेशीया विपक्षसमक्षतत्पक्षक्षपणक्षोदक्षमतीक्ष्णकमानसोल्लसनार्थियं **स्याद्वादमञ्जरी** गुणगच्छे भवादृशैरप्यवतितंसयिषयोररीकर्त्तुम् । अस्याः खलु प्रणेता विपश्चिदपश्चिमो जैनप्रवरो **मल्लिषेणो**ऽभूत् । कदाऽनेन महाशयेन जनुरापि विषयो वा कतमोऽलमकारीत्युभयमपि न यथार्थतयाऽध्यवसातुं शक्यते । ग्रन्थस्त्वयं वेदेन्दुवेदेन्दु १२१४ मितशके निरमायीत्यस्यैव ग्रन्थस्यावसानलेखतो निर्णीयते । एवमासौ किल स्याद्वादमञ्जरी समस्तजगतीतलप्रसिद्धस्य संस्कृतप्राकृतापभ्रंशशौरसेनीपैशाचीमागधभाषाव्याकृतिव्युत्पत्तिवैशारदीपद-संक्षिप्तसाराख्यशब्दशास्त्रग्रन्थकाव्यानुशासनहैमचन्द्रकोशादिनिबन्धुः प्राशवरस्य जिनेन्द्रोपासनामार्मिकधुरन्धरस्य श्रीसिद्ध**हेमचन्द्रस्य** कृतिषु स्वोपास्यजिनस्तुतिरूपाया अन्ययोगव्यवच्छेदपराया द्वात्रिंशद्द्वात्रिंशिकाया **वीतरागस्तुते** र्विवरणव्याजेन परमतानि निराचिकीर्षुणा स्वीयागमस्यैव सिद्धान्तत्वमित्यभिमन्यमानेन वस्त्वैदम्पर्यं वर्ण्यविषायं कार्थ्यार्थाणां तत्तन्मतकक्षकक्षकर्षणधुरीणपरार्थविनीतसमजैमिनिचरणप्रभृतीनामविगीता अपि सदुक्ती र्विजिगीयमानेन समन्तभद्राद्युपदेशबीजप्ररूढे वीतरागस्तुत्यादिपल्लविते स्याद्वादरत्नाकरादिस्थपरप्रतिपन्नतत्त्वतत्त्वसहस्रोद्गतयुक्तिनिकरदोहदसततोज्जीविते जिनदर्शनतरौ महामहिमर्षिवरश्रीकृष्णद्वैपायनकपिलवात्स्यायनपादादिसमुपदिष्टानिराख्येयसरकल्पनैकघनामृतोपयिकसंतोषजुषश्चित्तचातककान्तिकथामणीभिः स्वर्णोन्नतो मान्यताफलमुत्पिपादयिषुणा निजमतमननमीचकितमतिमन्मानवमनोभिलिन्दसंमदप्रदतया ऽन्वर्थाभिधाना व्यरच्यत स्यादित्यनेकान्तद्योतको निपातः । तदुक्तम् ।

वाक्येष्वनियमद्योतिगम्यं प्रति विशेषणम् ।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपकः ॥ इति ॥

भवतु वेत्थमेव कथमपि वाऽसौ । नैतावता "स्वार्थेषु को मत्सर" इति न्यायादभिरुचिजनोपेक्षालवोऽपि जात्विदमीयसद्युक्तिषूचितः । विचारतोऽसीमानन्दावहप्रभुवेदवाक्यप्रतीपतामुपेतापीयं यथा भवादृशामपि मानसानि स्वकीयाभिनवपरामर्शसद्युक्तिप्रदेशा-

वलोकनारहस्यसंवादविलासिनाधीनयिष्यति न तथैतज्जातीयान्यतः प्रसादं सङ्क्रमिष्यन्ति
तानि। सर्वं चैतदत्रभवतां समक्षमेव भविष्यति लोचनगोचरीकरणप्रयाससहनमात्रेण।
बहुषु स्थलेषु चास्यां प्रमाणत्वेनोपन्यस्तानि छन्दांसि प्राकृताद्यनेकभाषामयान्यतो नैकव्याकरणेनैव सुज्ञानसाधुत्वानीति तत्तद्भाषानुशासने व्याकृतिसापेक्षतया न सहसा निर्मात्रनवधानतासूचकानि भवितुमर्हन्ति। शोधने चास्याः पुस्तकमेकं स्वसन्निहितं नातिशुद्धमपरं चैतदपेक्षया किञ्चिच्छुद्धं जम्बूनृपालसंस्थापितकाशिकसंस्कृतपाठशालाऽध्यापक**पद्मनाभ**पण्डितानामित्येवं पुस्तकद्वयमवलम्ब्य कार्यान्तरव्यासक्त्यनवकाशेनापि श्रीयुतविद्यानुरागिमहोत्साहि बाबू**हरिदास**गुप्त प्रार्थनामात्रविवशेन मया प्रावर्त्ति। श्रमपुरःसरं विहितेऽपि शोधनेऽक्षरयोजनामुद्रणादिदोषजाशुद्धयः शुद्धिपत्रे सूचिताः। ततोऽप्यवशिष्टा नैसर्गिकप्राणिदोषमूलास्ताः क्षीरनीरविवेचनचुञ्चुमरालचातुरीमञ्चन्तः सौजन्यधोरणीधौरेया विद्वन्मौलिभूता भवादृशाः संशोधयन्तु। अनुभवन्तु चैतदीयां सौरभसंपत्तिम्। धयन्तु चास्वादनीयमकरन्दमाधुरीम्। अमोघयन्तु मच्छोधनायासम्। सफलयन्तु च प्रकाशयितुरुत्साहसमृद्धिं भावयन्तस्तदीयदृश्यप्रवृत्त्यादिश्रमम्। प्रसीदतु चानेन व्यापारेण सर्वान्तर्यामी भगवान् श्रीराधिकारमण इति।

**आशास्ते**

काश्याम्—
विजयदशमीदिने
सं० ५७
१०।४।१९००।

वृन्दावनाभिजनो मध्वसंप्रदायाचार्यः
श्री१०८भगवत्कृष्णचैतन्योपदिष्टकवीथीपथिको वाराणसेयसम्राट्संस्कृतपाठालयाचार्यपरीक्षाशाली
**श्रीदामोदरलाल गोस्वामी**

# स्याद्वादमञ्जरीसूचीपत्त्रम् ।


| पृ० | पं० | विषयः |
| --- | --- | --- |
| १ | १ | मङ्गलाचरणम् । |
| २ | १३ | जिनस्तुतिविवरणम् । |
| ” | २१ | जिनस्य मूलातिशयचतुष्टयवत्त्वम् । |
| ८ | ९ | जिनस्य यथार्थवादित्वम् । |
| ९ | २० | जिनानाश्रितानां मत्सरित्वम् । |
| ११ | १३ | औलूक्यमताऽऽक्षेपः । |
| ” | २० | सामान्यविशेषयोः द्रव्यादिभ्यः पार्थक्येनाभावः । |
| १४ | ३ | नित्यानित्यत्त्वनियमानुपपत्तिः । |
| १६ | ६ | व्योमादिवस्तूनां नित्यानित्यत्त्वोपपादनम् । |
| २२ | ८ | स्याद्वादे नित्यानित्यत्त्वविरोधपरिहारः । |
| २३ | ९ | ईश्वरस्य जगदकर्त्तृत्त्वे पूर्वपक्षः । |
| २४ | ५ | ईश्वरानेकत्त्वे पूर्वपक्षः । |
| ” | ८ | ईश्वरस्याव्यापकत्त्वे पूर्वपक्षः । |
| ” | १२ | ईश्वरस्यासर्वज्ञत्त्वे पूर्वपक्षः । |
| ” | १५ | ईश्वरस्य पारतन्त्र्ये पूर्वपक्षः । |
| ” | ” | ईश्वरस्यानित्यत्वे पूर्वपक्षः । |
| २६ | १५ | ईश्वरस्य जगदकर्त्तृत्त्वे सिध्दान्तः । |
| २७ | २१ | ईश्वरस्यानेकत्त्वेऽपि दोषाभावः । |
| २८ | १० | ईश्वरस्य व्यापकत्त्वानुपपत्तिः । |
| ३० | १४ | ईश्वरस्य सर्वज्ञत्त्वानुपपत्तिः । |
| ३१ | २२ | पराभिमतागमस्य प्रामाण्यानुपपत्तिः । |
| ३३ | ५ | ईश्वरस्य स्वातन्त्र्ये मानाभावः । |

| पृ० | प० | विषयः |
|---|---|---|
| ३३ | १८ | ईश्वरस्य नित्यत्वानुपपत्तिः । |
| ३६ | ४ | धर्मधर्मिभेदनियमखण्डनम् । |
| ” | २१ | समवायनिराकरणम् । |
| ३८ | ६ | समवायस्वीकारे दोषः । |
| ४० | ३ | द्रव्यादिषट्पदार्थनिरूपणम् । |
| ४४ | १ | ज्ञानात्मनोरत्यन्तभेदस्यौपाधिकत्वम् । |
| ” | १५ | परमतानुसारेण विशेषगुणोच्छेदस्यैव मोक्षत्वम् । |
| ४६ | ४ | सत्तायां द्रव्यादित्रिकमात्रवृत्तित्वनियमनिरासः । |
| ४८ | १ | ज्ञानात्मनोर्वस्तुतोऽत्यन्तभेदे दोषः । |
| ५२ | १३ | दुःखध्वंसस्य मोक्षत्वे दोषः । |
| ५५ | १२ | मोक्षस्य सुखसंवेदरूपत्वम् । |
| ५७ | ८ | आत्मनो देहपरिमाणत्वम् । |
| ५८ | १५ | आत्मनो विभुत्वे दोषः । |
| ६१ | १३ | आत्मनो देहपरिमाणत्वे दोषाणामुद्धारः । |
| ६५ | ३ | अक्षपादमतनिरासः । |
| ” | ३ | अक्षपादेष्टच्छलजातिनिग्रहस्थानानामनुपादेयत्वम् । |
| ६७ | १० | अक्षपादेष्टषोडशपदार्थानां मोक्षं प्रत्यहेतुत्वम् |
| ” | २० | अक्षपादकृतप्रमाणादिलक्षणदूषणम् । |
| ७३ | १ | जैमिनीयमताऽऽक्षेपे पूर्वपक्षः । |
| ” | २१ | विहितहिंसाया अप्यनर्थहेतुत्वम् । |
| ८३ | १२ | परागमस्याप्रामाण्यम् । |

| पृ० | प० | विषयः |
|---|---|---|
| ८४ | १५ | सामान्यहिंसाविधहिंसयोरुत्सर्गापवादत्वशङ्का । |
| ८६ | ४ | उक्तहिंसयोर्भिन्नविषयत्वेन नोत्सर्गापवादत्वम् । |
| ८८ | १८ | भट्टपादसंमतनित्यपरोक्षज्ञानवादनिरूपणम् । |
| ८९ | ४ | भट्टपादसंमतनित्यपरोक्षज्ञानवाददूषणम् । |
| ९० | १८ | ज्ञानस्य स्वसंविदितत्वाभ्युपगमः । |
| ९१ | ८ | ज्ञानस्य ज्ञानान्तरप्रकाश्यत्वं वदतां मतोपपादनम् । |
| ” | १३ | ज्ञानस्य ज्ञानान्तरप्रकाश्यत्वं वदतां मतनिराकरणम् । |
| ९३ | ११ | वेदान्तमताऽऽक्षेपः । |
| ९५ | ७ | प्रपञ्चस्य मिथ्यात्वानुपपत्तिः । |
| ९८ | ६ | अनुपलब्धेरप्रामाण्यम् । |
| ९९ | ११ | जगतो ब्रह्मविवर्त्तत्वानुपपत्तिः । |
| १०२ | ५ | नियतवाच्यवाचकभावमताऽऽक्षेपः । |
| १०३ | १० | सामान्यस्यैव वाच्यत्वं वदतां मतोपपादनम् । |
| १०४ | २० | विशेषस्यैव वाच्यत्वं वदतां मतोपपादनम् । |
| १०५ | २२ | सामान्यविशेषयोः पार्थक्येन वाच्यत्वं वदतां मतोपपादनम् । |
| १०६ | १८ | सामान्यविशेषतदुभयवाच्यत्ववादिमतनिरासपूर्वकमेकवाच्यनेकान्तोभयवाच्य- |

| पृ० | प० | विषयः |
|---|---|---|
| | | त्वाभ्युपगमः। |
| १०८ | २२ | वाचकस्यापि सामान्यविशेषोभयात्मकत्वम्। |
| १०९ | ३ | शब्दस्य पौद्गलिकत्त्वम्। |
| १११ | १० | वस्तुन एकानेकरूपत्त्वम्। |
| ११५ | २० | सांख्यमताऽऽक्षेपः। |
| ११६ | १६ | सांख्यपदार्थनिरूपणम्। |
| १२० | ३ | चिच्छक्तौ विषयपरिच्छेदशून्यत्वानुपपत्तिः। |
| १२१ | १० | बुद्धावध्यवसायानुपपत्तिः। |
| ” | १३ | अहंकारादिव्यवस्थादूषणम्। |
| १२३ | १६ | सांख्योक्तपदार्थोद्देशः। |
| १२४ | १९ | बौद्धमताऽऽक्षेपः। |
| १२५ | १० | प्रमाणप्रमित्योरभेदानुपपत्तिः। |
| १२८ | ५ | वस्तुमात्रस्य क्षणिकत्त्वम्। |
| १३० | २२ | अर्थज्ञानयोरुपादानोपादेयभावानुपपत्तिः- |
| १३३ | १८ | योगाचारमतनिरूपणम्। |
| १३६ | १६ | योगाचाराभिमतबाह्यार्थशून्यत्वखण्डनम्। |
| १४० | १२ | अर्थज्ञानयोर्भेदसाधनम्। |
| १४२ | ९ | माध्यमिकमताऽऽक्षेपोपक्रमः। |
| १४४ | २ | माध्यमिकमतनिरूपणम्। |
| १४५ | १७ | माध्यमिकमतखण्डनम्। |
| १५१ | १७ | क्षणभङ्गवादस्य निरूपणपूर्वकं दूषणम्। |
| १५७ | १० | क्षणिकमते वासनानुपपत्तिः। |
| १६१ | १४ | चार्वाकमतखण्डनम्। |

| पृ० | प० | विषयः |
|---|---|---|
| १६५ | २१ | जिनोक्तमतोपक्रमः । |
| १६८ | ५ | स्याद्वादमतस्थापनम् । |
| १७१ | १७ | द्रव्यपर्ययभेदेन वस्तुद्वैविध्यम् । |
| १७६ | १६ | सप्तभङ्गीप्ररूपणम् । |
| १७८ | २१ | सकलादेशविकलादेशाभ्यां सप्तभङ्गीद्वैविध्यम् । |
| ” | २४ | सकलादेशस्वरूपम् । |
| १८० | ५ | विकलादेशस्वरूपम् । |
| १८३ | १ | स्याद्वादे पराशङ्कितदोषोद्धारः । |
| १८६ | २१ | स्याद्वादस्वरूपनिरूपणम् । |
| १८८ | २२ | जिनोक्तेर्दोषातीतत्वेन प्राधान्यम् । |
| १९१ | १३ | नित्यानित्यत्वैकान्तवादे दोषविशेषोद्घाटनम् । |
| ” | १७ | नित्यैकान्तवादे सुखदुःखभोगानुपपत्तिः । |
| १९२ | ८ | नित्यैकान्तवादे पुण्यपापानुपपत्तिः |
| ” | ११ | नित्यैकान्तवादे बन्धमोक्षानुपपत्तिः । |
| १९३ | ४ | अनित्यैकान्तवादे सुखदुःखानुपपत्तिः । |
| ” | १४ | अनित्यैकान्तवादे पुण्यपापानुपपत्तिः । |
| १९४ | २ | अनित्यैकान्तवादे बन्धमोक्षानुपपत्तिः । |
| १९५ | १८ | दुर्नीतिनयप्रमाणानामर्थपरिच्छेदकत्वम् । |
| १९८ | ११ | नयस्य सप्तविधाभिप्रायभेदेन सप्तविधत्वम् । |
| ” | १७ | सप्तविधाभिप्रायस्वरूपकथनम् । |
| २०५ | २३ | प्रमाणस्वरूपलक्षणकथनम् । |
| २०६ | ७ | प्रमाणविभागः । |

| पृ० | प० | विषयः |
| --- | --- | --- |
| २०७ | ७ | उपमानार्थापत्त्यादीनां स्वीकृतप्रमाणान्तर्भावः । |
| ” | १६ | जीवानन्त्यानुज्ञा । |
| २०८ | १६ | क्षीणकर्मणां संसारित्वाभावानुमतिः । |
| २०९ | १४ | षड्विधजीवकायनिरूपणम् । |
| २११ | २० | जिनस्यापक्षपातित्वसमर्थनम् । |
| २१५ | १ | जिनोक्त्यभिनन्दनम् । |
| २१७ | ५ | परेषां लोकव्यामोहकत्वम् । |
| २१८ | १६ | कषच्छेदतापलक्षणम् । |
| २१९ | ७ | जिनोक्तिस्वीकर्तृणां विवेकित्वम् । |
| ” | १२ | ग्रन्थसमाप्तिः । |
| ” | १४ | स्तुतिकृत्प्रशस्तिः । |
| २२० | १२ | स्वनामग्रन्थनिर्माणसमयकीर्त्तनम् । |


इति ।

# शुद्धिपत्रम् ।

| पृष्ठे | पङ्क्तौ | अशुद्धयः | शुद्धयः । |
|---|---|---|---|
| १ | ६ | गुरु: | गुरू |
| २ | २ | तं | तम् |
| ३ | १४ | गच्छ्व | गच्छ |
| ३ | २१ | तां | ताम् |
| ३ | २४ | स्महे | स्महे |
| ४ | १ | त्पदु | त्यदु |
| ४ | १४ | नार्थं | नार्थम् |
| ५ | २ | र्हत्प | र्हत्य |
| ५ | ३ | ब्विं | र्ब्विं |
| ५ | ६ | तर | त्तर |
| ५ | १२ | खं | यं |
| ६ | ६ | नार्थं | नार्थम् |
| ६ | २२ | पात | पात्त |
| ७ | ८ | ह्रान्तं | ह्रान्तम् |
| ७ | ९ | श्रेष्टं | श्रेष्ठम |
| ७ | ९ | विस | विसं |
| ७ | १० | म्वा | वा |
| ७ | १८ | वु | बु |
| ८ | ३ | नाय | प्राय |
| ९ | १८ | त्वां | त्वाम् |
| १० | २१ | स्पै | स्यै |
| ११ | १७ | व्यांव | व्यांव |
| १३ | १० | षयं | षयम् |
| १४ | ५ | किच | किंच |
| १६ | १२ | उत | उत्त |
| १६ | १६ | ष्टं | ष्टम् |
| १६ | २ | पास्तं | पास्तम् |
| १६ | २१ | कस्प | कस्य |
| १८ | १४ | दुत | दुत्त |
| १८ | १७ | ग्प | ग्य |
| १८ | २१ | वादि | बादि |
| २० | १ | म्यादि | म्यादे |
| २१ | २२ | त्प | त्य |

| पृष्ठे | पङ्क्तौ | अशुद्धयः | शुद्धयः |
|---|---|---|---|
| २१ | २२ | क्रर्मं | क्रमम् |
| २१ | ४ | स्याऽक्त | स्याक्त |
| २२ | ५ | ग्पा | ग्या |
| २२ | १६ | तो | नो |
| २३ | १८ | ग्पे | ग्ये |
| २३ | १९ | ग्प | ग्य |
| २३ | २ | । | ॥५॥ |
| २३ | १७ | ग्प | ग्य |
| २४ | २२ | ग्प्रे | ग्वे |
| २५ | ९ | ह्वेवा | ह्वेवा |
| २६ | १ | बाणी | बाणी |
| २६ | १६ | त्पा | त्या |
| २७ | २ | म्बि | स्वि |
| २७ | ४ | द्दध्वे | द्धे |
| २७ | ६ | द्दबे | द्वे |
| २७ | १४ | त्प | त्य |
| २७ | २१ | त्प | व्य |
| २८ | ७ | त्प | त्य |
| २८ | ९ | त्प | त्य |
| २९ | ९ | सम्बे | संवे |
| ३० | २३ | भिन्नदेशे | अत्यर्थमेवभिन्नदेशे |
| ३१ | ३ | स्पा | स्या |
| ३१ | २ | ह | ह्व |
| ३२ | ७ | दते | दत्ते |
| ३२ | ७ | मेव | मैव |
| ३४ | १७ | च्छ्वा | च्छा |
| ५३ | १२ | ॥ | ॥६॥ |
| ३५ | १५ | वद्धा: | बद्धा: |
| ३६ | ११ | ह् | ह् |
| ३७ | १० | नं | नम् |
| ३७ | १८ | तं | तम् |
| ३८ | १४ | म | म् |
| ३९ | १८ | | ॥७॥ |

| पृष्ठे | पङ्क्तौ | अशुद्धयः | शुद्धयः । |
|---|---|---|---|
| ४० | १० | ह्व | ह्व |
| ४२ | २ | म्भ्र | म्भ |
| ४३ | १० | आनु | अनु |
| ४३ | १५ | व्रति | वृत्ति |
| ४३ | २२ | दन्यदम न्तवाम | दत्यन्तव्य |
| ४४ | १५ | द्व: | ब्द: |
| ४५ | ११ | च्छ्रि | च्छि |
| ४६ | ७ | द्दा | द्शा |
| ४६ | १० | र्ड्व | र्ड्व |
| ४६ | १९ | न्न् | न्न |
| ४६ | २३ | वाध | बाध |
| ४७ | ३ | द्दांनि: | द्दानि: |
| ४७ | ३ | ह्व | द्द्व |
| ४७ | १२ | कभा | काभा |
| ४७ | १७ | स्य: | स्यु: |
| ४८ | १४ | द | दा |
| ४९ | ६ | प्पु | प्यु |
| ४९ | १९ | द्दिव | दिवश्च |
| ५० | ६ | ज्ञान | ज्ञाना |
| ४९ | २१ | मग्र | मग्ट |
| ५० | १९ | त्नां | त्नु |
| ५१ | ४ | मपि | मयि |
| ५३ | २३ | यादु | याद्दु |
| ५४ | १८ | ल्यसु | ल्यसु |
| ५५ | ३ | सब | सव |
| ५५ | १६ | नेव | नैवं |
| ५५ | १७ | मेव | एव |
| ५५ | १८ | त्वा न्न | त्वान्मोचसु खिऽनुरागस्तनि वृत्तिहेतुत्वान्न |
| ५५ | २२ | ह्वं | ड्वं |
| ५५ | २३ | सवे | संवे |
| ५६ | ७ | र्यांग | र्यायग |
| ५६ | २१ | ज्ञात | ज्ञान |
| ५६ | २४ | । | ॥८॥ |
| ५७ | ७ | ॥८॥ | ॥९॥ |
| ५७ | ८ | द्दष्टा | द्दष्ट |
| ५७ | ११ | धारं | धार |

| पृष्ठे | पङ्क्तौ | अशुद्धयः | शुद्धयः । |
|---|---|---|---|
| ५८ | १६ | र्भ: | र्धि: |
| ५९ | ७ | प्प | पा |
| ६१ | २३ | व्यारा | व्यापारा |
| ६२ | २४ | नुप | नुप्र |
| ६३ | ६ | बश्च | वश्च |
| ६३ | १० | पते: | पत्ते: |
| ६३ | २२ | नामि | नानामि |
| ६४ | ३ | संघ | संघ |
| ६४ | ८ | रष्ठ | रष्ट |
| ६४ | १३ | नेया | नैया |
| ६५ | ४ | ब | ब |
| ६ | ५ | षिर: | षि: |
| ६६ | २१ | ताश्चीद्द | ताद्दशी |
| ६६ | २३ | तुकांश | तुकांश |
| ६८ | १३ | सभ्य | सम्य |
| ६९ | १४ | काल्य | काल्प |
| ७१ | २३ | ग्रन्द | ग्रह |
| ७२ | ६ | व्द | व्द |
| ७२ | ८ | व्द | व्द |
| ७२ | १२ | व्दे | ब्दे |
| ७२ | १२ | च्छ | च्छ |
| ७३ | २० | प्राधा | प्रधा |
| ७४ | ३ | अन्धा | वन्धा |
| ८० | १२ | माबा | मबा |
| ८२ | १७ | ह्वं | ड्वं |
| ८५ | १८ | ङ्घा | ड्व |
| ८६ | १३ | वादा | वदा |
| ८७ | ६ | दिप्री | दिप्रीति |
| ८७ | १० | कर्मा | कर्म |
| ८७ | ११ | याप्ती | प्राप्ती |
| ८७ | १३ | ष्ठ | ष्ट |
| ८९ | २४ | प्प | प्य |
| ९० | २ | पृप | प्य |
| ९१ | ५ | कत्य | कर्त्यं |
| ९१ | ११ | नचे | नचै |
| ९१ | १४ | त्यनु | त्यचानु |
| ९२ | १७ | सुात्या | मुत्या |
| ९२ | १८ | द्यन्तां | द्यतां |
| ९३ | १० | बन्ध्या | वन्ध्या |

| पृष्ठे | पङ्क्तौ | अशुद्धयः | शुद्धयः |
|---|---|---|---|
| ९४ | ५ | द्द | द्द |
| ९४ | ८ | बन्ध्या | बन्ध्या |
| ९५ | | व्द | ब्द |
| ९८ | २ | वदन्न | तदन्न |
| ९९ | ७ | ब्रह्म | ब्रह्म |
| १० | १५ | वर्ग | वर्ग |
| १०२ | १९ | व्दा | ब्दा |
| १०३ | १८ | सामा | समा |
| १०८ | २४ | ग्राह्म | ग्रह्म |
| १०९ | १९ | ब्दि | व्दे |
| १०९ | १९ | त्यास्म | त्यस्मि |
| १०९ | २४ | द्वी | ब्दी |
| ११० | २ | व्द | ब्द |
| ११० | १२ | ब्द | व्द |
| ११० | १४ | व्द | ब्द |
| ११० | १५ | व्द | ब्द |
| ११० | १५ | व्द | ब्द |
| ~~१११~~ | ~~२~~ | व्द | वद् |
| १११ | ३ | वद् | व्द |
| १११ | २० | भाव | भावा |
| १११ | २ | रूपं | रूपम् |
| ११४ | ७ | वदा | ब्दा |
| ११६ | ७ | ननापि<br>नापि | नमुच्यतेनापि |
| ११६ | १० | वद् | वद् |
| ११६ | २० | वैष | वैष |
| ११७ | १४ | वद् | बद् |
| ११७ | २० | वदे | बदे |
| ११७ | २३ | वद् | बद् |
| ११८ | १ | वद् | बद् |
| ११८ | १ | वद् | बद् |
| ११८ | ३ | वद् | बद् |
| ११८ | ९ | वद् | बद् |
| ११८ | ९ | वद् | बद् |
| ११८ | १० | वद् | बद् |
| ~~११८~~ | ~~११~~ | ~~वद्~~ | बद् |
| ११८ | ११ | व्द | बद् |

| पृष्ठे | पङ्क्तौ | अशुद्धयः | शुद्धयः |
|---|---|---|---|
| ११८ | १२ | वद् | द्व |
| ११८ | १२ | बद् | बद् |
| ११८ | २३ | द | द्व |
| ११९ | २१ | व | ब |
| १२४ | १२ | द | वद् |
| १२६ | २१ | स्य | स्य |
| १२७ | ४ | सब्वे | सर्वे |
| ~~१३१~~ | ~~२~~ | रित्त | रित्तं |
| १३३ | १४ | तयोस्तयो | तयोरुभयो |
| १३५ | १६ | क | क |
| १३५ | १८ | क | क |
| १३६ | १ | ग्रास्य | ग्राःस्य |
| १४२ | २१ | तमत् | तमं |
| १४९ | २ | वाघ | बा |
| १४८ | १४ | यस्य | यस्ये |
| १४९ | २२ | चमा | चना |
| १५० | २० | तत्त्वमा<br>ध्यात्मिका | तत्त्वं मा<br>ध्यमिका |
| १५१ | ९ | सिद्धिप्राप्त: | सिद्धि:प्राप्त |
| १५४ | १५ | प्रच | प्रेच |
| १५४ | २० | सांता | संता |
| १५८ | ९ | दाङ्गे | दाभि |
| १५९ | १२ | चित्ता | चित्तो |
| १६६ | ११ | दाघ्न | दाम्रा |
| १६६ | २१ | चाल | चात् |
| १६८ | ४ | द्रूप | द्रूपा |
| १७६ | ११ | तीथि | तीर्थिं |
| १७७ | २३ | री | रो |
| १७९ | १४ | स्य | स्य |
| १८० | १७ | व | ब |
| १९१ | ११ | द्द | दु |
| १९२ | २४ | व्योम्न | व्योम्न |
| ~~१९३~~ | ~~३~~ | ~~द~~ | वद् |
| २०८ | २० | “च | च” |
| २०९ | ६ | मं | सं |
| २०९ | १३ | सामा | समा |
| २११ | १९ | ॥३७॥ | ॥३०॥ |

इति ।